आरोहमिव रत्नानां प्रतिष्ठानमिव श्रियः ॥ १४ ॥
वरान्नपानकलिलां शालितण्डुलभोजनां ।
धूपमाल्यहविर्गन्धैर्हृद्यैश्चाप्यधिवासितां ॥ १५ ॥
हस्त्यश्वरथसंपूर्णां नानायानसमाकुलां ।
नानापार्थिवदूतैश्च वणिग्भिश्चोपशोभितां ॥ १६ ॥
उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलां ।
सर्वयन्त्रायुधवतीमुपेतां सर्वशिल्पिभिः ॥ १७ ॥

सूतमागधसंबाधां श्रीमतीमतुलप्रभां ।
वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीं ॥ १८ ॥
मृदङ्गवेणुवीणानां रम्यैः शब्दैर्निनादितां ।
ब्रह्मघोषस्वनवतीं धनुःस्वननिनादितां ॥ १९ ॥
लोकपालोपमैः शूरैः सर्वशस्त्रार्थपारगैः ।
गुप्तां योधशतैश्चापि नागैर्भोगवतीमिव ॥ २० ॥

वराग्निमद्भिर्गुणिभिः स्वलंकृतां
द्विजोत्तमैर्वेदविदां पुरोगमैः ।
सहस्रदैः सत्यतपोदयान्वितैर्-
महर्षिकल्पैर्यतिभिर्यतात्मभिः ॥ २१ ॥

इति बालकाण्डे अयोध्यावर्णना नाम पञ्चमः सर्गः
॥ ५ ॥

Digitized by Google

## CAPUT VI.

### REGIS PRAECONIUM.

पुर्यां तस्यामयोध्यायां वेदवित् सर्वसंग्रहः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥ १ ॥
इक्ष्वाकूणामतिरथो यज्वा धर्मपरो वशी ।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥ २ ॥
बलवान् विजितामित्रो नीतिमान् विजितेन्द्रियः ।
धनैश्च संचयैश्चान्यैः शक्रवैश्रवणोपमः ॥ ३ ॥
आदिराजो मनुरिव प्रजानां परिरक्षिता ।
राजा दशरथो नाम बभूव राष्ट्रवर्धनः ॥ ४ ॥
तेन सत्याभिसंधेन त्रिवर्गमनुतिष्ठता ।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥ ५ ॥
तस्मिन् पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः ।
नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ॥ ६ ॥
नाल्पसंनिचयः कश्चिदासीत् तस्मिन् जनः पुरे ।
कुटुम्बी यो न सिद्धार्थो गवाश्वधनधान्यवान् ॥ ७ ॥
तत्र कुप्रावृतो नासीद्दरिद्रो वा पुरोत्तमे ।
नामृष्टभुङ् न चादाता नासुगन्धो न चानृजुः ॥ ८ ॥

Digitized by Google

नाकुण्डली नामुकुटी नास्रग्वी नाविलेपनी ।
नाहस्ताभरणोपेतो न चाप्यासीदनिष्कधृक् ॥ ९ ॥
न कदर्यः कश्चिदासीन्नानृती न शठोऽपि वा ।
न मानी न च संरम्भी न नृशंसो न कत्थनः ॥ १० ॥
नामहात्मा न पिशुनो न परस्वोपजीवकः ।
न दीनो नापि चोद्विग्नो नातुरो न भयातुरः ॥ ११ ॥
सुव्रता धृतिमन्तश्च नरा आसंस्तथा स्त्रियः ।
नराः स्वदारनिरता नार्यश्चासन् पतिव्रताः ॥ १२ ॥
रूपचातुर्यमाधुर्यशीलाचारगुणान्विताः ।
नार्यश्चासन्नयोध्यायां मृष्टाभरणवाससः ॥ १३ ॥
स्वकर्मनिरताश्चासन् सर्वे तत्र द्विजातयः ।
यज्ञाध्ययननित्याश्च विरताश्च परिग्रहात् ॥ १४ ॥
नामाहिताग्निर्नायज्वा विप्रो नाप्यसहस्रदः ।
न नास्तिको नानृतवाङ् न कश्चिदबहुश्रुतः ॥ १५ ॥
क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः ।
शूद्राः स्वधर्मनिरतास्त्रीन् वर्णानुपचारिणः ॥ १६ ॥
वर्णश्रेष्ठान् पूजयन्ति पितॄन् देवातिथींस्तथा ।
न योनिसंकरश्चासीत् तत्र नाचारसंकरः ॥ १७ ॥
आसन् दीर्घायुषस्तत्र नराः सत्यपरायणाः ।
सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥ १८ ॥

Digitized by Google

एवमिक्ष्वाकुनाथेन पालिता साभवत् पुरी ।
यथा पुरस्तान्मनुना मानवेन्द्रेण भूरियं ॥ १९ ॥
योधानामग्निकल्पानां संयुगेष्वनिवर्तिनां ।
गुप्ता पुरी सहस्रैः सा सिंहैरिव गिरेर्गुहा ॥ २० ॥
काम्बोजदेशजैश्चापि हयैर्वनायुजैस्तथा ।
नदीजैर्वाह्लिकैश्चैव पूर्णा हरिहयोपमैः ॥ २१ ॥
विन्ध्यपर्वतजैश्चैव नागैर्हैमवतैस्तथा ।
सत्त्ववीर्यगुणोपेतैः शूरैर्व्यालचेष्टितैः ॥ २२ ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा ।
अञ्जनादपि निष्पन्नैर्वामनादपि च द्विपैः ॥ २३ ॥
भद्रैर्मन्द्रैर्मृगैश्चैव मातङ्गैर्दन्तहस्तिभिः ।
नित्यमत्तैः समाकीर्णा नागैरचलसंनिभैः ॥ २४ ॥
आयोजनाद्धा भूयो वा सत्यनामा प्रकाशते ।
सा पुरी यत्र राजाभूत् पुरा दशरथोऽनघः ॥ २५ ॥

तां सत्यनाम्नीं दृढतोरणार्गलां
गृहैर्विचित्रैरुपशोभितां शिवां ।
पुरीमयोध्यां नृसहस्रसंकुलां
शशास वै शक्रसमो महीपतिः ॥ २६ ॥

इति बालकाण्डे राजवर्णना नाम षष्ठः सर्गः ॥ ६ ॥



21
26
47

Digitized by Google

## CAPUT VII.

### LAUDES MINISTRORUM REGIS.

ऋत्विजौ मन्त्रिणौ चैव तस्यास्तामृषिसत्तमौ ।
वशिष्ठो वामदेवश्च वेदवेदाङ्गपारगौ ॥ १ ॥
अष्टावन्ये बभूवुश्च तस्यामात्या महीपतेः ।
शुचयश्चानुरक्ताश्च राजकार्येषु नित्यशः ॥ २ ॥
धृष्टिर्जयन्तो विजयः सिद्धार्थो ऽप्यर्थसाधकः ।
अशोको धर्मपालश्च सुमन्त्रश्चाष्टमो ऽभवत् ॥ ३ ॥
विद्याविनीता ह्रीमन्तः कुलीना नियतेन्द्रियाः ।
मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः ॥ ४ ॥
ते गुणैरुपसंपन्नाः सर्वे सुविपुलौजसः ।
पर्युपासते राजानं वसवो वासवं यथा ॥ ५ ॥
परापवादविरता गुणाढ्या न च गर्विताः ।
आर्यवेशाः सुमनसो न च संदिग्धनिश्चयाः ॥ ६ ॥
कुशला व्यवहारेषु विरागाः सर्वसंमताः ।
वर्धयन्तश्च धर्मेण कोषमूलं महीपतेः ॥ ७ ॥

Digitized by Google

परस्परेणाविरुद्धाः प्रीतिमन्तः प्रियंवदाः ।
रक्षितारश्च वर्णानां नित्यं विषयवासिनां ॥ ८ ॥
नरेन्द्रवचनाशक्ताश्चेतस्तस्य परायणाः ।
मन्त्रसंवरणे शक्ताः शक्ताः सूक्ष्मासु बुद्धिषु ॥ ९ ॥
तेषामविदितं किंचित् स्वेषु नास्ति परेषु च ।
क्रियमाणं कृतं वापि चारेणापि चिकीर्षितं ॥ १० ॥
संधिविग्रहतत्त्वज्ञाः प्रकृत्या संपदान्विताः ।
हितार्थं च नरेन्द्रस्य जाग्रतो नयचक्षुषा ॥ ११ ॥
क्रोधात् कामार्थहेतोर्वा न ब्रूयुरनृतं क्वचित् ।
अतीक्ष्णदण्डाः संप्रेक्ष्य पुरुषाणां बलाबलं ॥ १२ ॥
पुत्रे ऽपि च प्राप्तदोषे धर्मतो दण्डपातिनः ।
अद्रोग्धारश्च धर्मेण शत्रोरप्यकृतागसः ॥ १३ ॥
नासीत् पुरे वा राष्ट्रे वा तस्करो नाशुचिर्नरः ।
न दुष्टः कश्चिदप्यासीत् परदाराभिमर्षकः ॥ १४ ॥
आसंस्तदानुग्रहिताः सर्वे वर्णाः स्वकर्मभिः ।
प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरं च तत् ॥ १५ ॥
अमात्यैरीदृशैस्तैस्तु राजा दशरथो ऽन्वितः ।
धर्मतः पालयामास पृथिवीमनुरञ्जयन् ॥ १६ ॥
अवेक्षमाणश्चारेण मही सूर्य इवांशुभिः ।
नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः ॥ १७ ॥

Digitized by Google

तैर्मन्त्रिभिर्मन्त्रहिते निविष्टैर्-
विद्वद्भिरात्पैः कुशलैः समर्थैः ।
स पार्थिवो दीप्तिमवाप युक्तस्-
तेजोमयैर्गोभिरिवोदितो ऽर्कः ॥ १८ ॥

इति बालकाण्डे ऽमात्यवर्णना नाम सप्तमः सर्ग ॥७॥

---

VIII – XVIII
420 verses

## CAPUT VIII.

### Sumantrae sermo.

तस्य त्वेवंप्रभावस्य धार्मिकस्य महात्मनः ।
सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ॥ १ ॥
तस्य चिन्तयतो बुद्धिरुत्पन्नेयं महामतेः ।
सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहं ॥ २ ॥
सुनिश्चितां मतिं कृत्वा यष्टव्ये वसुधाधिपः ।
मन्त्रिभिः सह संमन्त्र्य तैः स्वामिहितकारिभिः ॥ ३ ॥
तत्राब्रवीदिदं राजा सुमन्त्रं मन्त्रिसत्तमं ।
शीघ्रमानय मे सर्वान् वशिष्ठप्रमुखान् गुरून् ॥ ४ ॥
एवमुक्तो नृपतिना सुमन्त्रो वाक्यमब्रवीत् ।
नरेन्द्र श्रूयतां तावत् पुराणे यन्मया श्रुतं ॥ ५ ॥

Digitized by Google

सनत्कुमारो भगवान् पुरा कथितवान् कथां ।
भविष्यं विदुषां मध्ये तव पुत्रसमुद्भवं ॥ ६ ॥
अस्तीह काश्यपसुतो विभाण्डक इति श्रुतः ।
ऋष्यशृङ्ग इति ख्यातस्तस्य पुत्रो भविष्यति ॥ ७ ॥
स वने जातसंवृद्धो मुनिर्वनचरैः सह ।
नान्यं प्रज्ञास्यते कंचिन्मानवं पितृवर्जितं ॥ ८ ॥
तस्यानुगं ब्रह्मचर्यं भविष्यति महात्मनः ।
लोकेषु प्रथितं चोग्रं तपस्तस्य भविष्यति ॥ ९ ॥
तस्यैवं वर्तमानस्य कालः समभिवर्त्स्यति ।
अग्निं शुश्रूषमाणस्य पितरं च यशस्विनं ॥ १० ॥
एतस्मिन्नेव काले तु लोमपादः प्रतापवान् ।
अङ्गेषु प्रथितो राजा भविष्यति महाबलः ॥ ११ ॥
तस्य व्यतिक्रमाद्राज्ञो भविष्यति सुदारुणा ।
अनावृष्टिर्जनपदे क्षयाय बहुवार्षिकी ॥ १२ ॥
अनावृष्ट्या तया राजा स तदा परिकर्षितः ।
प्रक्ष्यति ज्ञानिनो विप्रान् अनावृष्टिप्रतिक्रियां ॥ १३ ॥
भवन्तः श्रुतवन्तो वै लोकवृत्तान्तवेदिनः ।
समादिशन्तु नियमं प्रायश्चित्तं यथा भवेत् ॥ १४ ॥
लोमपादवचः श्रुत्वा ते वक्ष्यन्ति द्विजोत्तमाः ।
विभाण्डकसुतं राजन् सर्वोपायैरिहानय ॥ १५ ॥

Digitized by Google

आनाय्य तु महीपाल ऋष्यशृङ्गमृषेः सुतं ।
प्रयच्छास्मै सुतां शान्तां विधिना सुसमाहितः ॥ १६ ॥
तेषां तु वचनं श्रुत्वा राजा चिन्तां प्रपत्स्यते ।
केनोपायेन वै शक्य इहानेतुं स वीर्यवान् ॥ १७ ॥
स निश्चयं स्वयं राजा यदा नाधिगमिष्यति ।
तदामात्यान् समाहूय प्रतिपत्स्यति निश्चयं ॥ १८ ॥
पुरोहितममात्यांश्च प्रेषयिष्यति यत्नतः ।
आनयध्वं महाभागमृष्यशृङ्गं सुसत्कृतं ॥ १९ ॥
ते तु राज्ञो वचः श्रुत्वा व्यथिता विह्वलाननाः ।
न गच्छेम ऋषेर्भीता अनुनेष्यन्ति तं नृपं ॥ २० ॥
वक्ष्यन्ति चिन्तयित्वा च तस्योपायान् बहूंस्ततः ।
आनेष्यामो वयं तं च न च दोषो भविष्यति ॥ २१ ॥
इति तेषां वचः श्रुत्वा भूयः स पृथिवीपतिः ।
तृतीये ऽहनि निश्चित्य मन्त्रिभिर्मन्त्रनिश्चयं ॥ २२ ॥
वेश्याभिर्मुनिरूपाभिरानेष्यत ऋषेः सुतं ।
लोभयित्वाभ्युपायेन स्वां पुरीं पितुराश्रमात् ॥ २३ ॥
भविष्यति ततो वृष्टिस्तस्य राष्ट्रे महीपतेः ।
तस्याभ्यागमनादेव मुनिपुत्रस्य धीमतः ॥ २४ ॥
ततः स राजा विधिवत् शान्तां तस्मै प्रदास्यति ।
स्वकां दुहितरं भार्यां रूपौदार्यगुणान्वितां ॥ २५ ॥

Digitized by Google

एवं तस्य स जामाता भविष्यति महायशाः ।
लोमपादस्य राजर्षेर्ऋष्यशृङ्गः प्रतापवान् ॥ २६ ॥
राज्ञो दशरथस्यापि स पुत्रान् अभिकाङ्क्षितान् ।
विधास्यते महायज्ञे हविर्भुग्बाधराग्निषु ॥ २७ ॥
सनत्कुमाराद्वचनमेतावद्व्याहृतं मया ।
ऋषिमध्ये कथयतो यथावदनुपूर्वशः ॥ २८ ॥
अथ हृष्टो दशरथः सुमन्त्रं प्रत्यभाषत ।
आनीतिर्ऋष्यशृङ्गस्य विस्तरेण त्वयोच्यतां ॥ २९ ॥

इति बालकाण्डे सुमन्त्रवाक्यं नाम अष्टमः सर्गः ॥ ८ ॥

---

## CAPUT IX.

### EPISODIUM DE RISHYASRINGA.

इति पृष्टः सुमन्त्रस्तदाख्यातुमुपचक्रमे ।
आनीत ऋष्यशृङ्गो ऽसौ येनोपायेन मन्त्रिभिः ॥ १ ॥
लोमपादमुवाचेदं सहामात्यः पुरोहितः ।
उपायो निरपायो ऽयमस्माभिः परिचिन्तितः ॥ २ ॥

Digitized by Google

ऋष्यशृङ्गं वनचरं तपस्येकरसे रतं ।
अनभिज्ञं च नारीणां विषयाणां सुखस्य च ॥ ३ ॥
इन्द्रियार्थैरभिमतैर्नरचित्तप्रमाथिभिः ।
पुरमानाययिष्यामो लोभयित्वा वनादितः ॥ ४ ॥
नावः सुचित्राः कल्प्यन्तां नानाकृत्रिमवृक्षकाः ।
कृत्रिमाणि फलान्यत्र सुगन्धीनि बहून्यपि ॥ ५ ॥
तत्र कृत्रिमवृक्षाश्च नानापक्षिसमन्विताः ।
नानावस्त्रसमावृत्ताः सुगन्धपुष्पधारिणः ॥ ६ ॥
एवंविधासु नौकासु तिष्ठन्तु वरयोषितः ।
यौवनोन्मत्तनयनाः सर्वाः सर्वाङ्गशोभनाः ॥ ७ ॥
गीतवादित्रकुशला नृत्येषु कुशलास्तथा ।
उपायज्ञाः कलाज्ञाश्च वैशिके परिनिष्ठिताः ॥ ८ ॥
मुनिवेशपरिछन्नास्तत्र गछन्तु योषितः ।
रहस्युपेत्य ता एनमानयन्तु शुभव्रतं ॥ ९ ॥
श्रुत्वा तथेति तं राजा प्रत्युवाच पुरोहितं ।
मन्त्रिणश्च स धर्मात्मा तथा चक्रुश्च ते तदा ॥ १० ॥
सुसमृद्धास्तथा नौभिः प्रयाता यत्र वै मुनिः ।
वारमुख्याङ्गना गत्वा वनं प्रतिभयं महत् ॥ ११ ॥
आश्रमस्याविदूरस्था यत्नं कुर्वन्ति दर्शने ।
विभाण्डकभयोद्विग्ना लतागुल्मसमावृताः ॥ १२ ॥

Digitized by Google

चारयित्वा तु तमृषिमाश्रमादभिनिर्गतं ।
तस्य संदर्शने तस्थुर्ऋषिपुत्रान्तिके पुनः ॥ १३ ॥
चित्रं संक्रीडमानास्ताः क्रीडनैर्विविधैस्तदा ।
कन्दुकैश्चैव गायन्त्यः क्रीडन्त्यः प्लुतवल्गितैः ॥ १४ ॥
सौगन्धिकेन माल्येन चूर्णैश्च सुसुगन्धिभिः ।
मदविह्वलिताः काश्चित् प्रपतन्त्युत्पतन्ति च ॥ १५ ॥
धूयमानैश्च वसोभिः सूक्ष्मैरङ्गदभूषणैः ।
परस्परं विनिघ्नन्त्यः शोभन्ते ललितेन च ॥ १६ ॥
नूपुरशिञ्जितरवैः कोकिलाभिरुतेन च ।
गन्धर्वनगरप्रख्यं प्रगीतमिव तद्वनं ॥ १७ ॥
नयनभ्रूविकारैश्च हस्तैरम्बुजसंनिभैः ।
संज्ञाश्च ताः प्रकुर्वन्त्यः पुंसां हर्षविवर्धनाः ॥ १८ ॥
कामसंजननार्थाय ऋषिपुत्रस्य धीमतः ।
सर्वतः प्रकिरन्ति स्म ललमाना वराङ्गनाः ॥ १९ ॥
अभूतपूर्वं तद्दृष्ट्वा विस्मितः साध्वसं गतः ।
निश्चक्रामाश्रमात् तूर्णमृष्यशृङ्ग ऋषेः सुतः ॥ २० ॥
न तेन जन्मप्रभृति दृष्टपूर्वं तपस्विना ।
स्त्री वा पुमान् वा यच्चान्यत् सत्त्वं नगरराष्ट्रजं ॥ २१ ॥
दृष्ट्वैव च सुचार्वङ्गीस्तास्तदा तनुमध्यमाः ।
विचित्रवेशाभरणा गायन्तीर्मधुरस्वरं ॥ २२ ॥

Digitized by Google

स तं देशमुपागम्य ज्ञातकौतूहलो मुनिः ।
विभाण्डकसुतो जिष्णुस्तस्थौ विस्मितमानसः ॥ २३ ॥
ताश्च तं विस्मितं दृष्ट्वा जगुः कलपदान्तरं ।
गीतं मधुरभाषिण्यो जहसुश्चाप्यायतेक्षणाः ॥ २४ ॥
अब्रुवंश्चैनमभ्यासमागम्य मदविह्वलाः ।
को ऽसि कस्य सुतश्च त्वं त्वरावान् समुपागतः ॥ २५ ॥
एकश्च विजने ऽरण्ये कस्माच्चरसि शंस नः ।
ज्ञातुं त्वां वयमिच्छामस्तत्त्वमाचक्ष्व नः प्रभो ॥ २६ ॥
अदृष्टपूर्वास्ता दृष्ट्वा कामरूपधराः स्त्रियः ।
हार्दात् तस्य मतिर्जाता व्याख्यातुं पितरं स्वकं ॥ २७ ॥
पिता विभाण्डको नाम महर्षिः काश्यपो मम ।
तस्याहमौरसः पुत्र ऋष्यशृङ्ग इति श्रुतः ॥ २८ ॥
आश्रमो ऽयमिहास्माकं समीपे शुभदर्शनाः ।
करिष्ये ऽतिथिपूजां वः सर्वेषां विधिपूर्वकं ॥ २९ ॥
ऋषिपुत्रवचः श्रुत्वा सर्वासां मतिरास वै ।
तदाश्रमपदं द्रष्टुं प्रजग्मुः सहितास्ततः ॥ ३० ॥
गतानां तत्र वै पूजां चक्रे वैभाण्डकिस्तदा ।
इदमर्घ्यमिदं पाद्यमिदं मूलफलं च नः ॥ ३१ ॥
प्रतिगृह्य तु तां पूजां सर्वा एव समुत्सुकाः ।
ऊचुश्चैनं सुमधुरं ता हसन्त्य इदं वचः ॥ ३२ ॥

Digitized by Google

अस्माकमपि मुख्यानि फलानीमानि सन्ति वै ।
फलान्याश्रमजातानि यदि रोचते ते द्विज ॥ ३३ ॥
प्रतिगृह्णाण भद्रं ते भक्षयस्व च मा चिरं ।
तीर्थोदकमिदं तावत् पीयतामिति सुव्रत ॥ ३४ ॥
अथास्मै प्रदडुः स्वादून् मोदकान् फलसंनिभान् ।
अन्यांश्च विविधान् भक्ष्यान् मधूनि मधुराणि च ॥ ३५ ॥
तान्यास्वाद्य स तपस्वी फलानीति स्म मन्यते ।
अनास्वादितपूर्वाणि वने नित्यं निवासिना ॥ ३६ ॥
ततस्तु तं समालिंग्य सर्वा हर्षसमुत्सुकाः ।
परिषस्वजिरे चैनं हसन्त्यो मदविह्वलाः ॥ ३७ ॥
श्रोत्रमूले चोपजेपुर्वदनैर्मधुगन्धिभिः ।
परिपस्पृशिरे चैनं पीनैरुरसिजैः सुखं ॥ ३८ ॥
मधूनि स सुगन्धीनि पीत्वा प्रमुदितो ऽभवत् ।
सुकुमारैश्च तैरङ्गैस्ताभिः स्पृष्टो व्यमुह्यत ॥ ३९ ॥
आपृच्छ्य च तदा विप्रं व्रतचर्या निवेद्य च ।
ऋषेर्भीताश्च ता शीघ्रं गमनाय मतिं दधुः ॥ ४० ॥
स्वमाश्रमपदं तस्य व्यपदिश्याविदूरतः ।
गच्छन्ति स्मापदेशेन भीतास्तस्य पितुः स्त्रियः ॥ ४१ ॥
तासु प्रतिगतास्वेवमृष्यशृङ्गः समुत्सुकः ।
अस्वस्थहृदयस्तत्र डुःखार्तः परिवर्तते ॥ ४२ ॥

Digitized by Google

अथाजगाम भगवान् काश्यपः स्वं निवेशनं ।
ध्यायमानं च तं दृष्ट्वा ऋष्यशृङ्गं समुत्सुकं ॥ ४३ ॥
पप्रच्छ काश्यपः पुत्रं कस्मान्मां नाभिनन्दसि ।
चिन्तासागरमध्यस्थमद्य त्वां तात लक्षये ॥ ४४ ॥
न ह्यीदृशं तापसानां रूपं भवति कर्हिचित् ।
शीघ्रमाचक्ष्व मे पुत्र किमिदं वैकृतं कृतं ॥ ४५ ॥
एवमुक्तः काश्यपेन प्रोवाच पितरं तदा ।
भगवन्निह मे दृष्टाः पुरुषाः शुभलोचनाः ॥ ४६ ॥
सुकुमारैरुरसिजैः पीनैरत्यद्भुतोपमैः ।
परिपस्पृशिरे मां च गाढमालिंग्य सर्वशः ॥ ४७ ॥
गायन्ति सुकुमाराणि मनोज्ञानि मुहुर्मुहुः ।
क्रीडन्ति चाद्भुताकारैर्नयनभ्रूविचेष्टितैः ॥ ४८ ॥
अब्रवीद्भगवान् श्रुत्वा ऋष्यशृङ्गवचस्तदा ।
रक्षांसि तेन रूपेण तपसो नाशनाय वै ॥ ४९ ॥
. . . . . . . . . . . . . . . . . ।
विश्रम्भस्ते न कर्तव्यस्तेषु पुत्र कथंचन ॥ ५० ॥
एवमुक्त्वा ऋष्यशृङ्गं समाश्वास्य च काश्यपः ।
उषित्वा रजनीमेकामरण्यं स जगाम ह ॥ ५१ ॥
अथापरेद्युस्तं देशमाजगाम पुनस्त्वरन् ।
मनोज्ञरूपास्ता यत्र दृष्टा वै चारुमध्यमाः ॥ ५२ ॥

Digitized by Google

ताश्च दृष्ट्वैव तं दूरादायान्तं काश्यपात्मजं ।
प्रत्युद्गम्याब्रुवन् वाक्यं प्रहसन्त्य इदं तदा ॥ ५३ ॥
एह्याश्रमपदं रम्यं पश्यास्माकमिति प्रभो ।
तत्र पूजामवाप्याग्र्यां पुनरभ्यागमिष्यसि ॥ ५४ ॥
श्रुत्वैतद्वचनं तासां स्त्रीणामतिमनोहरं ।
गमनाय मतिं चक्रे ताश्चैनं निन्युरङ्गनाः ॥ ५५ ॥
तत्र चानीयमाने तु विप्रे तस्मिन् महात्मनि ।
ववर्ष सहसा देवो जगत् प्रह्लादयंस्तदा ॥ ५६ ॥
विभाण्डकश्च विप्रर्षिराजगाम स्वमालयं ।
वन्यं मूलफलं प्राप्य भारार्तः सो ऽविशत् तदा ॥ ५७ ॥
शून्यमावसथं दृष्ट्वा पुत्रदर्शनलालसः ।
परिश्रान्तस्तथैवासावकृत्वा पादधावनं ॥ ५८ ॥
चुक्रोश ऋष्यशृङ्गेति सर्वतः प्रविलोकयन् ।
न चापश्यत् सुतं तत्र काश्यपो भगवानृषिः ॥ ५९ ॥
निष्क्रम्य च वनात् तस्माद्ग्रामं ददर्श काश्यपः ।
ग्रामांश्च परिपप्रच्छ गोकुलानि च सर्वशः ॥ ६० ॥
कस्यैष विषयः सौम्यो ग्रामाश्च बहुगोकुलाः ।
ऋषेर्वचनमाज्ञाय सर्वे ते गोषु जीविनः ॥ ६१ ॥
कृताञ्जलिपुटा भूत्वा विनयेनाचचक्षिरे ।
अङ्गेषु प्रथितो राजा लोमपाद इति श्रुतः ॥ ६२ ॥

Digitized by Google

तेनाभिसृष्टा ब्रह्मर्षे ग्रामा क्षेत्रे सगोकुलाः ।
पूजार्थमृष्यशृङ्गस्य विभाण्डकसुतस्य वै ॥ ६३ ॥
एवमुक्तस्तु स ऋषिर्दृष्ट्वा वै ध्यानचक्षुषा ।
भविष्यमेव तज्ज्ञात्वा प्रीतात्मा स न्यवर्तत ॥ ६४ ॥
ऋषिपुत्रो ऽपि धर्मात्मा नौयानवरमास्थितः ।
मेघनादेन महता कृत्वा सतिमिरं नभः ॥ ६५ ॥
महाजलौघवर्षेण राजधानीमुपाययौ ।
वर्षेणैवागतं विप्रं स हि मत्वा नराधिपः ॥ ६६ ॥
प्रत्युद्गम्यार्चयांचक्रे शिरसा च महीं ययौ ।
अर्घ्यं च प्रददौ तस्मै पुरस्कृत्य पुरोहितं ॥ ६७ ॥
सान्तःपुरजनश्चैनं प्रपेदे सान्त्वयन्निव ।
महार्हैश्चेप्सितैर्भोगैर्युयोजैनं प्रसादयन् ॥ ६८ ॥
स्वयं चोपचचारैनं मन्युर्मास्म भवेदिति ।
ददौ कन्यां तदा चास्मै भार्यां कमललोचनां ॥ ६९ ॥
एवं स न्यवसत् तत्र तेन राज्ञाभिपूजितः ।
ऋष्यशृङ्गो महातेजाः शान्तया सह भार्यया ॥ ७० ॥

इति बालकाण्डे ऋष्यशृङ्गोपाख्यानं नाम नवमः सर्गः
॥ ९ ॥

Digitized by Google

## CAPUT X.

## RISHYASRINGAE ARCESSITUS.

भूय एव च राजेन्द्र शृणु मे वचनं हितं ।
यथा स देवप्रवरः कथयामास धर्मवित् ॥ १ ॥
इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः ।
नाम्ना दशरथो राजा श्रीमान् सत्यप्रतिश्रवः ॥ २ ॥
सख्यं तस्याङ्गराजेन भविष्यति महात्मनः ।
कन्या चास्य महाभागा शान्ता नाम भविष्यति ॥ ३ ॥
अपुत्रस्त्वङ्गराजो वै लोमपाद इति श्रुतः ।
स राजानं दशरथं प्रार्थयिष्यति भूमिपः ॥ ४ ॥
अनपत्यो ऽस्मि मे कन्यां सखे दातुं त्वमर्हसि ।
शान्तां शान्तेन मनसा पुत्रार्थं वरवर्णिनीं ॥ ५ ॥
श्रुत्वा दशरथो वाक्यं प्रकृत्या करुणात्मकः ।
दास्यते तां तदा कन्यां शान्तामङ्गाधिपाय सः ॥ ६ ॥
प्रतिगृह्य च तां कन्यां स राजा विगतज्वरः ।
स्वपुरं यास्यति प्रीतः कृतार्थेनान्तरात्मना ॥ ७ ॥
तां कन्यामृष्यशृङ्गाय प्रदास्यति स पार्थिवः ।
ऋष्यशृङ्गो ऽपि च प्रीतो लब्ध्वा भार्यां भविष्यति ॥ ८ ॥
तं च राजा दशरथो यष्टुकामः कृताञ्जलिः ।
ऋष्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ॥ ९ ॥

Digitized by Google

यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः ।
लप्स्यते स ततः काममृषिपुत्राद्विशांपतिः ॥ १० ॥
पुत्राश्चास्य भविष्यन्ति चत्वारो ऽमितविक्रमाः ।
वंशप्रतिष्ठानकराः सर्वलोकेषु विश्रुताः ॥ ११ ॥
एवं स देवर्षिवरो भविष्यमिदमुक्तवान् ।
सनत्कुमारो भगवान् पुरा मुनिसमागमे ॥ १२ ॥
स त्वं पुरुषशार्दूल समानय सुसत्कृतं ।
विभाण्डकसुतं गत्वा वरयित्वात्मनो गुरुं ॥ १३ ॥
इति श्रुत्वा दशरथः सुमन्त्रस्य सुमन्त्रितं ।
स वशिष्ठमुपागम्य ततो वचनमब्रवीत् ॥ १४ ॥
सुमन्त्रो ऽयं वदत्येवमनुज्ञां दातुमर्हसि ।
वशिष्ठो ऽपि च तच्छ्रुत्वा तथेति प्रत्यपद्यत ॥ १५ ॥
सो ऽनुज्ञातो वशिष्ठेन राज्ञा सुप्रीतमानसः ।
सान्तःपुरः सहामात्यः प्रययौ यत्र स द्विजः ॥ १६ ॥
वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ।
लोमपादपुरीं प्राप्य प्रविवेश सुपूजितः ॥ १७ ॥
आसाद्य तं द्विजश्रेष्ठं लोमपादनिवेसने ।
ऋषिपुत्रं ददर्शासौ दीप्यमानमिवानलं ॥ १८ ॥
ततो राज्ञा लोमपादः पूजां तस्य चकार ह ।
सखित्वात् तस्य भूपस्य प्रहृष्टेनान्तरात्मना ॥ १९ ॥

Digitized by Google

एवं सुसत्कृतस्तेन सहोषित्वा नरर्षभः ।
सप्ताष्टदिवसं यावद्राजानमिदमब्रवीत् ॥ २० ॥
शान्ता तव सुता वीर सह भर्त्रा विशांपते ।
मदीयं नगरं यातु कार्यं हि महदुद्यतं ॥ २१ ॥
तथेति राजा संश्रुत्य गमनं तस्य धीमतः ।
लोमपादो ऽगमद्धन्तुमृषिपुत्राय धीमते ॥ २२ ॥
साख्यं संबन्धकं चैव सर्वं तत् प्रत्यवेदयत् ।
अयं राजा दशरथः सखा मे दयितो भृशं ॥ २३ ॥
अनेन मे ऽनपत्याय दत्तेयं वरवर्णिनी ।
याचते पुत्रकामाय शान्ता प्रियतमात्मजा ॥ २४ ॥
सो ऽयं ते श्वशुरो ब्रह्मन् यथैवाहं तथा नृपः ।
शरणं त्वामनुप्राप्तः पुत्रार्थी द्विजसत्तम ॥ २५ ॥
पुत्रकाममिमं तात त्वं याजयितुमर्हसि ।
तारयैनमितो गत्वा शान्तया सह भार्यया ॥ २६ ॥
ऋषिपुत्रो ऽपि तच्छ्रुत्वा तथेत्याह नृपं तदा ।
नृपेण चाप्यनुज्ञातः प्रययौ सह भार्यया ॥ २७ ॥
तावन्योन्याञ्जलिं कृत्वा स्नेहात् संश्लिष्य चोरसा ।
ननन्दतुर्दशरथो लोमपादश्च वीर्यवान् ॥ २८ ॥
अथ राजा दशरथः पुरुषान् आप्तकारिणः ।
स्वपुरं प्रेषयामास प्रियाख्यानपुरःसरान् ॥ २९ ॥



Digitized by Google

क्रियतां मे पुरं शीघ्रं सर्वतः समलंकृतं ।
धूपितं सिक्तसंमृष्टं पताकाभिरलंकृतं ॥ ३० ॥
ततः प्रहृष्टाः पौरास्ते श्रुत्वा राजानमागतं ।
तथा चक्रुर्यथाज्ञप्तं पुरे यत्नमशेषतः ॥ ३१ ॥
ततः स्वलंकृतं राजा नगरं प्रविवेश ह ।
शङ्खदुन्दुभिनिर्घोषैः पुरस्कृत्य द्विजर्षभं ॥ ३२ ॥
ततो मुमुदिरे पौरा दृष्ट्वा राजानमागतं ।
सहितमृषिपुत्रेण ज्वलितानलवर्चसा ॥ ३३ ॥
तमृष्यशृङ्गं स्वपुरं प्रवेश्य नृपतिस्तदा ।
कृतकृत्यमिवात्मानं मेने पूर्णमनोरथः ॥ ३४ ॥
अन्तःपुरजनश्चापि दृष्ट्वा शान्तामुपागतां ।
मुमुदे ऽपूजयच्चैनां सह भर्त्रा विलासिनीं ॥ ३५ ॥
संपूज्यमानः स्तुतिभिर्यथा राजा विशेषतः ।
उवास तत्र सुसुखं कंचित् कालं द्विजर्षभः ॥ ३६ ॥
उपास्यमानः शुशुभे शान्तया दिव्यरूपया ।
अरुन्धतीसहायो वा वशिष्ठो ब्रह्मणः सुतः ॥ ३७ ॥

इति बालकाण्डे ऋष्यशृङ्गागमनं नाम दशमः सर्गः
॥ १० ॥

164
37
201

## CAPUT XI.

### CONSILIUM DE SACRIS FACIUNDIS.

अथ काले व्यतिक्रान्ते शिशिरे तदनन्तरं ।
वसन्तसमये प्राप्ते राजा यष्टुं मनो दधे ॥ १ ॥
ततः प्रसाद्य शिरसा तं विप्रं देववर्चसं ।
यज्ञाय वरयामास संतानार्थं कुलस्य वै ॥ २ ॥
तथेति च स राजानमुक्त्वा भूयो ऽभ्यभाषत ।
संभारयाशु नृपते संभारान् यज्ञसाधकान् ॥ ३ ॥
ततो राजाब्रवीद्वाक्यं सुमन्त्रमभितः स्थितं ।
शीघ्रमानय मे सूत गुरून् सर्वानशेषतः ॥ ४ ॥
स राजवचनाच्चापि सुमन्त्रस्त्वरितस्तदा ।
आनयामास तान् सर्वान् ब्राह्मणान् वेदपारगान् ॥ ५ ॥
सुयज्ञं वामदेवं च जावालिमथ काश्यपं ।
पुरोहितं वशिष्ठं च ये चाप्यन्ये द्विजोत्तमाः ॥ ६ ॥
तान् आगतान् पूजयित्वा राजा दशरथस्तदा ।
इदं धर्मार्थसहितं वचनं श्लक्ष्णमब्रवीत् ॥ ७ ॥
मम तातप्यमानस्य पुत्रार्थं नास्ति वै सुखं ।
तदहं हयमेधेन यजेयमिति मे मतिः ॥ ८ ॥

Digitized by Google

तदर्थं यष्टुमिच्छामि हयपूर्वेण कर्मणा ।
ऋषिपुत्रप्रभावेण भवतां चापि तेजसा ॥ ९ ॥
ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन् ।
वशिष्ठप्रमुखाः सर्वे प्रशशंसुश्च तं नृपं ॥ १० ॥
सर्वथा प्राप्स्यसे पुत्रान् ईप्सितान् परमद्युतीन् ।
यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ॥ ११ ॥
ततः प्रीतोऽभवद्राजा श्रुत्वेतद्द्विजभाषितं ।
सुमन्त्रप्रभृतींश्चैवमब्रवीन्मन्त्रिसत्तमान् ॥ १२ ॥
संभाराः संभ्रियन्तां मे गुरूणां वचनादिह ।
समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यतां ॥ १३ ॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयतां ।
शान्तयश्चापि वर्तन्तां यथाकल्पं यथाविधि ॥ १४ ॥
शक्यः कर्तुमयं यज्ञो सर्वेणापि महीक्षिता ।
नापराधो भवेत् कष्टो यद्यस्मिन् क्रतुसत्तमे ॥ १५ ॥
छिद्रं हि मृगयन्तेऽत्र यज्ञघ्ना ब्रह्मराक्षसाः ।
विघ्ने तु तस्य यज्ञस्य कर्ता सद्यो विनश्यति ॥ १६ ॥
तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते ।
तथा विधानं क्रियतां समर्थाः करणेष्विति ॥ १७ ॥
तथेति च नृपस्याज्ञां मन्त्रिणः प्रतिगृह्य ते ।
यथाज्ञप्तमशेषेण चक्रुर्नृपतिशासनं ॥ १८ ॥

Digitized by Google

ततो द्विजास्ते राजानमामन्त्र्य प्रतिपूज्य च ।
अविघ्नमस्त्वित्युक्त्वा च प्रतिजग्मुर्यथागतं ॥ १९ ॥
ततः स गत्वा ताः पत्नीर्नरेन्द्रो हृदयंगमाः ।
उवाच दीक्षां विशत यक्ष्येऽहं सुतकारणात् ॥ २० ॥
तासां तेनातिकान्तेन वचनेन सुवर्चसां ।
मुखपद्मान्यशोभन्त पद्मानीव हिमात्यये ॥ २१ ॥

इति बालकाण्डे यज्ञकर्मचिन्ता नाम एकादशः सर्गः
॥ ११ ॥

---

## CAPUT XII.

### SACRIFICIUM INCHOATUM.

पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् ।
प्रसवार्थं गतो यष्टुं हयमेधेन वीर्यवान् ॥ १ ॥
अभिवाद्य वशिष्ठं च न्यायतः प्रतिपूज्य च ।
अब्रवीत् प्रसृतं वाक्यं प्रसवार्थं नराधिपः ॥ २ ॥
यज्ञो मे क्रियतां ब्रह्मन् यथाशास्त्रमनुष्ठितः ।
यथा न विघ्नः क्रियते यज्ञघ्नेनेह केनचित् ॥ ३ ॥

Digitized by Google

भवान् स्निग्धः सुहृच्चैव गुरुश्च परमो मम ।
वोढव्यो भवता चैष भारो यज्ञार्थमुद्यतः ॥ ४ ॥
तथेति च स राजानमब्रवीद्द्विजसत्तमः ।
करिष्ये सर्वमेवैतद्भवतो यदभीप्सितं ॥ ५ ॥
ततोऽब्रवीद्द्विजान् वृद्धान् यज्ञकर्मसु निष्ठितान् ।
स्थापत्य इह स्थाप्यन्तां वृद्धाः परमधार्मिकाः ॥ ६ ॥
कर्मान्तिका लेपकरा वर्द्धकाः खनका अपि ।
गणकाः शिल्पिनश्चान्ये तथैव नटनर्तकाः ॥ ७ ॥
ततोऽब्रवीच्छास्त्रविदः पुरुषान् सुबहुश्रुतान् ।
यज्ञकर्म समीहन्तां भवन्तो राजशासनात् ॥ ८ ॥
इष्टिं च बहुसाहस्रीं शीघ्रं चाह्वयत द्विजान् ।
उपकार्याः क्रियन्तां च राज्ञां बहुगुणान्विताः ॥ ९ ॥
ब्राह्मणावसथाश्चैव कर्तव्याः शतशः शुभाः ।
भक्ष्यान्नपानैर्बहुभिः समुपेताः सुनिष्ठिताः ॥ १० ॥
वाजिवारणशालाश्च तथा शय्यागृहाणि च ।
भटानां महदावासा वैदेशिकनिवासिनां ॥ ११ ॥
तथा पौरजनस्यापि कर्तव्या बहुविस्तराः ।
आवासा बहुभक्ष्यान्नाः सर्वकामैरुपस्थिताः ॥ १२ ॥
तथा जानपदं चैव कर्तव्यं बहुभोजनं ।
दातव्यमन्नं विविधं सत्कृत्य न तु पीडया ॥ १३ ॥

Digitized by Google

सर्वे वर्णा यथा पूजां प्राप्नुवन्ति सुसत्कृताः ।
नापमानः प्रयोक्तव्यः कामक्रोधकृतः क्वचित् ॥ १४ ॥
यज्ञकर्मसु ये चाग्र्याः पुरुषाः शिल्पिनस्तथा ।
तेषामपि विशेषेण पूजा कार्या यथाक्रमं ॥ १५ ॥
यथा सर्वं सुविहितं न किंचित् परिहीयते ।
तथा भवन्तः कुर्वन्तु प्रीतिस्निग्धेन चेतसा ॥ १६ ॥
ततः सर्वे समागम्य वशिष्ठमिदमब्रुवन् ।
यथोक्तं तत् करिष्यामो न किंचित् परिहास्यते ॥ १७ ॥
ततः सुमन्त्रमाहूय वशिष्ठो वाक्यमब्रवीत् ।
निमन्त्रयस्व नृपतीन् पृथिव्यां ये च धार्मिकाः ॥ १८ ॥
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चैव सहस्रशः ।
समानयस्व सत्कृत्य सर्वदेशेषु मानवान् ॥ १९ ॥
मिथिलाधिपतिं शूरं जनकं दृढविक्रमं ।
निष्ठितं सर्वशास्त्रेषु तथा वेदेषु निष्ठितं ॥ २० ॥
तमानय महाभागं स्वयमेव सुसत्कृतं ।
पूर्वं संबन्धकं ज्ञात्वा ततो वाक्यं ब्रवीमि ते ॥ २१ ॥
तथा काशीपतिं स्निग्धं सततं प्रियवादिनं ।
वयस्यं राजसिंहस्य तमानय यशस्विनं ॥ २२ ॥
तथा केकयराजानं वृद्धं परमधार्मिकं ।
श्वशुरं राजसिंहस्य सपुत्रं त्वमिहानय ॥ २३ ॥

Digitized by Google

अङ्गेश्वरं च राजानं लोमपादं सुसत्कृतं ।
सुव्रतं देवसंकाशं स्वयमेवानयस्व ह ॥ २४ ॥
प्राच्यांश्च सिन्धुसौवीरान् सौराष्ट्रेयांश्च पार्थिवान् ।
दाक्षिणात्यान् नरेन्द्रांश्च सर्वान् आनय मा चिरं ॥ २५ ॥
सन्ति स्निग्धाश्च ये ऽन्ये ऽपि राजानः पृथिवीतले ।
तान् इहानय वै क्षिप्रं सानुगान् सहबान्धवान् ॥ २६ ॥
वशिष्ठवाक्यं तच्छ्रुत्वा सुमन्त्रस्त्वरितस्तदा ।
व्यादिशत् पुरुषांस्तत्र राज्ञामानयने बहून् ॥ २७ ॥
स्वयमेव हि धर्मात्मा प्रययौ मुनिशासनात् ।
सुमन्त्रः प्रयतो भूत्वा समानेतुं महीक्षितः ॥ २८ ॥
ततः कर्मान्तिकाः सर्वे वशिष्ठाय महर्षये ।
सर्वं निवेदयन्ति स्म यज्ञे यदुपकल्पितं ॥ २९ ॥
ततः प्रीतो द्विजश्रेष्ठस्तान् सर्वान् पुनरब्रवीत् ।
भवद्भिर्न यथा यज्ञे परिहीयेत किंचन ॥ ३० ॥
नावज्ञया प्रदातव्यं किंचिद्वा केनचित् क्वचित् ।
अवज्ञया हि यद्दत्तं दातुस्तद्दोषमावहेत् ॥ ३१ ॥
ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः ।
बहूनि रत्नान्यादाय राज्ञो दशरथस्य ह ॥ ३२ ॥
ततो वशिष्ठः सुप्रीतो राजानमिदमब्रवीत् ।
उपयाता नरव्याघ्र राजानस्तव शासनात् ॥ ३३ ॥

Digitized by Google

मयापि सत्कृताः सर्वे यथार्हं पूजिताश्च ते ।
यथावत् संभृतं सर्वं पुरुषैः सुसमाहितैः ॥ ३४ ॥
निर्यातु च भवान् यष्टुं यज्ञायतनमन्तिकं ।
सर्वकामैरुपहृतैरुपेतं वै समन्ततः ॥ ३५ ॥
तदा वशिष्ठवचनादृष्यशृङ्गस्य चोभयोः ।
दिवसे शुभनक्षत्रे निर्यातो जगतीपतिः ॥ ३६ ॥
ततो वशिष्ठप्रमुखाः सर्व एव द्विजातयः ।
अश्वमेधं पुरस्कृत्य कर्माण्यारेभिरे तदा ॥ ३७ ॥

इति बालकाण्डे यज्ञारम्भो नाम द्वादशः सर्गः ॥ १२ ॥

---

## CAPUT XIII.

### SACRIFICII EQUINI CONSUMMATIO.

अथ संवत्सरे पूर्णे प्राप्ते तस्मिंस्तुरंगमे ।
सरय्वा उत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत ॥ १ ॥
ऋष्यशृङ्गं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः ।
अश्वमेधे महायज्ञे राज्ञस्तस्य महात्मनः ॥ २ ॥
कर्म कुर्वन्ति विधिवद्याजका वेदपारगाः ।
यथाविधि यथान्यायं परिक्रामन्ति शास्त्रतः ॥ ३ ॥

Digitized by Google

प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं द्विजाः ।
चक्रुश्च विधिवत् सर्वं तथैवोद्वास्यकर्म ते ॥ ४ ॥
अभिष्टुत्य ततो हृष्टाः सर्वे चक्रुर्यथाविधि ।
प्रातःसवनपूर्वाणि कर्माणि मुनिपुंगवाः ॥ ५ ॥
ऐन्द्रश्च विधिवद्दत्तो राज्ञा चाभिष्टुतो ऽनघः ।
माध्यन्दिनं च सवनं प्रावर्तत यथाक्रमं ॥ ६ ॥
तृतीयं सवनं चैव राज्ञो ऽस्य सुमहात्मनः ।
चक्रुस्ते शास्त्रतो दृष्ट्वा तथा ब्राह्मणपुंगवाः ॥ ७ ॥
आह्वयांचक्रिरे तत्र शक्रादीन् विबुधोत्तमान् ।
ऋष्यशृङ्गादयो मन्त्रैः शिक्षाक्षरसमन्वितैः ॥ ८ ॥
गीतिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्हतः ।
होतारो ददुरावाह्य हविर्भागान् दिवौकसां ॥ ९ ॥
नाप्राहुतमभूत् तत्र स्खलितं वापि किंचन ।
दृश्यते ब्रह्मवत् सर्वं क्षेमयुक्तं हि चक्रिरे ॥ १० ॥
न तेष्वहःसु श्रान्तो वा क्षुधितो वापि दृश्यते ।
तिर्यक्ष्वपि कुतो ऽन्येषु भूतेष्वपरितर्पितं ॥ ११ ॥
अनाथानां तथा स्त्रीणां बालवृद्धस्य चैव हि ।
बुभुक्षितानां दीनानां नातृप्तिरुपलभ्यते ॥ १२ ॥
तापसा भुञ्जते नित्यं भुञ्जते श्रमणा अपि ।
व्यश्रूयत च शब्दो ऽयं दीयतां भुज्यतामिति ॥ १३ ॥

Digitized by Google

दीयतां दीयतामन्नं वासांसि विविधानि च ।
इति संचोदितास्तत्र तथा चक्रुरतन्द्रिताः ॥ १४ ॥
अन्नकूटाश्च दृश्यन्ते बहवः पर्वतोपमाः ।
दिवसे दिवसे क्लृप्ता व्यञ्जनानां ह्रदास्तथा ॥ १५ ॥
नानादेशादनुप्राप्ताः पुरुषाः स्त्रीगणास्तथा ।
अन्नपानैः सुविहितास्तस्मिन् यज्ञे महात्मनः ॥ १६ ॥
ब्राह्मणानां सहस्राणि तानि तत्र महामखे ।
पृथग्बुभुजिरे ऽन्नानि स्वादूनि विविधानि च ॥ १७ ॥
रुक्मपात्रीष्वनेकासु राजतीषु च सर्वशः ।
द्विजातयो ऽन्नपानानि तत्राभुञ्जत चासकृत् ॥ १८ ॥
स्वलंकृताश्च पुरुषा ब्राह्मणान् पर्यवेषयन् ।
सुप्रीतमनसः सर्वे सुमृष्टमणिकुण्डलाः ॥ १९ ॥
अन्नं हि विधिवत् स्वादु प्रशंसन्ति द्विजर्षभाः ।
अहो तृप्ताः स्म भद्रं त इति शुश्राव राघवः ॥ २० ॥
कर्मान्तरे तदा विप्रा हेतुवादान् बहून् अपि ।
प्राहुः सुवाग्मिनो धीराः परस्परजिगीषवः ॥ २१ ॥
दिवसे दिवसे तत्र संस्तरे कुशला द्विजाः ।
सर्वकर्माणि चक्रुस्ते यथाशास्त्रं प्रचोदिताः ॥ २२ ॥
नाषडङ्गविदत्रासीन्नाव्रतो नाबहुश्रुतः ।
सदस्यस्तस्य वै राज्ञो नावादकुशलो द्विजः ॥ २३ ॥

Digitized by Google

प्राप्ते यूपोच्छ्रये तस्मिन् षड् वैल्वाः खादिरास्त्र षट् ।
तावन्त एव पालाशास्तथैवौडुम्बरः पृथक् ॥ २४ ॥
श्लेष्मातकमयश्चैको देवदारुमयस्तथा ।
द्वावास्तां तत्र विहितौ बाहुभ्यामपरिग्रहौ ॥ २५ ॥
कारिताः सर्व एवैते शास्त्रज्ञैर्यज्ञकोविदैः ।
शोभार्थं तस्य यज्ञस्य काञ्चनाकृतयोऽभवन् ॥ २६ ॥
एकविंशति यूपास्ते एकविंशत्यरत्नयः ।
वस्त्रैरेकविंशद्भिरेकैकं समलंकृताः ॥ २७ ॥
विन्यस्ता विधिवत् सर्वे शिल्पिभिः सुदृढाः कृताः ।
अष्टाश्रयाः सर्व एव श्लक्ष्णारूपसमन्विताः ॥ २८ ॥
आछादितास्ते वस्त्रैः पुष्पैर्गन्धैश्च पूजिताः ।
सप्तर्षयो दीप्तिमन्तो विराजन्ते यथा दिवि ॥ २९ ॥
स चैत्यो राजसिंहस्य संचितः कुशलैः द्विजैः ।
गरुडो रुक्मपक्षो वै त्रिगुणोऽष्टादशात्मकः ॥ ३० ॥
नियुक्तास्तत्र पशवस्तास्ता उद्दिश्य देवताः ।
जलचराः स्थलचरा अन्तरीक्षचरास्तथा ॥ ३१ ॥
पतङ्गाः पक्षिणश्चैव तथा वनचराश्च ये ।
नानासरीसृपाश्चैव नानौषध्यः प्रकल्पिताः ॥ ३२ ॥
ऋषभाः सर्व एवेति नियुक्ताः शास्त्रतस्तथा ।
पशूनां त्रिशतं त्वासीद्यूपेषु नियतं तदा ॥ ३३ ॥

Digitized by Google

अश्वरत्नं च तत्रैव प्रोक्षितं वैश्वदेविकं ।
कौशल्या तं हयं तत्र परिगम्य प्रदक्षिणं ॥ ३४ ॥
सम्यगभ्यर्चयांचक्रे गन्धमाल्यविभूषणैः ।
विषाणैर्विशशासैनं त्रिभिः परमया मुदा ॥ ३५ ॥
पतत्रिणा तदा सार्द्धं सुस्थितेन च चेतसा ।
अवसद्रजनीमेकां कौशल्या पुत्रकाम्यया ॥ ३६ ॥
होताध्वर्युस्तथोद्गाता हयेन समयोजयन् ।
महिष्याः परिवृत्त्यर्थमुपोढामपरां तथा ॥ ३७ ॥
तमश्वमुपतिष्ठन्त्याः कौशल्यायास्तदा द्विजाः ।
ऋष्यशृङ्गादयः प्रीताः प्रायुञ्जन्त तदाशिषः ॥ ३८ ॥
पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः ।
ऋत्विक् परमसंपन्नः श्रपयामास शास्त्रतः ॥ ३९ ॥
धूमगन्धं वपायास्तु जिघ्रति स्म नराधिपः ।
यथाकालं यथान्यायं निर्णुदन् पापमात्मनः ॥ ४० ॥
हयस्य यानि चाङ्गानि कल्पितानि विभागशः ।
अग्नौ प्राश्यन्ति विधिवत् समस्ताः षोडशर्त्विजः ॥ ४१ ॥
प्लक्षशाखासु यज्ञानामन्येषां क्रियते हविः ।
अश्वमेधस्य चैकस्य वैतसो भाग इष्यते ॥ ४२ ॥
त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः ।
चतुष्टोममहस्तस्य प्रथमं परिकल्पितं ॥ ४३ ॥

Digitized by Google

उक्थ्यं द्वितीयं संख्यातमतिरात्रं तथोत्तरं ।
विचारास्तत्र बहवो विहिताः शास्त्रदर्शनात् ॥ ४४ ॥
ज्योतिष्टोमायुषी चैव अतिरात्रे विनिर्मिते ।
अभिजिद्विश्वजिच्चैवमप्तोर्यामो महाक्रतुः ॥ ४५ ॥
क्रतुं समाप्य तु तदा न्यायतः पुरुषर्षभः ।
ऋत्विग्भ्यः प्रददौ राजा धरां तां कुलवर्धनः ॥ ४६ ॥
प्राचीं होत्रे ददौ स्फीतां दिशं बाहुबलार्जितां ।
अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणां दिशं ॥ ४७ ॥
उद्गात्रे च तथोदीचीं दक्षिणैषा विनिर्मिता ।
अश्वमेधे महायज्ञे स्वयंभुविहिते पुरा ॥ ४८ ॥
एवं दत्वा प्रहृष्टोऽभूत् श्रीमान् इक्ष्वाकुनन्दनः ।
ऋत्विजस्त्वब्रुवन् सर्वे राजानं गतकल्मषं ॥ ४९ ॥
भवान् एव महीं कृत्स्नामेको रक्षितुमर्हति ।
न भूम्या कार्यमस्माकं न हि शक्ताः स्म पालने ॥ ५० ॥
रताः स्वाध्यायकरणे वयं नित्यं हि भूमिप ।
निष्क्रयं किंचिदेवेह प्रयच्छतु भवान् इति ॥ ५१ ॥
गवां शतसहस्राणि दश तेभ्यो ददौ नृपः ।
दश कोटीः सुवर्णस्य रजतस्य चतुर्गुणं ॥ ५२ ॥
ऋत्विजस्तु ततः सर्वे प्रददुः सहिता वसु ।
ऋष्यशृङ्गाय मुनये वशिष्ठाय च धीमते ॥ ५३ ॥

Digitized by Google

दक्षिणाः परिगृह्याथ सुप्रीतमनसा द्विजाः ।
ऊचुर्दशरथं तत्र कामं ध्यायेति वै तदा ॥ ५४ ॥
ततोऽब्रवीदृष्यशृङ्गं राजा दशरथस्तदा ।
कुलस्य वर्धनं तत् तु कर्तुमर्हसि सुव्रत ॥ ५५ ॥
तथेति स च राजानमुवाच द्विजसत्तमः ।
भविष्यन्ति सुता राजंश्चत्वारस्ते कुलोद्वहाः ॥ ५६ ॥

इति बालकाण्डे अश्वमेधसमाप्तिर्नाम त्रयोदशः सर्गः
॥ १३ ॥

## CAPUT XIV.

### RATIO NECANDI RAVANAE EXCOGITATA.

मेधावी तु ततो ध्यात्वा स किंचिदिदमुत्तरं ।
लब्धसंज्ञस्ततस्तं तु वेदज्ञो नृपमब्रवीत् ॥ १ ॥
इष्टिं तेऽन्यां करिष्यामि पुत्रीयां पुत्रकारणात् ।
अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः ॥ २ ॥
ततः प्रचक्रमे कर्तुमिष्टिं कामसमृद्धये ।
तस्य राज्ञो हितान्वेषी विभाण्डकसुतो वशी ॥ ३ ॥

Digitized by Google

तत्र देवाः सगन्धर्वाः सिद्धाश्च मुनिभिः सह ।
भागप्रतिग्रहार्थं वै पूर्वमेव समागताः ॥ ४ ॥
ब्रह्मा सुरेश्वरः स्थाणुस्तथा नारायणः प्रभुः ।
इन्द्रश्च भगवान् साक्षान्मरुद्गणावृतस्तथा ॥ ५ ॥
अश्वमेधे महायज्ञे राज्ञस्तस्य महात्मनः ।
तत्र भागार्थिनो देवान् आगतान् सो ऽभ्ययाचत ॥ ६ ॥
अयं राजा दशरथः पुत्रार्थी तप्तवांस्तपः ।
इष्टवान् अश्वमेधेन भवतः श्रद्धयान्वितः ॥ ७ ॥
इष्टिं च पुत्रकामो ऽन्यां पुनः कर्तुं समुद्यतः ।
तदस्य पुत्रकामस्य प्रसादं कर्तुमर्हथ ॥ ८ ॥
अभियाचे स वः सर्वान् अस्यार्थे ऽहं कृताञ्जलिः ।
भवेयुरस्य चत्वारः पुत्रास्त्रैलोक्यविश्रुताः ॥ ९ ॥
ते तथेत्यब्रुवन् देवा ऋषिपुत्रं कृताञ्जलिं ।
माननीयो ऽसि नो विप्र राजा चैव विशेषतः ॥ १० ॥
प्राप्स्यते परमं काममेतयेष्ट्या नराधिपः ।
इत्युक्त्वान्तर्हिता देवास्ततः शक्रपुरोगमाः ॥ ११ ॥

ताः समेत्य यथान्यायं तस्मिन् सदसि देवताः ।
अब्रुवँल्लोककर्तारं ब्रह्माणं वचनं ततः ॥ १२ ॥

Digitized by Google

त्वत्प्रदिष्टवरो ब्रह्मन् रावणो नाम राक्षसः ।
सर्वान् नो बाधते दर्पान्महर्षींश्च तपोरतान् ॥ १३ ॥
त्वया ह्यस्य वरो दत्तः प्रीतेन भगवन् पुरा ।
देवदानवयक्षाणामबध्योऽसीति कामतः ॥ १४ ॥
मानयन्तश्च ते वाक्यं सर्वमस्य सहामहे ।
स बाधयति लोकांस्त्रीन् विहिंसन् राक्षसेश्वरः ॥ १५ ॥
देवर्षियक्षगन्धर्वान् असुरान् मानवांश्च सः ।
अतिक्रामति दुर्धर्षो वरदानेन मोहितः ॥ १६ ॥
न तत्र सूर्यस्तपति न भयाद्वाति मारुतः ।
नाग्निर्ज्वलति वै तत्र यत्र तिष्ठति रावणः ॥ १७ ॥
चलोर्मिमाली तं दृष्ट्वा समुद्रोऽपि न कम्पते ।
नष्टो वैश्रवणः स्थानात् तस्य वीर्येण पीडितः ॥ १८ ॥
तन्महन्नो भयं तस्माद्राक्षसाद्घोरदर्शनात् ।
बधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि ॥ १९ ॥
एवमुक्तः सुरैः सर्वैश्चिन्तयित्वा ततोऽब्रवीत् ।
हन्तायं विहितस्तस्य बधोपायो दुरात्मनः ॥ २० ॥
तेन गन्धर्वयक्षाणां देवदानवरक्षसां ।
अबध्यः स्यामिति प्रोक्तं तथेत्युक्तं च तन्मया ॥ २१ ॥
अवज्ञाय तु तद्रक्षो मानुषान् नान्वकीर्तयत् ।
तस्मात् स मानुषाद्बध्यो मृत्युर्नान्योऽस्य विद्यते ॥ २२ ॥



Digitized by Google

एतच्छ्रुत्वा प्रियं वाक्यं ब्रह्मणा समुदाहृतं ।
देवाः शक्रपुरोगास्ते हर्षिताः सर्वतोऽभवन् ॥ २३ ॥
एतस्मिन्नन्तरे विष्णुरुपयातो महाद्युतिः ।
शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः ॥ २४ ॥
वैनतेयं समारुह्य भास्करस्तोयदं यथा ।
तप्तहाटककेयूरो वन्द्यमानः सुरोत्तमैः ॥ २५ ॥
तमब्रुवन् सुराः सर्वे समभिष्टुत्य संनताः ।
आर्तानामसि लोकानामार्तिहा मधुसूदन ॥ २६ ॥
याचामहेऽतस्त्वामार्ताः शरणं नो भवाच्युत ।
ब्रूत किं करवाणीति विष्णुस्तान् अब्रवीद्वचः ॥ २७ ॥
इति तस्य वचः श्रुत्वा पुनरूचुरिदं सुराः ।
राजा दशरथो नाम तप्तवान् सुमहत् तपः ॥ २८ ॥
इष्टवांश्चाश्वमेधेन प्रजाकामः स चाप्रजाः ।
अस्मन्नियोगात् त्वं विष्णो तस्य पुत्रत्वमाप्नुहि ॥ २९ ॥
तस्य भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च ।
विष्णो पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधं ॥ ३० ॥
तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककण्टकं ।
अबध्यं दैवतैर्विष्णो समरे जहि रावणं ॥ ३१ ॥
स हि देवान् सगन्धर्वान् सिद्धांश्च ऋषिसत्तमान् ।
राक्षसो रावणो मूर्खो वीर्योत्सेकेन बाधते ॥ ३२ ॥

Digitized by Google

ऋषयश्च ततस्तेन गन्धर्वाप्सरसस्तथा ।
क्रीडन्तो नन्दनवने रौद्रेण विनिपातिताः ॥ ३३ ॥
त्वं गतिः परमा देव सर्वेषां नः परंतप ।
बधाय देवशत्रूणां नृणां लोके मनः कुरु ॥ ३४ ॥
स नियुक्तस्तथा देवैः साक्षान्नारायणः प्रभुः ।
तान् उवाच ततो देवान् इदं वचनमर्थवत् ॥ ३५ ॥
किं मया तत्र कर्तव्यं प्रादुर्भूतेन वः सुराः ।
कार्यं कुतो वापि भयं युष्माकमिदमीदृशं ॥ ३६ ॥
इति तस्य वचः श्रुत्वा विष्णोरूचुरिदं सुराः ।
राक्षसान्नो भयं विष्णो रावणाल्लोकरावणात् ॥ ३७ ॥
मानुषीं तनुमास्थाय समुद्धर्तुं त्वमर्हसि ।
त्वत्तो हि नान्यस्तं पापं शक्तो हन्तुं दिवौकसां ॥ ३८ ॥
स दीर्घं तप्तवान् कालं तपो ऽत्युग्रमरिंदम ।
तेनायं परितुष्टो ऽस्य बभूव प्रपितामहः ॥ ३९ ॥
ततो ऽस्मै प्रददौ तुष्टो वरदो भगवान् पुरा ।
अभयं सर्वभूतेभ्यो वर्जयित्वा तु मानुषान् ॥ ४० ॥
ततो दत्तवरस्यैवं तस्य नान्यत्र मानुषात् ।
बधाद्भयमतश्चैनं गत्वा मानुषतां जहि ॥ ४१ ॥
एवमुक्तस्तु देवेशो विष्णुस्त्रिदशपुंगवः ।
पितामहपुरोगांस्तान् सर्वलोकनमस्कृतः ॥ ४२ ॥

Digitized by Google

अब्रवीत् त्रिदशान् सर्वान् समेतान् धर्मसंस्थितान् ।
भयं त्यजत भद्रं वो हितार्थं युधि रावणं ॥ ४३ ॥
सपुत्रपौत्रं सामात्यं समन्त्रिज्ञातिबान्धवं ।
हत्वा क्रूरं दुराधर्षं देवर्षीणां भयावहं ॥ ४४ ॥
दश वर्षसहस्राणि दश वर्षशतानि च ।
वत्स्यामि मानुषे लोके पालयन् पृथिवीमिमां ॥ ४५ ॥
ततो देवर्षिगन्धर्वाः सरुद्राः साप्सरोगणाः ।
स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनं ॥ ४६ ॥

तमुद्धतं रावणमुग्रतेजसं
प्रवृद्धदर्पं त्रिदशेश्वरद्विषं ।
विरावणं साधुतपस्विकण्टकं
मनुष्यतामेत्य निहन्तुमर्हसि ॥ ४७ ॥

इति बालकाण्डे रावणबधोपायो नाम चतुर्दशः सर्गः
॥ १४ ॥

Digitized by Google

## CAPUT XV.

### NECTARIS APPARATUS.

एवं दत्वा वरं देवो देवानां विष्णुरात्मवान् ।
मानुषे चिन्तयामास जन्मभूमिमथात्मनः ॥ १ ॥
ततः पद्मपलाशाक्षः कृत्वात्मानं चतुर्विधं ।
पितरं रोचयामास तदा दशरथं नृपं ॥ २ ॥
स चाप्यपुत्रो नृपतिस्तस्मिन् काले महाद्युतिः ।
अयजत् पुत्रियामिष्टिं पुत्रेप्सुररिसूदनः ॥ ३ ॥
स कृत्वा निश्चयं विष्णुरामन्त्र्य च पितामहं ।
अन्तर्धानं गतो देवैः पूज्यमानो महर्षिभिः ॥ ४ ॥
तत्रास्य यजमानस्य पावकादतुलप्रभं ।
प्रादुर्भूतं महद्भूतं महावीर्यं महाबलं ॥ ५ ॥
कृष्णं रक्ताम्बरधरं रक्तास्यं दुन्दुभिस्वनं ।
स्निग्धहर्यक्षतनुजश्मश्रुप्रवरमूर्धजं ॥ ६ ॥
शुभलक्षणसंपन्नं दिव्याभरणभूषितं ।
शैलशृङ्गसमुत्सेधं दृप्तशार्दूलविक्रमं ॥ ७ ॥

Digitized by Google

दिव्याकरसमाकारं दीप्तानलसमाकरं ।
तप्तजाम्बूनदमयीं राजतान्तपरिच्छदां ॥ ८ ॥
दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियां ।
प्रगृह्य विपुलां दोर्भ्यां स्वयं मायामयीमिव ॥ ९ ॥
समवेक्ष्याब्रवीद्वाक्यमिदं दशरथं नृपं ।
प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप ॥ १० ॥
सान्तःपुरस्तदा राजा प्रत्युवाच कृताञ्जलिः ।
भगवन् स्वागतं ते ऽस्तु किमहं करवाणि ते ॥ ११ ॥
अथो पुनरिदं वाक्यं प्राजापत्यो नरो ऽब्रवीत् ।
राजन्नर्चयता देवान् अद्य प्राप्तं त्वया फलं ॥ १२ ॥
इदं तु नृपशार्दूल पायसं देवनिर्मितं ।
प्रजाकरं गृहाण त्वं धन्यमारोग्यवर्धनं ॥ १३ ॥
भार्याणामनुरूपाणामश्नीतेति प्रयच्छ वै ।
तासु त्वं लप्स्यसे पुत्रान् यदर्थं यजसे नृप ॥ १४ ॥
वाढमित्येवं नृपतिः शिरसा प्रतिगृह्य तां ।
पात्रीं देवान्नसंपूर्णां देवदत्तां हिरण्मयीं ॥ १५ ॥
अभिवाद्य च तद्भूतमद्भुतं प्रियदर्शनं ।
मुदा परमया युक्तश्चकाराभिप्रदक्षिणां ॥ १६ ॥
ततस्तदद्भुतप्रख्यं भूतं परमभास्वरं ।
संवर्तयित्वा तत् कर्म तत्रैवान्तरधीयत ॥ १७ ॥

Digitized by Google

ततो दशरथः प्राप्य पायसं देवनिर्मितं ।
बभूव परमप्रीतः प्राप्य वित्तमिवाधनः ॥ १८ ॥
हर्षरश्मिभिरुद्द्योतं तस्यान्तःपुरमाबभौ ।
शारदस्याभिरामस्य चन्द्रस्येव नभोऽंशुभिः ॥ १९ ॥
सोऽन्तःपुरं प्रविश्यैव कौशल्यामिदमब्रवीत् ।
पायसं प्रतिगृह्णीष्व पुत्रीयं त्विदमात्मनः ॥ २० ॥
कौशल्यायै नरपतिः पायसार्धं ददौ तदा ।
अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥ २१ ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ।
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमं ॥ २२ ॥
अनुचिन्त्य सुमित्रायै पुनरेव महीपतिः ।
एवं तासां ददौ राजा भार्याणां पायसं पृथक् ॥ २३ ॥
ताश्चैव पायसं प्राप्य नरेन्द्रस्योत्तमाः स्त्रियः ।
संतानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ॥ २४ ॥

ततो हविः प्राश्य तदुत्तमं स्त्रियः
स्वयं नृपेण प्रतिपादितं मुदा ।
हुताशनादित्यसमानतेजसः
क्रमेण गर्भान् उपलेभिरे शुभान् ॥ २५ ॥

Digitized by Google

ततः स राजा प्रतिवीक्ष्य ताः स्त्रियः
प्ररूढगर्भाः परितुष्टमानसः ।
बभूव हृष्टस्त्रिदिवे यथा हरिः
सुरेन्द्रसिद्धर्षिगणाभिपूजितः ॥ २६ ॥

इति बालकाण्डे पायसोत्पत्तिर्नाम पञ्चदशः सर्गः ॥ १५ ॥

## CAPUT XVI.

### SIMIORUM PROCREATIO.

पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः ।
उवाच देवान् आहूय स्वयंभूर्भगवान् इदं ॥ १ ॥
सत्यसंधस्य वीरस्य सर्वेषां नो हितैषिणः ।
विष्णोः सहायान् समरे सृजध्वं कामरूपिणः ॥ २ ॥
मायाविदश्च शूरांश्च वायुवेगसमान् जवे ।
नयज्ञान् बुद्धिसंपन्नान् विष्णुतुल्यपराक्रमान् ॥ ३ ॥

असंहार्यान् उपायज्ञान् दिव्यसंहननान्वितान् ।
सर्वास्त्रगुणसंपन्नान् अमृतप्राशनान् इव ॥ ४ ॥
अप्सरःसु च मुख्यासु गन्धर्वीणां तनूषु च ।
यक्षपन्नगकन्यासु तथा विद्याधरीषु च ॥ ५ ॥
किन्नरीणां च गात्रेषु वानरीणां तनूषु च ।
सृजध्वं हरिरूपेण पुत्रांस्तुल्यपराक्रमान् ॥ ६ ॥
पूर्वमेव मया सृष्टो जाम्बुवान् ऋक्षपुंगवः ।
जृम्भमाणस्य सहसा मम वक्त्रादजायत ॥ ७ ॥
ते तथोक्ता भगवता तत् प्रतिश्रुत्य शासनं ।
जनयामासुरेवं ते पुत्रान् वानररूपिणः ॥ ८ ॥
देवा महर्षिगन्धर्वास्तार्क्ष्या यक्षा यशस्विनः ।
चारणाश्च सुतान् वीरान् ससृजुर्वनचारिणः ॥ ९ ॥
नागाः किंपुरुषाश्चैव सिद्धविद्याधरोरगाः ।
बहवो जनयामासुर्हृष्टास्तत्र सहस्रशः ॥ १० ॥
वानरेन्द्रं महेन्द्राभमिन्द्रो बालिनमात्मजं ।
सुग्रीवं जनयामास तपनस्तपतां वरः ॥ ११ ॥
वृहस्पतिस्त्वजनयत् तारं नाम महाकपिं ।
सर्ववानरमुख्यानां बुद्धिमन्तमनुत्तमं ॥ १२ ॥
धनदस्य सुतः श्रीमान् वानरो गन्धमादनः ।
विश्वकर्मा त्वजनयन्नलं नाम महाकपिं ॥ १३ ॥

Digitized by Google

पावकस्य सुतः श्रीमान् नीलोऽग्निसदृशप्रभः ।
तेजसा यशसा वीर्यादत्यरिच्यत पावकं ॥ १४ ॥
रूपद्रविणसंपन्नावश्विनौ रूपसंमतौ ।
मैन्दं च द्विविदं चैव जनयामासतुः स्वयं ॥ १५ ॥
वरुणो जनयामास सुषेणं नाम वानरं ।
शरभं जनयामास पर्जन्यस्तु महाबलः ॥ १६ ॥
मारुतस्यौरसः श्रीमान् हनुमान् नाम वानरः ।
वज्रसंहननोपेतो वैनतेयसमो जवे ॥ १७ ॥
ते सृष्टा बहुसाहस्रा दशग्रीववधेप्सुभिः ।
अप्रमेयबला देवैर्वानराः कामरूपिणः ॥ १८ ॥
ते गजाचलसंकाशाः सिंहसंहननौजसः ।
ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे ॥ १९ ॥
यस्य देवस्य यद्रूपं यद्बलं यः पराक्रमः ।
तस्य तस्यैव सदृशः स स पुत्रो व्यजायत ॥ २० ॥
गोलांगुलीषु चोत्पन्नाः केचिदुन्नतविक्रमाः ।
ऋक्षीषु च तथा जाता वानराः किन्नरीषु च ॥ २१ ॥
शिलाप्रहरणाः सर्वे सर्वे पादपयोधिनः ।
नखदंष्ट्रायुधाः सर्वे सर्वे सर्वास्त्रकोविदाः ॥ २२ ॥
विचालयेयुः शैलेन्द्रान् भेदयेयुः स्थिरान् द्रुमान् ।
क्षोभयेयुश्च वेगेन समुद्रं सरितांपतिं ॥ २३ ॥

दारयेयुः क्षितिं पद्भ्यामाप्लवेयुर्महार्णवान् ।
नभस्तलं विशेयुश्च गृह्णीयुरपि तोयदान् ॥ २४ ॥
गृह्णीयुरपि मातङ्गान् मत्तान् प्रव्रजतो वने ।
नर्दमानाश्च नादेन पातयेयुर्विहंगमान् ॥ २५ ॥
ईदृशानां प्रसूतानि हरीणां कामरूपिणां ।
शतं शतसहस्राणि यूथपानां महात्मनां ॥ २६ ॥
ते प्रधाना प्रधानेषु यूथेषु हरियूथपाः ।
बभूवुर्यूथपश्रेष्ठा वीरांश्चाजनयन् हरीन् ॥ २७ ॥
ऋक्षराजं तु तत्रान्ये उपतस्थुर्वनौकसः ।
अतो नानाविधान् शैलान् काननानि च भेजिरे ॥ २८ ॥
सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च बालिनं ।
भ्रातरावुपतस्थुस्ते सर्व एव हरीश्वराः ॥ २९ ॥
ते तार्क्ष्यबलसंपन्नाः सर्वे युद्धविशारदाः ।
विचरन्तो ऽर्दयन् सर्वान् सिंहव्याघ्रमहोरगान् ॥ ३० ॥
तांश्च सर्वान् महाबाहुर्बाली विपुलविक्रमः ।
जुगोप भुजवीर्येण ऋक्षगोपुच्छवानरान् ॥ ३१ ॥
तैरियं पृथिवी शूरैः सपर्वतवनार्णवा ।
कीर्णा विविधसंस्थानैर्नानाव्यञ्जनलक्षणैः ॥ ३२ ॥

Digitized by Google

तैर्मेघवृन्दाचलतुल्यकायैर्-
महाबलैर्वानरयूथपालैः ।
बभूव भूर्भीमशरीररूपैः
समावृता रामसहायहेतोः ॥ ३३ ॥

इति बालकाण्डे वानरोत्पत्तिर्नाम षोडशः सर्गः ॥ १६ ॥

---

## CAPUT XVII.

### RISHYASRINGAE REDITUS.

समाप्ते तु क्रतौ तस्मिन् वाजिमेधे महात्मनः ।
हविर्भागान् अवाप्येष्टान् जग्मुर्देवा यथागतं ॥ १ ॥
ऋषयश्च महात्मानः प्रतिजग्मुः सुपूजिताः ।
राजानश्चैव ये तत्र क्रतावासन् समागताः ॥ २ ॥
तदानीं तान् अनुज्ञातुं सर्वान् एव प्रचक्रमे ।
प्रीतियुक्तेन मनसा राजा दशरथस्तदा ॥ ३ ॥
स्वं स्वं राष्ट्रं यथाकामं गच्छन्तु मनुजाधिपाः ।
प्रीतोऽहमस्मि भद्रं वः स्वस्ति प्राप्नुत मा चिरं ॥ ४ ॥

Digitized by Google

सर्वे भवन्तः पश्यन्तु कार्यं विषयरक्षणं ।
भ्रष्टो हि विषयाद्राजा मृतकल्पः प्रदृश्यते ॥ ५ ॥
तस्मात् स्वविषये रक्षा कर्तव्या भूतिमिच्छता ।
यज्ञैर्नावाप्यते स्वर्गो रक्षणात् प्राप्यते यथा ॥ ६ ॥
यथा हि पुरुषः कुर्यात् शरीरे यत्नमुत्तमं ।
वसनाद्यैरुपायैस्तु तथा राज्ये नराधिपः ॥ ७ ॥
अनागतविधानं च कर्तव्यं विषये नृपैः ।
आगमश्चापि कर्तव्यो यथा दोषो न जायते ॥ ८ ॥
एवं समादिशद्राज्ञो राजा श्रुत्वा च तन्नृपाः ।
अन्योन्यं संविदं कृत्वा प्रयाता सर्वतो दिशः ॥ ९ ॥
समाप्तदीक्षानियमः पत्नीगणसमन्वितः ।
संप्रहृष्टमना भूत्वा राजा दशरथस्तदा ॥ १० ॥
गतेषु पार्थिवेन्द्रेषु सभृत्यबलवाहनः ।
प्रविवेश पुरीं श्रीमान् पुरस्कृत्य द्विजोत्तमान् ॥ ११ ॥
ततः कालस्य महत ऋष्यशृङ्गः सुपूजितः ।
प्रययौ शान्तया सार्धं ब्राह्मणैश्च कृतात्मभिः ॥ १२ ॥
अन्वीयमानो राज्ञा वै सानुयात्रेण धीमता ।
वशिष्ठेन च धीरेण तथा पौरजनेन च ॥ १३ ॥
यानेन महता शान्ता कम्बलावततेन च ।
गोभिः श्वेतैः प्रयुक्तेन प्रेष्यवर्गान्वितेन च ॥ १४ ॥

संगृह्य धनं सुबहु मणिरत्नसमाविकं ।
विविधैश्चाप्यलंकारैर्भूषिता श्रीरिवापरा ॥ १५ ॥
मुदा परमयोपेता प्रययौ वरवर्णिनी ।
भर्तारमनुसंरक्ता पौलोमीव पुरंदरं ॥ १६ ॥
उषित्वा सुखवासं सा सर्वकामैः सुपूजिता ।
मानिता ज्ञातिभिश्चापि तथा स्त्रीभिश्च सर्वशः ॥ १७ ॥
श्राविता वनवासं च भर्त्रा सा तु शुभानना ।
तमेव मन्यते साधु तथापि सुखिता सती ॥ १८ ॥
सान्तःपुरो नृपश्चापि सो ऽन्वगच्छन्सहावृतं ।
ऋषिपुत्रं महाभागं शान्तां चैवात्मजां शुभां ॥ १९ ॥
ऋषिपुत्रस्य वचनात् ततो वासे प्रकल्पिते ।
सुखवासाः स्म गच्छन्ति सर्वकामैः सुपूजिताः ॥ २० ॥
ततो ऽभिगम्य राजानमृषिपुत्रः प्रतापवान् ।
समनुज्ञापयामास निवर्ततु भवान् इति ॥ २१ ॥
ऋषिपुत्रवचः श्रुत्वा राजा सान्तःपुरस्तदा ।
उच्चैः प्ररुदितस्तत्र वचनं चेदमब्रवीत् ॥ २२ ॥
कौशल्यां च सुमित्रां च कैकेयीं च यशस्विनीं ।
सर्वाः सुदृष्टां कुरुत शान्तां दुर्लभदर्शनां ॥ २३ ॥
तत आलिंग्य ताः सर्वाः शान्तां वाष्पाविलेक्षणाः ।
ऊचुः स्वस्त्ययनान्यस्य सभार्यस्य द्विजस्य ताः ॥ २४ ॥

वायुश्चाग्निश्च सोमश्च पृथिवी सरितो दिशः ।
वने रक्षन्तु सततं त्वां भर्तृव्रतचारिणीं ॥ २५ ॥
श्वशुरः पूजनीयस्ते स हि मान्यो विशेषतः ।
पूजाभिरनुकूलाभिरग्निशुश्रूषणादिभिः ॥ २६ ॥
भर्ता च पूजनीयस्ते सर्वावस्थास्वनिन्दिते ।
प्रियवादेन रहसि भर्ता स्त्रीणां हि दैवतं ॥ २७ ॥
प्रेषयिष्यति राजा तु कुशलार्थं तवानघे ।
ब्राह्मणान् नित्यशः पुत्रि मोत्सुका भूः कदाचन ॥ २८ ॥
एवं शान्तां समाश्वास्य मूर्ध्न्युपाघ्राय चासकृत् ।
न्यवर्तन्त ततः सर्वाः स्त्रियो राज्ञा प्रचोदिताः ॥ २९ ॥
प्रदक्षिणं द्विजश्रेष्ठं कृत्वा राजा स वीर्यवान् ।
व्यादिशत् सैनिकान् कांश्चिदृष्यशृङ्गाय धीमते ॥ ३० ॥
अभिवाद्य स राजानमुवाच द्विजसत्तमः ।
स्वस्ति तेऽस्तु महाराज धर्मेणाराधय प्रजाः ॥ ३१ ॥
एवमुक्त्वा स राजानं ययावृषिसुतस्तदा ।
तं यान्तमनुवव्राज स्थितो निश्चलचक्षुषा ॥ ३२ ॥
अदृश्यस्तु यदा विप्रस्तदा राजा न्यवर्तत ।
मनस्तस्मिन् समाधाय स्नेहभावसमन्वितः ॥ ३३ ॥
प्रविष्टः स्वपुरीं राजा नागरैश्चाभिनन्दितः ।
न्यवसत् तत्र मुदितः पुत्रजन्मप्रतीक्षकः ॥ ३४ ॥

Digitized by Google

ऋष्यशृङ्गोऽपि तेजस्वी प्रययौ क्रमशस्तदा ।
लोमपादस्य नगरीं चम्पां चम्पकमालिनीं ॥ ३५ ॥
श्रुत्वैव लोमपादोऽपि तमायान्तमृषिं तदा ।
सब्राह्मणः सहामात्यः प्रत्युद्गम्य तमब्रवीत् ॥ ३६ ॥
स्वागतं ते द्विजश्रेष्ठ दिष्ट्यासि कुशली प्रभो ।
इहागतो महाभाग सभार्यः सपरिच्छदः ॥ ३७ ॥
पिता ते कुशली ब्रह्मन् प्राहिणोन्नित्यशश्च सः ।
कुशलार्थं तव विभो सभार्यस्य विशेषतः ॥ ३८ ॥
स्वलंकृतं च नगरं कारयामास बुद्धिमान् ।
पूजार्थमृष्यशृङ्गस्य राजा हृष्टेन चेतसा ॥ ३९ ॥
ऋष्यशृङ्गः प्रहृष्टस्तु सह राज्ञा पुरोत्तमं ।
पुरोहितं पुरस्कृत्य पूजितः प्रविवेश ह ॥ ४० ॥
एवं स न्यवसत् तत्र द्विजपुत्रः प्रतापवान् ।
राज्ञा सान्तःपुरेणैव पूज्यमानो यथाक्रमं ॥ ४१ ॥

इति बालकाण्डे ऋष्यशृङ्गप्रतिगमनं नाम सप्तदशः सर्गः
॥ १७ ॥

4 21
41
462

## CAPUT XVIII.

### RISHYASRINGAE DISCESSUS IN SILVAM.

ऋष्यशृङ्गे तु संप्राप्ते राजा ब्राह्मणमब्रवीत् ।
ऋषेर्गच्छ समीपं त्वं निवेद्य च सुव्रतं ॥ १ ॥
आगतं परमोदारमृष्यशृङ्गं दुरासदं ।
ऋषये सुव्रताय त्वं काश्यपायात्मसंभवं ॥ २ ॥
अभिवाद्यैव शिरसा मत्कृते द्विजसत्तमं ।
प्रसादय सुतार्थं मे समारब्धं यथात्मना ॥ ३ ॥
श्रुत्वैव राज्ञो वचनं तदा स द्विजसत्तमः ।
जगाम तत्र यत्रासौ वर्तते काश्यपात्मजः ॥ ४ ॥
प्रसाद्य च द्विजश्रेष्ठं शिरसाभिप्रणम्य च ।
अब्रवीत् प्रश्रितं वाक्यं राज्ञा यदभिचोदितं ॥ ५ ॥
पुत्रस्ते समनुप्राप्तो यज्ञं कृत्वा महायशाः ।
राज्ञो दशरथस्यैष श्वशुरस्य महात्मनः ॥ ६ ॥
श्रुत्वा तु वचनं तस्य द्विजस्य सुमहायशाः ।
गमने मतिमाधत्त पुत्रस्यानयने तदा ॥ ७ ॥
स हि शिष्यवृतस्तत्र प्रयातो द्विजसत्तमः ।
संपूज्यमानो धर्मात्मा ग्रामैर्घोषैश्च सर्वशः ॥ ८ ॥



Digitized by Google

भक्ष्यभोज्यमुपादाय नरास्तं समुपागमन् ।
ऊचुः प्रणम्य शिरसा किं मुने करवामहे ॥ ९ ॥
तान् अब्रवीत् स विप्रेन्द्रः सर्वान् एव समागतान् ।
किमर्थं क्रियते पूजा श्रोतुमिच्छामि तत्त्वतः ॥ १० ॥
तत ऊचुर्महात्मानं संबन्धी ते नराधिपः ।
तस्याज्ञा क्रियते ब्रह्मन् व्येतु ते मनसो ज्वरः ॥ ११ ॥
श्रुत्वा तेषां तु वचनं मनःप्रह्लादनं शुभं ।
प्रसादमकरोद्राज्ञः सहामात्यपुरस्य सः ॥ १२ ॥
विभाण्डकवचः श्रुत्वा किंकरा हृष्टमानसाः ।
त्वरिता जग्मुराख्यातुं राज्ञः प्रियनिवेदिनः ॥ १३ ॥
तच्छ्रुत्वा वचनं तेषां प्रत्युद्गम्य नराधिपः ।
पुरोहितेन सहितः प्रगृह्यार्घ्यं समाद्रवत् ॥ १४ ॥
दृष्ट्वा तु मुनिशार्दूलं प्रणम्य च पुनः पुनः ।
अब्रवीद्राजशार्दूलो विभाण्डकमिदं वचः ॥ १५ ॥
अद्य मे सफलं जन्म दर्शनात् तव सुव्रत ।
. . . . . . . . . . . . . . . . . . ॥ १६ ॥
तथेति च स राजानमुवाच द्विजसत्तमः ।
मा भूद्भयं ते राजेन्द्र प्रसन्नोऽस्मि तवानघ ॥ १७ ॥
ततः प्रहृष्टो नृपतिः पुरस्कृत्य द्विजोत्तमं ।
प्राविशन्नगरीं श्रीमान् अर्चितः सर्वमङ्गलैः ॥ १८ ॥

Digitized by Google

अभिवाद्य पुनश्चैव न्यायतः प्रतिपूज्य च ।
तस्थुः प्राञ्जलयः सर्वे समासाद्य द्विजोत्तमं ॥ १९ ॥
ततः शान्तां पुरस्कृत्य ताः स्त्रियः समलंकृतां ।
न्यवेदयन्त विप्राय स्नुषेयं तव मानद ॥ २० ॥
प्रतिगृह्य स तां शान्तां समालिंग्य च धर्मवित् ।
अङ्के निवेश्य च तदा विस्मयं परमं गतः ॥ २१ ॥
द्विजोत्सङ्गात् समुत्थाय साभिवाद्य तदा द्विजं ।
आविशत् प्राञ्जलिर्भूत्वा श्वशुरस्य समीपतः ॥ २२ ॥
प्रायश्चित्तं च कृतवान् पुत्रस्य द्विजसत्तमः ।
महर्षिभिः पूज्यमानः ससुतश्च वनं ययौ ॥ २३ ॥

इति बालकाण्डे ऋष्यशृङ्गवनगमनं नाम अष्टादशः सर्गः
॥ १८ ॥

462
23
485

## CAPUT XIX.

### DASARATHIDARUM NATALES.

ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ।
ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ॥ १ ॥
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ।
ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ॥ २ ॥
प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतं ।
कौशल्याजनयद्रामं दिव्यलक्षणसंयुतं ॥ ३ ॥
कौशल्या शुशुभे तेन पुत्रेणामिततेजसा ।
यथाधिपेन देवानामदितिर्वज्रपाणिना ॥ ४ ॥
भवाय स हि लोकानां रावणस्य बधाय च ।
विष्णोर्वीर्यार्धतो जज्ञे रामो राजीवलोचनः ॥ ५ ॥
भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ।
साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥ ६ ॥
अथ लक्ष्मणशत्रुघ्नौ सुमित्राजनयत् सुतौ ।
दृढभक्ती महोत्साहौ विष्णोरर्धसमन्वितौ ॥ ७ ॥
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ।
सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ॥ ८ ॥

Digitized by Google

राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ।
गुणवन्तोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमाः ॥ ९ ॥
जगुः कलं च गन्धर्वा ननृतुश्चाप्सरोगणाः ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खात् पतत् ॥ १० ॥
उत्सवश्च महान् आसीदयोध्यायां जनाकुलः ।
रथ्याश्च जनसंबाधा नटनर्तकसंकुलाः ॥ ११ ॥
गायनैश्च विराविण्यो वादनैश्च तथापरैः ।
विरेजुर्विपुलास्तत्र सर्वरत्नसमन्विताः ॥ १२ ॥
प्रदेयांश्च ददौ राजा सूतमागधवन्दिनां ।
ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः ॥ १३ ॥
अतीत्यैकादशाहं तु नामकर्म तथाकरोत् ।
ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतं ॥ १४ ॥
सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा ।
वशिष्ठः परमप्रीतो नामानि कृतवांस्तदा ॥ १५ ॥
तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः ।
बभूव भूयो भूतानां स्वयंभूरिव संमतः ॥ १६ ॥
सर्वे वेदविदः शूराः सर्वे लोकहिते रताः ।
सर्वे ज्ञानोपसंपन्नाः सर्वे समुदिता गुणैः ॥ १७ ॥
तेषामपि महातेजा रामः सत्यपराक्रमः ।
इष्टः सर्वस्य लोकस्य शशाङ्क इव निर्मलः ॥ १८ ॥

Digitized by Google

गजस्कन्धेऽश्वपृष्ठे च रथचर्यासु संमतः ।
धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः ॥ १९ ॥
बाल्यात् प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः ।
रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः ॥ २० ॥
सर्वप्रियकरस्तस्य रामस्यापि शरीरतः ।
लक्ष्मणो लक्ष्मिसंपन्नो बहिःप्राण इवापरः ॥ २१ ॥
न च तेन विना निद्रां लभते पुरुषोत्तमः ।
मिष्टमन्नमुपानीतमश्नाति न हि तं विना ॥ २२ ॥
यदा हि हयमारूढो मृगयां याति राघवः ।
अथैनं पृष्ठतोऽभ्येति सधनुः परिपालयन् ॥ २३ ॥
भरतस्यापि शत्रुघ्नो रामस्येव हि लक्ष्मणः ।
प्राणैः प्रियतरो भ्राता तस्यापि स तथाभवत् ॥ २४ ॥
ते ख्यातयशसः सर्वे परस्परहिते रताः ।
तुष्टिमुत्पादयांचक्रुः पितुर्विनयपौरुषैः ॥ २५ ॥
स चतुर्भिर्महाभागैः पुत्रैर्दशरथो नृपः ।
लोकपालैरिव बभौ वृतः साक्षात् प्रजापतिः ॥ २६ ॥

इति बालकाण्डे दशरथपुत्रजन्म नाम एकोनविंशः सर्गः
॥ १९ ॥

Digitized by Google

## CAPUT XX.

### VISVAMITRAE ADVENTUS.

अथ राजा दशरथस्तेषां दारक्रियां प्रति ।
चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः ॥ १ ॥
एतस्मिन्नेव काले तु विश्वामित्र इति श्रुतः ।
महर्षिरभ्यगाद्द्रष्टुमयोध्यायां नराधिपं ॥ २ ॥
तस्य यज्ञो हि रक्षोभिस्तदा विलुलुपे किल ।
मायावीर्यबलोन्मत्तैर्धर्मकामस्य धीमतः ॥ ३ ॥
रक्षार्थं तस्य यज्ञस्य द्रष्टुमैच्छत् स पार्थिवं ।
न हि शक्नोत्यविघ्नेन समाप्तुं स मुनिः क्रतुं ॥ ४ ॥
स राज्ञो दर्शनाकाङ्क्षी द्वाराध्यक्षान् उवाच ह ।
राज्ञ आवेदयध्वं मां संप्राप्तं गाधिनः सुतं ॥ ५ ॥
तस्य ते वचनं श्रुत्वा राज्ञो वेश्म प्रदुद्रुवुः ।
संभ्रान्तमनसः सर्वे तेन वाक्येन चोदिताः ॥ ६ ॥
ते गत्वा राजभवनं विश्वामित्रं महामुनिं ।
प्राप्तमावेदयामासुर्नृपाय प्रणताः स्थिताः ॥ ७ ॥
ततो राजा दशरथः सामात्यः सपुरोहितः ।
प्रत्युद्ययौ मुनिं द्रष्टुं ब्रह्माणमिव वासवः ॥ ८ ॥

Digitized by Google

स दृष्ट्वा ज्वलितं दीप्त्या तापसं शंसितव्रतं ।
प्रहृष्टवदनो राजा ततो ऽर्घ्यमुपहारयत् ॥ ९ ॥
स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ।
कुशलानामयं प्रीतः पप्रछ वसुधाधिपं ॥ १० ॥ satw. ...
पुरे कोषे जनपदे बान्धवेषु सुहृत्सु च ।
कुशलं कौशिको राज्ञः पर्यपृछत् सुधार्मिकः ॥ ११ ॥
अपि ते संनताः सर्वे सामन्ता रिपवो जिताः ।
दैवं च मानुषं चैव कर्म ते साध्वनुष्ठितं ॥ १२ ॥
वशिष्ठं च समागम्य प्रहसन् मुनिपुंगवः ।
यथार्हं चार्चयित्वैनं पप्रछानामयं तदा ॥ १३ ॥
ते सर्वे हृष्टमनसस्तस्य राज्ञो निवेशनं ।
विविशुः सत्कृतास्तेन निषेदुश्च यथार्हतः ॥ १४ ॥
अथ हृष्टमना राजा विश्वामित्रं महामुनिं ।
उवाच परमोदारो हृष्टस्तमभिपूजयन् ॥ १५ ॥
यथामृतस्य संप्राप्तिर्यथा वर्षमनूदके ।
यथा सदृशदारेषु पुत्रजन्माप्रजस्य वै ॥ १६ ॥
प्रणष्टस्य यथा लाभो यथा हर्षमहोदयः ।
तथैवागमनं मन्ये स्वागतं ते महामुने ॥ १७ ॥
कस्ते ऽभिलषितः कामः किं करोमि प्रशाधि मां ।
पात्रभूतो ऽसि मे ब्रह्मन् दिष्ट्या प्राप्तो ऽसि मानद ॥ १८ ॥

अद्य मे सफलं जन्म जीवितं च सुजीवितं ।
यस्माद्विप्रेन्द्रमद्राक्षं सुप्रभाता निशा मम ॥ १९ ॥
पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ।
ब्रह्मर्षित्वमनुप्राप्तः पूज्योऽसि बहुधा मया ॥ २० ॥
तदद्भुतमिदं विप्र पवित्रं परमं मम ।
शुभक्षेत्रगतश्चाहं तव संदर्शनात् प्रभो ॥ २१ ॥
ब्रूहि यत् प्रार्थितं तुभ्यं कार्यमागमनं प्रति ।
इच्छाम्यनुगृहीतोऽहं त्वदर्थपरिवृद्धये ॥ २२ ॥
कार्यस्य न विमर्शं च गन्तुमर्हसि सुव्रत ।
कर्ता चाहमशेषेण दैवतं हि भवान् मम ॥ २३ ॥

इदमतिमधुरं निशम्य वाक्यं
श्रुतिसुखमात्मवता विनीतमुक्तं ।
प्रथितगुणयशा गुणे निविष्टो
मुनिवृषभः परमं जगाम हर्षं ॥ २४ ॥

इति बालकाण्डे विश्वामित्रागमनं नाम विंशः सर्गः
॥ २० ॥

Digitized by Google

## CAPUT XXI.

### VISVAMITRAE SERMO.

तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरं ।
हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सदृशं राजशार्दूल त्वय्येतद्वाक्यमीरितं ।
महावंशप्रसूतस्य वशिष्ठव्यपदेशिनः ॥ २ ॥
यस्तु मेऽभिमतः कामस्त्वत्तः प्राप्त इतीप्सितः ।
यदुद्दिश्यागतश्चास्मि कार्यं तच्छ्रूयतामिति ॥ ३ ॥
अहं नियममातिष्ठे विध्यर्थं पुरुषर्षभ ।
तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ ॥ ४ ॥
व्रते तु बहुशः स्तीर्णे समाप्त्यां राक्षसाधमौ ।
तौ मांसरुधिरौघेन वेदीं तामभ्यवर्षतां ॥ ५ ॥
अवधूते तथाभूते तस्मिन् नियमनिश्चये ।
कृतश्रामो निरुत्साहस्तस्माद्देशादपक्रमे ॥ ६ ॥
न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ।
तथाभूता हि सा चर्या न शापस्तत्र युज्यते ॥ ७ ॥
त्वत्प्रसादादविघ्नेन प्रापयेयं क्रियाफलं ।
पातुमर्हसि मामार्त्तं शरणार्थिनमागतं ॥ ८ ॥

Digitized by Google

स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमं ।
काकपक्षधरं वीरं ज्येष्ठं मे दातुमर्हसि ॥ ९ ॥
शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ।
राक्षसा ये विकर्तारस्तेषामपि विनाशने ॥ १० ॥
श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः ।
त्रयाणामपि लोकानां येन ख्यातिं गमिष्यति ॥ ११ ॥
न च तौ राममासाद्य शक्तौ स्थातुं कथंचन ।
न च तौ राघवादन्यो हन्तुमुत्सहते पुमान् ॥ १२ ॥
वीर्योत्सिक्तौ हि तौ पापौ कालपाशवशं गतौ ।
रामस्य नरशार्दूल न पर्याप्तौ महात्मनः ॥ १३ ॥
न च पुत्रगतं स्नेहं कर्तुमर्हसि पार्थिव ।
अहं ते प्रतिजानामि हतौ तौ विद्धि राक्षसौ ॥ १४ ॥
अहं वेद्मि महात्मानं रामं सत्यपराक्रमं ।
वशिष्ठोऽपि महातेजा ये चेमे तपसि स्थिताः ॥ १५ ॥
यदि ते धर्मलाभं तु यशश्च परमं भुवि ।
स्थिरमिच्छसि राजेन्द्र रामं मे दातुमर्हसि ॥ १६ ॥
यदि मेऽप्यनुजानन्ति गुरवस्ते नराधिप ।
वशिष्ठप्रमुखाः सर्वे ततो रामं विसर्जय ॥ १७ ॥
दशरात्रेण मे यज्ञो भविता यत्र राक्षसौ ।
हन्तव्यौ तव पुत्रेण रामेणाद्भुतकर्मणा ॥ १८ ॥

Digitized by Google

नात्येति कालो यज्ञस्य यथायं मम राघव ।
तथा कुरुष्व भद्रं ते मा च शोके मनः कृथाः ॥ १९ ॥
इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः ।
विरराम महातेजा विश्वामित्रो महामुनिः ॥ २० ॥
स तन्निशम्य राजेन्द्रो विश्वामित्रवचः शुभं ।
शोकेन महताविष्टश्चचाल च मुमोह च ॥ २१ ॥

इति बालकाण्डे विश्वामित्रवाक्यं नाम एकविंशः सर्गः
॥ २१ ॥

## CAPUT XXII.

### DASARATHAE SERMO.

तच्छ्रुत्वा व्यथितो राजा विश्वामित्रस्य भाषितं ।
मुहूर्तमिव निःसंज्ञः संज्ञावान् इदमब्रवीत् ॥ १ ॥
ऊनषोडशवर्षोऽयं रामो राजीवलोचनः ।
न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ २ ॥
इयमक्षौहिणी सेना यस्याऽहं पतिरीश्वरः ।
अनया सहितो गत्वा योद्धाहं तैर्निशाचरैः ॥ ३ ॥

Digitized by Google

इमे शूराश्च विक्रान्ता भृत्या मे ऽस्त्रविशारदाः ।
योग्या रक्षोगणैर्योद्धुं न रामं नेतुमर्हसि ॥ ४ ॥
अहमेव धनुष्पाणिर्गोप्ता समरमूर्धनि ।
यावत् प्राणान् धरिष्यामि तावद्योत्स्ये निशाचरैः ॥ ५ ॥
निर्विघ्ना व्रतचर्या सा भविष्यति सुरक्षिता ।
अहं तत्र गमिष्यामि न रामं नेतुमर्हसि ॥ ६ ॥
बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलं ।
न चासौ रक्षसां योग्यः कूटयुद्धा हि राक्षसाः ॥ ७ ॥
विप्रयुक्तो हि रामेण मुहूर्तमपि नोत्सहे ।
जीवितुं मुनिशार्दूल न रामं नेतुमर्हसि ॥ ८ ॥
नववर्षसहस्राणि मम जातस्य सांप्रतं ।
वृद्धेनोत्पादिताः पुत्रा मया चैते कथंचन ॥ ९ ॥
चतुर्णामात्मजानां हि प्रीतिः पारमिका मम ।
ज्येष्ठे धर्मप्रधाने च न रामं नेतुमर्हसि ॥ १० ॥
अवश्यं यदि नेतव्यो रामो वै स त्वया मुने ।
चतुरङ्गबलोपेतस्ततो यातु मया सह ॥ ११ ॥
किंवीर्या राक्षसास्ते च कस्य पुत्राश्च के च ते ।
कथं प्रमाणाः के चैतान् रक्षन्ति मुनिपुंगव ॥ १२ ॥
कथं च प्रतिकर्तव्यं तेषां रामेण रक्षसां ।
मामकैर्वा बलैर्ब्रह्मन् मया वा कूटयोधिनां ॥ १३ ॥

Digitized by Google

सर्वं मे शंस भगवन् कथं तेषां मया रणे ।
स्थातव्यं दुष्टभावानां वीर्योत्सिक्ता हि राक्षसाः ॥ १४ ॥
तस्य तद्वचनं श्रुत्वा विश्वामित्रो ऽभ्यभाषत ।
पौलस्त्यवंशप्रभवो रावणो नाम राक्षसः ॥ १५ ॥
स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशं ।
महाबलो महावीर्यो राक्षसैर्बहुभिर्वृतः ॥ १६ ॥
श्रूयते च महाराज रावणो राक्षसाधिपः ।
पुत्रः विश्रवसः क्रूरो भ्राता वैश्रवणस्य च ॥ १७ ॥
तेन संचोदितौ तौ तु राक्षसौ च महाबलौ ।
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥ १८ ॥
इत्युक्तो मुनिना तेन राजोवाच मुनिं तदा ।
न हि शक्तो ऽस्मि संग्रामे स्थातुं तस्य दुरात्मनः ॥ १९ ॥
स त्वं प्रसादं धर्मज्ञ कुरुष्व मम पुत्रके ।
मम चैवाल्पभाग्यस्य दैवतं हि भवान् गुरुः ॥ २० ॥
देवदानवगन्धर्वा यक्षाः पतगपन्नगाः ।
न शक्ता रावणं सोढुं किं पुनर्मानवा युधि ॥ २१ ॥
स हि वीर्यवतां वीर्यमादत्त इति नः श्रुतं ।
तेन चाहं न शक्तो ऽस्मि संयोद्धुं तस्य वा बलैः ॥ २२ ॥
कथमप्यमरप्रख्यं संग्रामाणामकोविदं ।
बालं मे तनयं ब्रह्मन् नैव दास्यामि पुत्रकं ॥ २३ ॥

Digitized by Google

अथ कालोपमौ युद्धे सुतौ सुन्दोपसुन्दयोः ।
यज्ञविघ्नकरौ तौ ते नैव दास्यामि पुत्रकं ॥ २४ ॥
मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ।
तयोरन्यतरेणाहं योद्धा स्यां ससुहृद्गणः ॥ २५ ॥

इति बालकाण्डे दशरथवाक्यं नाम द्वाविंशः सर्गः
॥ २२ ॥

---

## CAPUT XXIII.

### Vasishthae sermo.

तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरं ।
समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिं ॥ १ ॥
पूर्वं करिष्य इत्युक्त्वा प्रतिज्ञां हातुमिच्छसि ।
राघवाणामयुक्तो ऽयं सत्यधर्मविपर्ययः ॥ २ ॥
यद्येतत् ते क्षमं राजन् गमिष्यामि यथागतं ।
मिथ्याप्रतिज्ञः काकुत्स्थ सुखी भव सुतैः सह ॥ ३ ॥
तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः ।
चचाल वसुधा कृत्स्ना विवेश च भयं सुरान् ॥ ४ ॥

Digitized by Google

अत्तद्रूपं तु विज्ञाय जगत् सर्वं महान् ऋषिः ।
नृपतिं सुव्रतो धीरो वशिष्ठो वाक्यमब्रवीत् ॥ ५ ॥
इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इवापरः ।
धृतिमान् सुव्रतः श्रीमान् न धर्मं हातुमर्हसि ॥ ६ ॥
त्रिषु लोकेषु विख्यातो धर्मात्मा इति राघव ।
स्वधर्मं प्रतिपद्यस्व नाधर्मं वोढुमर्हसि ॥ ७ ॥
संश्रुत्यैव करिष्यामीत्यकुर्वाणस्य राघव ।
इष्टापूर्तवधो भूयात् तस्माद्रामं विसर्जय ॥ ८ ॥
कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः ।
गुप्तं कुशिकपुत्रेण प्रधर्षयितुमाहवे ॥ ९ ॥
एष विग्रहवान् धर्म एष वीर्यवतां वरः ।
एष बुद्ध्याधिको लोके तपसश्च परायणं ॥ १० ॥
दिव्यान्यस्त्राण्यशेषाणि वेदैष कुशिकात्मजः ।
देवाश्च न विदुर्यानि कुतोऽन्ये भुवि मानवाः ॥ ११ ॥
दत्तान्यस्मै कृशाश्वेन दिव्यान्यस्त्राण्यशेषतः ।
महीं पालयते पूर्वं प्रीतेनामिततेजसा ॥ १२ ॥
ते ऽपि पुत्राः कृशाश्वस्य प्रजापतिसुतासुताः ।
नैकरूपा महावीर्या दीप्तिमन्तो जयावहाः ॥ १३ ॥
जया च विजया चैव दक्षकन्ये सुमध्यमे ।
ते सुवाते ऽस्त्रशस्त्राणि शतं परमभास्वरं ॥ १४ ॥

Digitized by Google

पञ्चाशतं सुतांल्लेभे जया नाम परान् पुरा ।
बधायासुरसैन्यानामप्रमेयान् अरूपिणः ॥ १५ ॥
विजयाजनयच्चापि पुत्रान् पञ्चाशतं पुनः ।
संहारान् नाम दुर्धर्षान् दुराक्रमान् बलीयसः ॥ १६ ॥
तानि चास्त्राणि वेत्त्येष यथावत् कुशिकात्मजः ।
अपूर्वाणां च जनने शक्तो भूयश्च धर्मवित् ॥ १७ ॥
तानि दास्यत्यशेषेण रामायैष महामुनिः ।
यैरस्त्रैस्तानि रक्षांसि रामो जेष्यत्यसंशयं ॥ १८ ॥
अनुग्रहार्थं रामस्य प्रजानामपि चात्मनः ।
न रामगमने राजन् निवारयितुमर्हसि ॥ १९ ॥

इति बालकाण्डे वशिष्ठवाक्यं नाम त्रयोविंशः सर्गः
॥ २३ ॥

581/10



Digitized by Google

## CAPUT XXIV.

### DISCIPLINARUM TRADITIO.

तथा वशिष्ठे ब्रुवति राजा दशरथः स्वयं ।
प्रहृष्टवदनो राममाजुहाव सलक्ष्मणं ॥ १ ॥
कृतस्वस्त्ययनं मात्रा पित्रा दशरथेन च ।
पुरोधसा वशिष्ठेन मङ्गलैरभिमन्त्रितं ॥ २ ॥
स्नेहान्मूर्धन्युपाघ्राय राजा दशरथः सुतं ।
ददौ कुशिकपुत्राय लक्ष्मणानुचरं तदा ॥ ३ ॥
ततो वायुः सुखस्पर्शो नीरजस्को ववौ शुचिः ।
विश्वामित्रगतं दृष्ट्वा रामं राजीवलोचनं ॥ ४ ॥
पपात पुष्पवृष्टिः खाद्गीतनृत्यश्च शुश्रुवे ।
शङ्खदुन्दुभिनिर्घोषः प्रयाते रघुनन्दने ॥ ५ ॥
विश्वामित्रो ययावग्रे ततो रामो महायशाः ।
काकपक्षधरो धन्वी तं च सौमित्रिरन्वयात् ॥ ६ ॥
विश्वामित्रगतं रामं दृष्ट्वा देवाः सवासवाः ।
प्रहर्षमतुलं प्राप्ता दशग्रीववधैषिणः ॥ ७ ॥
विश्वामित्रं महात्मानं तावुभौ रामलक्ष्मणौ ।
तदनुजग्मतुर्वीरौ यथेन्द्रं देवमश्विनौ ॥ ८ ॥

Digitized by Google

बद्धगोधाङ्गुलित्राणौ खड्गतूणधनुर्धरौ ।
तदानुजग्मतुः स्थाणुं कुमाराविव पावकी ॥ ९ ॥
अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे ।
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ॥ १० ॥
वत्स राम जलं तावद्विधिवत् स्प्रष्टुमर्हसि ।
उपदेक्ष्यामि ते श्रेयो मा भूत् कालस्य पर्ययः ॥ ११ ॥
मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ।
न श्रमो न जरा वा ते भविता नाङ्गवैकृतं ॥ १२ ॥
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः ।
न बाह्वोः सदृशो वीर्ये पृथिव्यामस्ति कश्चनः ॥ १३ ॥
त्रिषु लोकेषु वै राम न भवेत् सदृशस्तव ।
बलामतिबलां चैव पठतस्तव राघव ॥ १४ ॥
न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये ।
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ ॥ १५ ॥
एतद्विद्याद्वयं प्राप्य यशश्चाव्ययमाप्स्यसि ।
बला चातिबला चैव ज्ञानविज्ञानमातरौ ॥ १६ ॥
क्षुत्पिपासे न ते राम भविष्येते न संशयः ।
सारतां त्रिषु लोकेषु गमिष्यसि च राघव ॥ १७ ॥
पितामहसुते ह्येते विद्ये तेजःसमन्विते ।
पात्रं त्वमसि काकुत्स्थ, विद्ययोर्ग्रहणे ऽनयोः ॥ १८ ॥

Digitized by Google

स्वभावजैर्गुणैर्दिव्यैः कामैरप्यतुलैर्युतः ।
भूयस्तव गुणोत्कर्षमेते विद्ये करिष्यतः ॥ १९ ॥
ततो रामो जलं स्पृष्ट्वा प्राञ्जलिः प्रणतः स्थितः ।
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः ॥ २० ॥
विद्यासमुदितो रामः शुशुभे भूरिविक्रमः ।
सहस्ररश्मिर्भगवान् शरदीव दिवाकरः ॥ २१ ॥
गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजे ।
ऊषुस्तां रजनीं तत्र सरय्वां सुसुखं त्रयः ॥ २२ ॥

इति बालकाण्डे विद्याप्रदानं नाम चतुर्विंशः सर्गः ॥ २४ ॥

## CAPUT XXV.

### COMMORATIO IN CUPIDINIS EREMO.

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः ।
अभ्यभाषत काकुत्स्थं शयानं पर्णसंस्तरे ॥ १ ॥
कौशल्या सुप्रजा राम पूर्वा संध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकं ॥ २ ॥
तस्यर्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ ।
स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपं ॥ ३ ॥
कृताह्निकक्रियौ चापि विश्वामित्रं तपोनिधिं ।
अभिवादयितुं तत्र सहितावुपतस्थतुः ॥ ४ ॥
तौ प्रयातौ महावीर्यौ दिव्यां त्रिपथगां नदीं ।
ददृशाते ततस्तत्र सरय्वाः संगमे शुभे ॥ ५ ॥
तत्राश्रमपदं पुण्यमृषीणां भावितात्मनां ।
बहुवर्षसहस्राणि तप्यतां परमं तपः ॥ ६ ॥
तं दृष्ट्वा परमप्रीतौ राघवौ पुण्यमाश्रमं ।
ऊचतुस्तं महात्मानं विश्वामित्रमिदं वचः ॥ ७ ॥
कस्यायमाश्रमः पुण्यः को न्वस्मिन् वसते पुमान् ।
भगवन् श्रोतुमिच्छावः परं कौतूहलं हि नौ ॥ ८ ॥

Digitized by Google

तयोस्तद्वचनं श्रुत्वा प्रहस्य मुनिपुंगवः ।
अब्रवीच्छ्रूयतां राम यस्यायं पूर्व आश्रमः ॥ ९ ॥
कन्दर्पो मूर्तिमान् आसीत् काम इत्युच्यते बुधैः ।
आविष्टुमभ्ययात् तूर्णं कृतोद्वाहमुमापतिं ॥ १० ॥
तपस्यन्तमिह स्थाणुं नियमेन समाहितं ।
धर्षयामास दुर्मेधा हुंकृतश्च महात्मना ॥ ११ ॥
अवध्यातस्य रौद्रेण चक्षुषा रघुनन्दन ।
व्यशीर्यन्त शरीरात् स्वात् सर्वगात्राणि दुर्मतेः ॥ १२ ॥
अशरीरः कृतः कामः क्रोधाद्देवेश्वरेण ह ।
अनङ्ग इति विख्यातस्तदा प्रभृति राघव ॥ १३ ॥
स चाङ्गविषयः श्रीमान् यत्राङ्गं स मुमोच ह ।
तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा ॥ १४ ॥
तपोदमरताः सर्वे पुराणा ब्रह्मवादिनः ।
निवसन्त्यत्र नियता तपोनिर्धूतकल्मषाः ॥ १५ ॥
इहाद्य रजनीमेकां वसाम शुभदर्शन ।
पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयं ॥ १६ ॥
अभिगच्छाम च स्नात्वा शुचयः पुण्यमाश्रमं ।
इह कामाश्रमे राम सुखं वत्स्यामहे निशां ॥ १७ ॥
तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा ।
विज्ञाय परमप्रीता मुनयो हर्षमागमन् ॥ १८ ॥

Digitized by Google

अर्घ्यं पाद्यं तथातिथ्यं निवेद्य कुशिकात्मजे ।
रामलक्ष्मणयोः पश्चादकुर्वन्नतिथिक्रियां ॥ १९ ॥
सत्कारं समनुप्राप्य कथाभिरभिरम्य च ।
यथार्हमजपन् संध्यामृषयस्ते समाहिताः ॥ २० ॥
तत्रवासिभिरासीना मुनिभिः सुव्रतैः सह ।
न्यवसन् सुसुखं तत्र कामाश्रमपदे तदा ॥ २१ ॥

इति बालकाण्डे कामाश्रमनिवासो नाम पञ्चविंशः सर्गः
॥ २५ ॥

---

## CAPUT XXVI.

### Accessus ad Tadacae silvam.

ततः प्रभाते विमले कृताह्निकमरिंदमौ ।
विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपागतौ ॥ १ ॥
ते च सर्वे महात्मानो मुनयः शंसितव्रताः ।
उपस्थाप्य शुभां नावं विश्वामित्रमथाब्रुवन् ॥ २ ॥
आरोहतु भवान् नावं राजपुत्रपुरस्कृतः ।
अरिष्टं गच्छ पन्थानं मा भूत् कालस्य पर्ययः ॥ ३ ॥

Digitized by Google

विश्वामित्रस्तथेत्युक्ता तान् ऋषीन् प्रतिपूज्य च ।
ततार सहितस्ताभ्यां सरितं सागरंगमां ॥ ४ ॥
मध्यमागम्य तस्यास्तु सह रामः कनीयसा ।
तत्र शुश्रुवतुः शब्दं तोयसंरम्भवर्धितं ॥ ५ ॥
अथ रामः सरिन्मध्ये पप्रच्छ मुनिपुंगवं ।
वारिणो भिद्यमानस्य किमयं तुमुलो ध्वनिः ॥ ६ ॥
राघवस्य वचः श्रुत्वा कौतूहलसमन्वितं ।
कथयामास धर्मात्मा तस्य शब्दस्य निश्चयं ॥ ७ ॥
कैलासशिखरे राम मनसा निर्मितं सरः ।
ब्रह्मणा प्रागिदं यस्मात् तदभून्मानसं सरः ॥ ८ ॥
तस्मात् शुश्राव सरसः साऽयोध्यामुपगूहते ।
सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥ ९ ॥
जाह्नवीमभिवृत्तायास्तस्याः शब्दोऽयमीदृशः ।
तोयसंघर्षजो राम प्रणामं नियतः कुरु ॥ १० ॥
चक्रतुस्तौ नमस्ताभ्यां नदीभ्यामथ राघवौ ।
तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ ॥ ११ ॥
स वनं घोरसंकाशं दृष्ट्वा नृपवरात्मजः ।
अविप्रहतमैक्ष्वाकुः पप्रच्छ मुनिपुंगवं ॥ १२ ॥
कस्येदं मेघसंकाशं वनं घोरं प्रकाशते ।
दुर्गं पक्षिगणाकीर्णं झिल्लिकागणनादितं ॥ १३ ॥

Digitized by Google

भैरवैः श्वापदैः कीर्णं शकुनैर्दारुणारवैः ।
सिंहव्याघ्रवराहर्क्षखड्गिकुञ्जरसेवितं ॥ १४ ॥
धवाश्वकर्णककुभैर्बिल्वतिन्दुकपाटलैः ।
द्रुमैः कण्टकिभिश्चैव कीर्णं किं न्विदमुच्यते ॥ १५ ॥
तमुवाच महातेजा विश्वामित्रो महामुनिः ।
श्रूयतां वत्स काकुत्स्थ कस्यैतद्दारुणं वनं ॥ १६ ॥
एतौ जनपदौ स्फीतौ पूर्वमास्तां नरोत्तम ।
मलजाश्च करूषाश्च देवनिर्माणनिर्मितौ ॥ १७ ॥
सखायं नमुचिं हत्वा मलेन समभिप्लुतः ।
क्षुधा चैव सहस्राक्षो मित्रध्रुगभवत् किल ॥ १८ ॥
तमिह स्नापयामासुर्देवा सर्षिगणाः पुरा ।
कलसैः पुण्यसलिलैः पूर्णैर्मलविशोधनैः ॥ १९ ॥
सोऽस्मिन् देशे मलं त्यक्त्वा देवः करूषमेव च ।
मित्राभिद्रोहसंयुक्तं परं हर्षमवाप्तवान् ॥ २० ॥
निर्मलो निष्करूषश्च शुचिरिन्द्रो यदाभवत् ।
तदा देशस्य सुप्रीतो ददौ वरमनुत्तमं ॥ २१ ॥
इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः ।
मलजाश्च करूषाश्च ममाङ्गमलधारिणौ ॥ २२ ॥
एवमस्त्विति तं देवाः पाकशासनमब्रुवन् ।
देशस्य नामनिर्वृत्तिं श्रुत्वा तां वासवेरितां ॥ २३ ॥

Digitized by Google

एतौ जनपदौ स्फीतौ दीर्घकालमरिंदम ।
मलजांश्च करूषांश्च मुदिता ऋद्धिसंपदा ॥ २४ ॥
कस्यचित् त्वथ कालस्य यक्षिणी कामरूपिणी ।
बलं नागसहस्रस्य धारयन्ती महाबला ॥ २५ ॥
ताडका नाम सुन्दस्य भार्या दैत्यपतेरभूत् ।
मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः ॥ २६ ॥
इमौ जनपदौ नित्यं विनाशयति राघव ।
मलजांश्च करूषांश्च ताडका दुष्टचारिणी ॥ २७ ॥
सेयं पन्थानमावृत्य वसत्यत्यर्धयोजनं ।
अत एव च गन्तव्यं ताडकाया वनं यतः ॥ २८ ॥
स्वबाहुबलमाश्रित्य जहि तां दुष्टचारिणीं ।
मन्नियोगादिमं देशं कुरु निष्कण्टकं पुनः ॥ २९ ॥
न हि कश्चिदिमं देशं शक्नोत्यागन्तुमीदृशं ।
यक्षिण्या घोरया राम उत्सादितमसह्यया ॥ ३० ॥
इति ते सत्यमाख्यातं यथेदं दारुणं वनं ।
यक्षिण्योत्सादितं पूर्वमद्यापि न निवर्तते ॥ ३१ ॥

इति बालकाण्डे ताडकावनप्रवेशो नाम षड्विंशः सर्गः
॥ २६ ॥

643
31
---
571

## CAPUT XXVII.

### Tadacae generatio.

अथ तस्याप्रमेयस्य मुनेर्वचनमद्भुतं ।
श्रुत्वा रामस्ततो भूयः परिपप्रच्छ संशयं ॥ १ ॥
अल्पवीर्या यदा यक्षाः श्रूयन्ते मुनिपुंगव ।
कथं नागसहस्रस्य धारयत्यबला बलं ॥ २ ॥
इत्युक्तं वचनं श्रुत्वा राघवस्यामितौजसः ।
विश्वामित्रोऽब्रवीद्वाक्यं शृणु येन बलोत्कटा ॥ ३ ॥
पूर्वमासीन्महायक्षः सुकेतुरिति विश्रुतः ।
अनपत्यः शुभाचारः स च तेपे महत् तपः ॥ ४ ॥
पितामहश्च सुप्रीतस्तस्य यक्षपतेस्तदा ।
कन्यारत्नं ददौ राम ताडकां नाम नामतः ॥ ५ ॥
बलं नागसहस्रस्य ददौ चास्याः पितामहः ।
कान्ततोऽप्यस्य पुत्रं हि न यक्षस्य ददौ प्रभुः ॥ ६ ॥
तां तु बालां विवर्धन्तीं रूपयौवनशालिनीं ।
जम्भपुत्राय सुन्दाय ददौ भार्यां यशस्विनीं ॥ ७ ॥
कस्यचित् त्वथ कालस्य यक्षी पुत्रं व्यजायत ।
मारीचं नाम दुर्धर्षं यः शापाद्राक्षसोऽभवत् ॥ ८ ॥

Digitized by Google

सुन्दे तु निहते तस्मिन्नगस्त्यमृषिसत्तमं ।
ताडका सह पुत्रेण प्रधर्षयितुमुद्यता ॥ ९ ॥
भक्ष्यार्थं जातसंरम्भा गर्जन्ती साभ्यधावत ।
आपतन्तीं तु तां दृष्ट्वा अगस्त्यो भगवान् ऋषिः ॥ १० ॥
राक्षसत्वं भजस्वेति मारीचं व्याजहार सः ।
अगस्त्यः परमामर्षस्ताडकामपि शप्तवान् ॥ ११ ॥
पुरुषादी महायक्षी विकृता विकृतानना ।
इदं रूपं विहायाशु दारुणं रूपमस्तु ते ॥ १२ ॥
सैषा शापसमाविष्टा ताडका क्रोधमूर्छिता ।
देशमुत्सादयत्येनमगस्त्याध्युषितं पुरा ॥ १३ ॥
एवं तां राम दुर्वृत्तां यक्षीं परमदारुणां ।
गोब्राह्मणहितार्थाय जहि घोरपराक्रमां ॥ १४ ॥
न ह्येनां शापसंसृष्टां कश्चिदुत्सहते पुमान् ।
निहन्तुं त्रिषु लोकेषु त्वामृते रघुनन्दन ॥ १५ ॥
न च ते स्त्रीबधकृते घृणा कार्या कथंचन ।
चातुर्वर्ण्यहितार्थं हि कर्तव्यं राजसूनुना ॥ १६ ॥
नृशंसमनृशंसं वा प्रजारक्षणकारणात् ।
पावनं वा सदोषं वा कर्तव्यं नात्र संशयः ॥ १७ ॥
राज्यभारनियुक्तानामेष धर्मः सनातनः ।
अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्या न विद्यते ॥ १८ ॥

Digitized by Google

श्रूयते हि पुरा शक्रो विरोचनसुतां नृप ।
पृथिवीं हन्तुमिच्छन्तीं मन्थरामभ्यसूदयत् ॥ १९ ॥
विष्णुना च पुरा राम भृगुपत्नी पतिव्रता ।
अनिन्द्रं लोकमिच्छन्ती काव्यमाता निषूदिता ॥ २० ॥
एतैरन्यैश्च बहुभी राजपुत्रैर्महात्मभिः ।
अधर्मनिरता नार्यो हताः पुरुषसत्तम ॥ २१ ॥

इति बालकाण्डे ताडकोत्पत्तिर्नाम सप्तविंशः सर्गः
॥ २७ ॥

674
21
695

---

## CAPUT XXVIII.

### Tadacae caedes.

मुनेर्वचनमक्लीवं श्रुत्वा नरवरात्मजः ।
राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच दृढव्रतं ॥ १ ॥
अहं पित्रा समादिष्टो मात्रा चैव महामुने ।
विश्वामित्रस्य वचनं त्वया कार्यमिति प्रभो ॥ २ ॥
सो ऽहं पितृनियोगेन तव चानुपमद्युते ।
करिष्ये दुष्टचारिण्यास्ताडकाया बधं मुने ॥ ३ ॥

Digitized by Google

गोब्राह्मणहितार्थाय देशस्यास्य हिताय च ।
तवैतदप्रतीपेन वचनं कर्तुमुद्यतः ॥ ४ ॥
एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिंदमः ।
ज्याघोषमकरोत् तीव्रं दिशः शब्देन नादयन् ॥ ५ ॥
तेन शब्देन वित्रस्ता मृगास्तद्वनवासिनः ।
ताडका चापि संभ्रान्ता ज्याशब्दं प्रति बोधिता ॥ ६ ॥
तं शब्दमभिनिध्याय राक्षसी क्रोधमूर्छिता ।
श्रुत्वा चाभ्यद्रवत् क्रुद्धा यत्र शब्दो विनिःसृतः ॥ ७ ॥
तां दृष्ट्वा राघवः क्रुद्धो विकृतां विकृताननां ।
प्रमाणेनातिवृद्धां च लक्ष्मणं सोऽभ्यभाषत ॥ ८ ॥
पश्य लक्ष्मण यक्षिण्या भैरवं दारुणं वपुः ।
भिद्येरन् दर्शनादस्या भीरूणां हृदयानि च ॥ ९ ॥
एनां पश्य दुराधर्षां मायाबलसमन्वितां ।
विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकां ॥ १० ॥
न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षितां ।
वीर्यं चास्या गतिं चैव हन्यामिति हि मे मतिः ॥ ११ ॥
एवं ब्रुवाणे रामे तु ताडका क्रोधमूर्छिता ।
उद्यम्य बाहू गर्जन्ती राममेवाभ्यधावत ॥ १२ ॥
विश्वामित्रस्तु ब्रह्मर्षिर्हुंकारेणाभिभर्त्स्य तां ।
स्वस्ति राघवयोरस्तु जयं चैवाभ्यभाषत ॥ १३ ॥

Digitized by Google

उद्धून्वाना रजो घोरं ताडका राघवावुभौ ।
रजोमेघेन महता मुहूर्तं सा व्यमोहयत् ॥ १४ ॥
ततो मायां समास्थाय शिलावर्षेण राघवौ ।
अवाकिरत् सुमहता ततश्चुक्रोध राघवः ॥ १५ ॥
शिलावर्षं महत् तस्याः शरवर्षेण राघवः ।
प्रतिवार्योपधावन्त्याः करौ चिच्छेद पत्रिभिः ॥ १६ ॥
ततश्छिन्नभुजाग्रां तामभ्यासे परिगर्जतीं ।
सौमित्रिरकरोत् क्रोधाद्धृतकर्णाग्रनासिकां ॥ १७ ॥
कामरूपधरा सा तु कृत्वा रूपाण्यनेकशः ।
अन्तर्धानं गता यक्षी मोहयन्ती स्वमायया ॥ १८ ॥
ततस्तावश्मवर्षेण कीर्यमाणौ समन्ततः ।
दृष्ट्वा गाधिसुतः श्रीमान् इदं वचनमब्रवीत् ॥ १९ ॥
अलं ते घृणया राम पापैषा दुष्टचारिणी ।
यज्ञविघ्नकरी यक्षी पुरा वर्धेत मायया ॥ २० ॥
बध्यतां तावदेवैषा पुरा सन्ध्या प्रवर्तते ।
रक्षांसि सन्ध्याकालेषु दुर्धर्षाणि भवन्ति हि ॥ २१ ॥
इत्युक्तस्तु तदा यक्षीमश्मवर्षाभिवर्षिणीं ।
दर्शयन् शब्दवेधित्वं तां रुरोध स सायकैः ॥ २२ ॥
सा रुद्धा बाणजालेन मायाबलसमन्विता ।
अभिदुद्राव काकुत्स्थं लक्ष्मणं च विनेदुषी ॥ २३ ॥

तामापतन्तीं वेगेन विक्रान्तामशनीमिव ।
ताडकां विकृताकारां जिघांसन्तीं सुदारुणां ॥ २४ ॥
महाभ्रचयसंकाशां समुच्छ्रितभुजद्वयां ।
विव्याधोरसि बाणेन चन्द्रार्धाकारवर्चसा ॥ २५ ॥
सा तेन वज्रपातेन बाणेन भृशविक्षता ।
ववाम रुधिरं भूरि पपात च ममार च ॥ २६ ॥
तां हतां भीमसंकाशां दृष्ट्वा सुरपतिस्तदा ।
साधु साध्विति काकुत्स्थं सुराश्च समपूजयन् ॥ २७ ॥
उवाच स भृशं प्रीतः सहस्राक्षो ऽम्बरे स्थितः ।
सह सर्वामरगणैर्विश्वामित्रमिदं वचः ॥ २८ ॥
मुने कौशिक पश्यास्मान् देवान् सेन्द्रान् उपस्थितान् ।
तोषितान् कर्मणानेन रामस्यामिततेजसः ॥ २९ ॥
अस्मन्नियोगाद्भद्रं ते स्नेहं दर्शय राघवे ।
तपोयोगबलेनैनमाप्याययितुमर्हसि ॥ ३० ॥
प्रजापतिसुताश्चैव कृशाश्वाद्राजसत्तमात् ।
यान्युवासानि ते ऽस्त्राणि तान्यस्मै प्रतिपादय ॥ ३१ ॥
पात्रभूतो हि ते ब्रह्मंस्तवानुगमने रतः ।
कर्तव्यं सुमहत् कार्यमस्माकं राजसूनुना ॥ ३२ ॥
एवमुक्त्वा सुराः सर्वे जग्मुर्हृष्टा यथागतं ।
विश्वामित्रं पूजयन्तस्ततः संध्या प्रवर्तते ॥ ३३ ॥

Digitized by Google

ततो मुनिवरः प्रीतस्ताडकाबधतोषितः ।
रामं मूर्धन्युपाघ्राय इदं वचनमब्रवीत् ॥ ३४ ॥
इहाद्य रजनीं राम वसाम शुभदर्शन ।
श्वः प्रभाते गमिष्यामस्तदाश्रमपदं मम ॥ ३५ ॥
विश्वामित्रवचः श्रुत्वा हृष्टो दशरथात्मजः ।
उवास रजनीं तत्र ताडकाया वने सुखं ॥ ३६ ॥
मुक्तशापं वनं तच्च तस्मिन्नेव तदाहनि ।
रमणीयं विबभ्राज यथा चैत्ररथं वनं ॥ ३७ ॥

निहत्य तां यक्षसुतां स रामः
प्रशस्यमानः सुरसिद्धसंघैः ।
उवास तस्मिन् मुनिना सहैव
प्रभातवेलां प्रतिबोध्यमानः ॥ ३८ ॥

इति बालकाण्डे ताडकाबधो नाम अष्टाविंशः सर्गः
॥ २८ ॥



Digitized by Google

## CAPUT XXIX.

### Telorum traditio.

अथ तां रजनीमुष्य विश्वामित्रो महामुनिः ।
प्रहस्य राघवं वाक्यमुवाच मधुरस्वरं ॥ १ ॥
परितुष्टोऽस्मि भद्रं ते राजपुत्र महायशः ।
प्रीत्या परमया युक्तो ददाम्यस्त्राण्यशेषतः ॥ २ ॥
देवासुरगणान् वापि सगन्धर्वोरगान् भुवि ।
यैरमित्रान् प्रसह्याजौ वशीकृत्य जयिष्यसि ॥ ३ ॥
प्रीतिदायं च दास्यामि सर्वाण्यस्त्राणि सर्वशः ।
यान्यहं वेद्मि काकुत्स्थ पात्रं ह्येषां मतोऽसि मे ॥ ४ ॥
दण्डचक्रं महद्दिव्यं तव दास्यामि राघव ।
धर्मचक्रं ततो वीर कालचक्रं तथैव च ॥ ५ ॥
विष्णुचक्रमथात्युग्रमैन्द्रं चक्रं च दुर्जयं ।
वज्रमस्त्रं नरश्रेष्ठ शैवं शूलवरं तथा ॥ ६ ॥
अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि राघव ।
ददामि ते महाबाहो ब्राह्ममस्त्रमनुत्तमं ॥ ७ ॥
गदे द्वे चैव काकुत्स्थ मोदकीशिखरे शुभे ।
प्रदीप्ते नरशार्दूल प्रयच्छामि नृपात्मज ॥ ८ ॥

Digitized by Google

धर्मपाशं तथैवास्त्रं कालपाशं च दुर्जयं ।
वारुणं चापि ते पाशं ददामि परमार्चितं ॥ ९ ॥
शुष्कार्द्रे चाशनी राम गृह्णाणेमे मयोद्यते ।
पैनाकमपि चैवास्त्रमस्त्रं नारायणं तथा ॥ १० ॥
आग्नेयमस्त्रं दयितं शिखरं नाम नामतः ।
वायव्यं मथनं नाम ददामि तव चानघ ॥ ११ ॥
अस्त्रं हयशिरो नाम क्रौञ्चमस्त्रं तथैव च ।
शक्ती च द्वे गृह्णाणेमे अमोघां विजयां तथा ॥ १२ ॥
कङ्कालमुशलं घोरं कापालमथ कङ्कणं ।
धारयन्त्यसुरा यानि ददाम्येतानि सर्वशः ॥ १३ ॥
वैद्याधरं महास्त्रं च नन्दनं नाम नामतः ।
असिरत्नं महावाहो ददामि नृवरात्मज ॥ १४ ॥
गान्धर्वमस्त्रं दयितं मोहनं नाम नामतः ।
प्रस्वापनप्रशमने दद्मि सौर्यं च राघव ॥ १५ ॥
वर्षणं शोषणं चैव संतापनविलेपने ।
मदनं चैव दुर्धर्षं कन्दर्पदयितं तथा ॥ १६ ॥
रक्तामिषादं पैशाचं कौबेरं च ददामि ते ।
राक्षसं चारिसैन्यानां श्रीधृतिप्राणनाशनं ॥ १७ ॥
सत्यं चैवानृतं चास्त्रं महामायास्त्रमेव च ।
शौरं तेजःप्रभं नाम परतेजोऽपकर्षणं ॥ १८ ॥

सोमास्त्रं शिशिरं नाम त्वाष्ट्रं चापि सुदामनं ।
मारणं चास्त्रमजितं शीतेषुमपि मानवं ॥ १९ ॥
एवमादीनि चास्त्राणि ददामि दयितोऽसि मे ।
गृहाणैतानि मत्तस्त्वमस्त्राणि नृवरात्मज ॥ २० ॥
स्थितस्तु प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ।
ददौ रामाय सुप्रीतो मन्त्रग्राममनुत्तमं ॥ २१ ॥
सर्वसंग्रहणं येषां दैवतैरपि दुर्लभं ।
तान्यस्त्राणि तदा विप्रो राघवाय न्यवेदयत् ॥ २२ ॥
जपतोऽथ मुनेस्तस्य मन्त्रग्राममशेषतः ।
उपतस्थुर्महास्त्राणि मूर्तिमन्ति नृपात्मजं ॥ २३ ॥
ऊचुश्च मुदिता रामं सर्वे प्राञ्जलयस्तदा ।
इमे स्म परमोदार किंकरास्तव राघव ॥ २४ ॥
प्रतिगृह्य च काकुत्स्थः समालभ्य च पाणिना ।
मानसा मे भविष्यध्वमिति तान् अभ्यचोदयत् ॥ २५ ॥
ततः प्रीतमना रामो विश्वामित्रं महामुनिं ।
अभिवाद्य महातेजा गमनायोपचक्रमे ॥ २६ ॥

इति बालकाण्डे अस्त्रग्रामप्रदानं नाम एकोनत्रिंशः सर्गः
॥ २९ ॥

Digitized by Google

## CAPUT XXX.

### SUBSIDIORUM TRADITIO.

प्रतिगृह्य ततो ऽस्त्राणि प्रहृष्टवदनः शुचिः ।
गच्छन्नेव च काकुत्स्थो विश्वामित्रमथाब्रवीत् ॥ १ ॥
गृहीतास्त्रो ऽस्मि भगवन् दुराधर्षः सुरैरपि ।
अस्त्राणां त्वहमिच्छामि संहारान् मुनिपुंगव ॥ २ ॥
एवं ब्रुवति काकुत्स्थे विश्वामित्रो महातपाः ।
संहारान् व्याजहाराथ धृतिमान् सुव्रतः शुचिः ॥ ३ ॥
सत्यवन्तं सत्यकीर्तिं धृष्टं रभसमेव च ।
प्रतिहारं तरं नाम पराङ्मुखमवाङ्मुखं ॥ ४ ॥
लक्ष्यालक्ष्याविमौ चैव दृढनाभसुनाभकौ ।
दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ ॥ ५ ॥
ज्योतिषं शकुनं चैव नैरास्यविमलावुभौ ।
योगन्धरविनिद्रौ च दैत्यप्रमथनौ तथा ॥ ६ ॥
करवीरं रतिं चैव धनधान्यं च राघव ।
जृम्भकं स्वर्णनाभं च संधानवरुणावुभौ ॥ ७ ॥
कृशाश्वतनयान् राम भास्वरान् कामरूपिणः ।
प्रतीच्छ मम भद्रं ते पात्रभूतो ऽसि राघव ॥ ८ ॥

Digitized by Google

वाढमित्येव काकुत्स्थो विश्वामित्रात् तपोधनात् ।
जग्राह तान् अपि तथा स्तम्भकान् रिपुजम्भकान् ॥ ९ ॥
दिव्यमूर्तिधरास्ते हि दिव्याभरणभूषिताः ।
केचिदङ्गारसदृशाः केचिद्धूमोपमास्तथा ॥ १० ॥
ऊचुः प्राञ्जलयो भूत्वा रामं मधुरभाषिणः ।
इमे स्म वशगा राम शाधि नस्त्वमिह स्थितान् ॥ ११ ॥
गम्यतामिति तान् आह यथेष्टं रघुनन्दनः ।
मानसाः कार्यकालेषु साहाय्यं मे करिष्यथ ॥ १२ ॥
अथ ते राममामन्त्र्य कृत्वा चापि प्रदक्षिणं ।
एवमस्त्विति चैवोक्त्वा प्रतिजग्मुर्यथागतं ॥ १३ ॥
तान् विसृज्य ततो रामो विश्वामित्रं महामुनिं ।
गच्छन्नेवाथ मधुरं श्लक्ष्णं वचनमब्रवीत् ॥ १४ ॥
किमेतन्मेघसंकाशं पर्वतस्याविदूरतः ।
वृक्षकाण्डमितो भाति परं कौतूहलं हि मे ॥ १५ ॥
दर्शनीयं मृगाकीर्णं मनोहरमतीव च ।
नानाप्रकारैः शकुनैर्वल्गुनादैरलंकृतं ॥ १६ ॥
निःसृताः स्म मुनिश्रेष्ठ कान्ताराद्रोमहर्षणात् ।
अनया त्ववगच्छामि देशस्य सुखवर्त्तया ॥ १७ ॥
सर्वं मे शंस भगवन् कस्याश्रमपदं त्विदं ।
संप्राप्ता यत्र ते पापा ब्रह्मघ्ना दुष्टचारिणः ॥ १८ ॥

Digitized by Google

तव यज्ञस्य विघ्नाय दुरात्मानो महामुने ।
भगवंस्तस्य को देशः सा यत्र तव याज्ञिकी ॥ १९ ॥
रक्षितव्या क्रिया ब्रह्मन् मया बध्याश्च राक्षसाः ।
एतत् सर्वं मुनिश्रेष्ठ श्रोतुमिच्छाम्यहं प्रभो ॥ २० ॥

इति बालकाण्डे संहारप्रदानं नाम त्रिंशः सर्गः ॥ ३० ॥

## CAPUT XXXI.

### Commoratio in eremo consummato.

अथ तस्याप्रमेयस्य तद्वनं परिपृच्छतः ।
विश्वामित्रो महातेजा व्याख्यातुमुपचक्रमे ॥ १ ॥
इह राम महाबाहो विष्णुर्देवनमस्कृतः ।
तपश्चरणयोगार्थमुवास स महातपाः ॥ २ ॥
एष पूर्वाश्रमो राम वामनस्य महात्मनः ।
सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः ॥ ३ ॥
अभिभूय च देवेन्द्रं पुरा वैरोचनिर्बलिः ।
त्रैलोक्यराज्यं बुभुजे बलोत्सेकमदान्वितः ॥ ४ ॥

Digitized by Google

ततो बलौ तदा यज्ञं यजमाने भयार्दिताः ।
इन्द्रादयः सुरगणा विष्णुमूचुरिहाश्रमे ॥ ५ ॥
बलिर्वैरोचनिर्विष्णो यजते ऽसौ महाबलः ।
कामदः सर्वभूतानां महर्द्धिरसुराधिपः ॥ ६ ॥
ये चैनमभिवर्तन्ते याचितार इतस्ततः ।
यच्च यत्र यथावच्च सर्वं तेभ्यः प्रयच्छति ॥ ७ ॥
स त्वं सुरहितार्थाय मायायोगमुपाश्रितः ।
वामनत्वं गतो विष्णो कुरु कल्याणमुत्तमं ॥ ८ ॥
[* एतस्मिन्नन्तरे राम कश्यपो ऽग्निसमप्रभः ।
* अदित्या सहितो राम दीप्यमान इवौजसा ॥ ९ ॥
* देवीसहायो भगवान् दिव्यवर्षसहस्रकं ।
* व्रतं समाप्य वरदं तुष्टाव मधुसूदनं ॥ १० ॥
* तपोमयं तपोराशिं तपोमूर्तिं तपोधनं ।
* तपसा त्वां सुतप्तेन पश्यामि पुरुषोत्तमं ॥ ११ ॥
* शरीरे तव पश्यामि जगत् सर्वमिदं प्रभो ।
* त्वमनादिरनिर्देश्यस्त्वामहं शरणं गतः ॥ १२ ॥
* तमुवाच हरिः प्रीतः कश्यपं धूतकल्मषं ।
* वरं वरय भद्रं ते वरार्हो ऽसि मतो मम ॥ १३ ॥
* तच्छ्रुत्वा वचनं तस्य मारीचः कश्यपो ऽब्रवीत् ।
* पुत्रत्वं गच्छ भगवन्नदित्या मम चानघ ॥ १४ ॥

Digitized by Google

*भ्राता भव यवीयांस्त्वं शक्रस्यासुरसूदन ।
*शोकार्तानां तु देवानां साहाय्यं कर्तुमर्हसि ॥ १५ ॥
*अथ विष्णुर्महातेजा अदित्यां समजायत ।
*छत्री भिक्षुकरूपेण कमण्डलुशिखोज्ज्वलः ] ॥ १६ ॥
एवमुक्तः सुरैर्विष्णुर्वामनं रूपमास्थितः ।
वैरोचनिमुपागम्य त्रीन् ययाचात्मनः क्रमान् ॥ १७ ॥
लब्धा च त्रीन् क्रमान् विष्णुः कृत्वा रूपमथाद्भुतं ।
त्रिभिः क्रमैस्तदा लोकान् आजहार त्रिविक्रमः ॥ १८ ॥
एकेन हि पदा कृत्स्नां पृथिवीं सोऽध्यतिष्ठत ।
द्वितीयेनाव्ययं व्योम द्यां तृतीयेन राघव ॥ १९ ॥
तं चासुरं बलिं कृत्वा पतालतलवासिनं ।
त्रैलोक्यराज्यमिन्द्राय ददावुद्धृत्य कण्टकं ॥ २० ॥
तेनैव पूर्वाध्युषित आश्रमः पुण्यकर्मणा ।
मयापि भक्त्या तस्यैष वामनस्य निषेव्यते ॥ २१ ॥
एनमाश्रममायान्ति राक्षसा विघ्नकारिणः ।
अत्र ते पुरुषव्याघ्र हन्तव्या दुष्टचारिणः ॥ २२ ॥
अद्य गच्छामहे राम सिद्धाश्रममनुत्तमं ।
तदाश्रमपदं तात तवाप्येतद्यथा मम ॥ २३ ॥
इत्युक्त्वा परमप्रीतो गृह्य रामं सलक्ष्मणं ।
प्रविशन्नाश्रमपदं व्यरोचत महामुनिः ॥ २४ ॥

तं दृष्ट्वाभ्यागतं दूरात् सिद्धाश्रमनिवासिनः ।
उत्पत्योत्पत्य सहसा विश्वामित्रमपूजयन् ॥ २५ ॥
प्रविष्टाय ददुश्चास्मै पाद्यार्घ्यासनसत्क्रियां ।
तथैव राजपुत्राभ्यामकुर्वन्नतिथिक्रियां ॥ २६ ॥
मुहूर्तमथ विश्रान्तौ राजपुत्रावरिंदमौ ।
प्राञ्जली मुनिशार्दूलमूचतू रघुनन्दनौ ॥ २७ ॥
अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुंगव ।
सिद्धाश्रमोऽयं सिद्धः स्यात् सत्यमस्तु वचस्तव ॥ २८ ॥
एवमुक्तो महातेजा विश्वामित्रो महान् ऋषिः ।
प्रविवेश तदा दीक्षां नियतो नियतेन्द्रियः ॥ २९ ॥
कुमारावपि तां रात्रिमुषित्वा सुसमाहितौ ।
प्रभातकाले चोत्थाय पूर्वां संध्यामुपास्य च ॥ ३० ॥
स्पृष्ट्वोदकं शुची जाप्यं समाप्य नियमेन च ।
हुताग्निहोत्रमासीनं विश्वामित्रमवन्दतां ॥ ३१ ॥

इति बालकाण्डे सिद्धाश्रमनिवासो नाम एकत्रिंशः सर्गः
॥ ३१ ॥

779/31
810

## CAPUT XXXII.

### VISVAMITRAE SACRIFICIUM.

अथ तौ देशकालज्ञौ राजपुत्रावरिंदमौ ।
कालयुक्तमिदं वाक्यमब्रूतां कौशिकं मुनिं ॥ १ ॥
भगवन् श्रोतुमिच्छावो यस्मिन् काले निशाचरौ ।
संरक्षणीयौ तौ ब्रूहि नातिवर्तेत तत् क्षणं ॥ २ ॥
एवं ब्रुवाणौ काकुत्स्थौ त्वरमाणौ युयुत्सया ।
सर्वे ते मुनयः प्रीताः प्रशशंसुर्नृपात्मजौ ॥ ३ ॥
अद्य प्रभृति षड्रात्रं रक्षतं राघवौ युवां ।
दीक्षां गतो ह्येष मुनिर्मौनित्वं च गमिष्यति ॥ ४ ॥
तौ तु तद्वचनं श्रुत्वा मुनीनां भावितात्मनां ।
अनिद्रौ षडहोरात्रं तपोवनमरक्षतां ॥ ५ ॥
उपासांचक्रतुर्वीरौ यत्तौ परमधन्विनौ ।
ररक्षतुर्मुनिवरं विश्वामित्रमरिंदमौ ॥ ६ ॥
अथ काले गते तस्मिन् षष्ठे ऽहनि समागते ।
सौमित्रिमब्रवीद्रामो यत्तो भव समाहितः ॥ ७ ॥
अद्य पूर्वं महाघोरा राक्षसा न समागताः ।
अस्मिन् दिने महाघोरं रक्षसामावयोर्मृधं ॥ ८ ॥

Digitized by Google

रामस्यैवं ब्रुवाणस्य त्वरितस्य युयुत्सया ।
प्रजज्वाल तदा वेदिः सोपाध्यायपुरोहिता ॥ ९ ॥
सदर्भचमसस्रुक्का ससमित्कुसुमोच्चया ।
मन्त्रवच्च यथान्यायं यज्ञोऽसौ संप्रवर्तते ॥ १० ॥
अथाकाशे महान् शब्दः प्रादुरासीद्भयानकः ।
आवार्य गगणं मेघो यथा प्रावृषि दृश्यते ॥ ११ ॥
तथा मायां विकुर्वाणौ राक्षसावभ्यधावतां ।
मारीचश्च सुवाहुश्च तयोरनुचराश्च ये ॥ १२ ॥
आगम्य भीमसंकाशा रुधिरौघान् अवासृजन् ।
सहसाभिद्रुतान् रामस्तान् अपश्यत् ततो दिवि ॥ १३ ॥
स तान् आपततो दृष्ट्वा रुधिरौघप्रवर्षिणः ।
उवाच लक्ष्मणं वाक्यं रामो राजीवलोचनः ॥ १४ ॥
पश्य लक्ष्मण दुर्वृत्तान् राक्षसान् पिशिताशनान् ।
मानवास्त्रसमाधूतान् अनिलेन यथा घनान् ॥ १५ ॥
इत्युक्त्वा मानवास्त्रं च चापे संधाय वेगवान् ।
चिक्षेप परमक्रुद्धो मारीचोरसि राघवः ॥ १६ ॥
स तेन परमास्त्रेण मानवेन समाहतः ।
संपूर्णं योजनशतं क्षिप्तः सागरसंप्लवे ॥ १७ ॥
विचेतनं विघूर्णन्तं शितेषुबलपीडितं ।
निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत् ॥ १८ ॥

Digitized by Google

पश्य लक्ष्मण शितेषु मानवं मन्त्रसंहितं ।
मोहयित्वा नयत्येनं न च प्राणैर्वियुज्यते ॥ १९ ॥
इमान् अपि बधिष्यामि निर्घृणान् दुष्टचारिणः ।
राक्षसान् पापकर्मस्थान् यज्ञघ्नान् रुधिराशनान् ॥ २० ॥
संगृह्यास्त्रं ततो रामो दीप्तमाग्नेयमुत्तमं ।
सुबाहूरसि चिक्षेप/स विद्धः प्रापतद्भुवि ॥ २१ ॥
शेषान् वायव्यमादाय निजघान महायशाः ।
राघवः परमोदारो मुनीनां मुदमावहन् ॥ २२ ॥
स हत्वा राक्षसान् सर्वान् यज्ञघ्नान् रघुनन्दनः ।
ऋषिभिः पूजितस्तत्र यथेन्द्रो विजये पुरा ॥ २३ ॥
अथ यज्ञे समाप्ते तु विश्वामित्रो महामुनिः ।
निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् ॥ २४ ॥
कृतार्थोऽस्मि महाबाहो कृतं गुरुवचस्त्वया ।
सिद्धाश्रमपदं चेदं भूयः सिद्धतरं कृतं ॥ २५ ॥

इति बालकाण्डे विश्वामित्रयज्ञो नाम द्वात्रिंशः सर्गः
॥ ३२ ॥

81.0
25
83.5

Digitized by Google

## CAPUT XXXIII.

### Commoratio in ripa Soni.

अथ तां रजनीं तत्र कृतार्थौ रामलक्ष्मणौ ।
ऊषतुर्मुदितौ वीरौ प्रहृष्टेनान्तरात्मना ॥ १ ॥
प्रभातायां तु शर्वर्यां कृतपौर्वाह्णिकक्रियौ ।
विश्वामित्रमृषींश्चान्यान् सहितावभिजग्मतुः ॥ २ ॥
अभिवाद्य मुनिश्रेष्ठं ज्वलन्तमिव पावकं ।
ऊचतुर्मधुरोदारं वाक्यं मधुरभाषिणौ ॥ ३ ॥
इमौ स्म नरशार्दूल किंकरौ समुपस्थितौ ।
आज्ञापय यथेष्टं नौ शासनं करवाव किं ॥ ४ ॥
एवमुक्ते तयोर्वाक्ये सर्व एव महर्षयः ।
विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन् ॥ ५ ॥
मैथिलस्य नरश्रेष्ठ जनकस्य भविष्यति ।
यज्ञः परमधर्मिष्ठस्तत्र यास्यामहे वयं ॥ ६ ॥
त्वं चैव नरशार्दूल सहास्माभिर्गमिष्यसि ।
अद्भुतं च धनूरत्नं तत्र त्वं द्रष्टुमर्हसि ॥ ७ ॥
तद्धि पूर्वं नरश्रेष्ठ दत्तं सदसि दैवतैः ।
अप्रमेयबलं घोरं मखे परमभास्वरं ॥ ८ ॥

Digitized by Google

नास्य देवा न गन्धर्वा नासुरा न च राक्षसाः ।
कर्तुमारोपणं शक्ता न कथं नु हि मानवाः ॥ ९ ॥
धनुषस्तस्य वीर्यं हि जिज्ञासन्तो महीक्षितः ।
न शेकुरारोपयितुं राजपुत्रा महाबलाः ॥ १० ॥
तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः ।
तत्र द्रक्ष्यसि काकुत्स्थ यज्ञं च परमाद्भुतं ॥ ११ ॥
तद्धि यज्ञफलं तेन मैथिलेनोत्तमं धनुः ।
याचितं नरशार्दूल सुनाभं सर्वदैवतैः ॥ १२ ॥
आयागभूतं नृपतेस्तस्य वेश्मनि राघव ।
अर्चितं विविधैर्गन्धैर्धूपैश्चागुरुगन्धिभिः ॥ १३ ॥
तथेत्युक्त्वा ततो रामः प्रयातुमुपचक्रमे ।
विश्वामित्रपुरोगैस्तैर्महर्षिभिरुदारधीः ॥ १४ ॥
विश्वामित्रो ऽथ भगवान् आमन्त्र्य वनदेवताः ।
उवाचेदं ततो वाक्यं यियासुर्मिथिलां प्रति ॥ १५ ॥
स्वस्ति वो ऽस्तु गमिष्यामि सिद्धः सिद्धाश्रमादहं ।
उत्तरे जाह्नवीतीरे हिमवन्तं शिलोच्चयं ॥ १६ ॥
प्रदक्षिणमुपावृत्य ततः सिद्धाश्रमं मुनिः ।
उत्तरां दिशमुद्दिश्य प्रस्थातुमुपचक्रमे ॥ १७ ॥
तं व्रजन्तं मुनिवरमन्वीयुरनुसारिणः ।
शकटीशतमात्रं च प्रयाने ब्रह्मवादिनः ॥ १८ ॥

Digitized by Google

मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः ।
अनुजग्मुर्महात्मानं विश्वामित्रं तपोधनं ॥ १९ ॥
ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ।
वासं चक्रुर्मुनिगणाः शोणातीरं समागताः ॥ २० ॥
गते ऽस्तं दिनकरे स्नात्वा हुतहुताशनाः ।
विश्वामित्रं पुरस्कृत्य निषेदुरमितौजसः ॥ २१ ॥
रामो ऽपि सहसौमित्रिरभिवाद्य तपोधनान् ।
निषसादाभितस्तस्य विश्वामित्रस्य धीमतः ॥ २२ ॥
अथ रामो ऽञ्जलिं कृत्वा विश्वामित्रमृषिं तदा ।
पप्रच्छ नरशार्दूलः कौतूहलसमन्वितः ॥ २३ ॥
भगवन् को न्वयं देशः समृद्धजनशोभितः ।
श्रोतुमिच्छामि भद्रं ते वक्तुमर्हसि तत्त्वतः ॥ २४ ॥
चोदितो रामवाक्येन तस्य देशस्य विस्तरं ।
विश्वामित्रो महातेजा व्याहर्तुमुपचक्रमे ॥ २५ ॥

इति बालकाण्डे शोणातीरनिवासो नाम त्रयस्त्रिंशः सर्गः
॥ ३३ ॥

835
25
860

## CAPUT XXXIV.

### Brahmadattis nuptiae.

ब्रह्मयोनिर्महान् आसीत् कुशो नाम जनाधिपः ।
अक्लिष्टव्रतधर्मज्ञः सज्जनप्रतिपूजकः ॥ १ ॥
स महात्मा कुलीनायां जायायां सुमहाबलान् ।
वैदर्भ्यां जनयामास चतुरः सदृशान् सुतान् ॥ २ ॥
कुशाम्बं कुशनाभं च अमूर्तरजसं वसुं ।
दीप्तियुक्तान् महोत्साहान् क्षत्रधर्मचिकीर्षया ॥ ३ ॥
तान् उवाच कुशः पुत्रान् धर्मिष्ठान् सत्यवादिनः ।
क्रियतां पालनं पुत्रा धर्मं प्राप्स्यथ पुष्कलं ॥ ४ ॥
कुशस्य वचनं श्रुत्वा चत्वारो लोकसंमताः ।
निवेशं चक्रिरे सर्वे पुराणां नृवरास्तदा ॥ ५ ॥
कुशाम्बस्तु महातेजा कौशाम्बीमकरोत् पुरीं ।
कुशनाभस्तु धर्मात्मा पुरं चक्रे महोदयं ॥ ६ ॥
अमूर्तरजसो नाम धर्मारण्यं महीपतिः ।
चक्रे पुरवरं राजा वसुर्नाम गिरिव्रजं ॥ ७ ॥
एषा वसुमती राम वसोस्तस्य महात्मनः ।
एते शैलवराः पञ्च प्रकाशन्ते समन्ततः ॥ ८ ॥



Digitized by Google

सुमागधी नदी रम्या मगधान् विश्रुता ययौ ।
पञ्चानां शैलमुख्यानां मध्ये मालेव शोभते ॥ ९ ॥
सैषा हि मागधी नाम वसोस्तस्य महात्मनः ।
पूर्वाभिचरिता राम सुक्षेत्रा सस्यमालिनी ॥ १० ॥
कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमं ।
जनयामास धर्मात्मा घृताच्यां रघुनन्दन ॥ ११ ॥
रूपयौवनशालिन्यस्ताः कदाचित् स्वलंकृताः ।
उद्यानभूमिमागम्य प्रावृषीव शतह्रदाः ॥ १२ ॥
गायन्त्यो नृत्यमानाश्च वादयन्त्यश्च राघव ।
आमोदं परमं जग्मुर्वराभरणभूषिताः ॥ १३ ॥
अथ ताश्चारुसर्वाङ्गी रूपेणाप्रतिमा भुवि ।
दृष्ट्वा सर्वात्मको वायुरिदं वचनमब्रवीत् ॥ १४ ॥
अहं वः कामये सर्वा भार्या मम भविष्यथ ।
मानुष्यस्त्यज्यतां भावो दीर्घमायुरवाप्स्यथ ॥ १५ ॥
चलं हि यौवनं नित्यं मानुषेषु विशेषतः ।
अक्षयं यौवनं प्राप्ता अमर्यश्च भविष्यथ ॥ १६ ॥
तस्य तद्वचनं श्रुत्वा वायोरक्लिष्टकर्मणः ।
अपहास्य ततो वाक्यं कन्याशतमथाब्रवीत् ॥ १७ ॥
अन्तश्चरसि भूतानां सर्वेषां किल मारुत ।
प्रभावज्ञाः स्म ते सर्वाः किमस्मान् अवमन्यसे ॥ १८ ॥

Digitized by Google

कुशनाभसुताः सर्वाः समर्थास्त्र सुरोत्तम ।
स्थानाच्च्यावयितुं देवं रक्षामस्तु कुलं वयं ॥ १९ ॥
मा भूत् स कालो दुर्मेधः पितरं सत्यवादिनं ।
नावमन्य स्वधर्मेण स्वयंवरमुपास्महे ॥ २० ॥
पिता वै प्रभुरस्माकं दैवतं परमं हि सः ।
यस्य नो दास्यति पिता स नो भर्ता भविष्यति ॥ २१ ॥
तासां तद्वचनं श्रुत्वा वायुः परमकोपनः ।
प्रविश्य सर्वगात्राणि बभञ्ज भगवान् प्रभुः ॥ २२ ॥
ताः कन्या वायुना भग्ना विविशुर्नृपतेर्गृहं ।
प्रापतन् भुवि संभ्रान्ताः सलज्जाः साश्रुलोचनाः ॥ २३ ॥
स च ता दयिता दीनाः कन्याः परमशोभनाः ।
दृष्ट्वा भग्नास्तदा राजा संभ्रान्त इदमब्रवीत् ॥ २४ ॥
किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते ।
कुब्जाः केन कृताः सर्वाश्चेष्टन्त्यो नाभिभाषथ ॥ २५ ॥
तस्य तद्वचनं श्रुत्वा कुशनाभस्य धीमतः ।
शिरोभिश्चरणौ स्पृष्ट्वा कन्याशतमभाषत ॥ २६ ॥
वायुः सर्वात्मको राजन् प्रधर्षयितुमिच्छति ।
अशुभं मार्गमास्थाय न धर्मं प्रत्यवेक्षते ॥ २७ ॥
सो ऽस्माभिरुक्तः सर्वाभिर्वायुः कामवशं गतः ।
पितृमत्यः स्म भद्रं ते स्वच्छन्दे न वयं स्थिताः ॥ २८ ॥

Digitized by Google

पितरं नो वृणीष्व त्वं यदि नो दास्यते तव ।
न वयं स्वैरचारिण्यः प्रसीद भगवन्निति ॥ २९ ॥
तेन पापानुबन्धेन वचनं न प्रतीच्छता ।
एवं ब्रुवन्त्यः सर्वाः स्म वायुनाभिहता भृशं ॥ ३० ॥
तासां तु वचनं श्रुत्वा राजा परमधार्मिकः ।
प्रत्युवाच महातेजाः कन्याशतमनुत्तमं ॥ ३१ ॥
क्षान्तं क्षमावतां पुत्र्यः कर्तव्यं सुमहत् कृतं ।
ऐकमत्यमुपागम्य कुलं चावेक्षितं मम ॥ ३२ ॥
अलंकारो हि नारीणां क्षमा तु पुरुषस्य वै ।
दुष्करं तच्च वै क्षान्तं त्रिदशेषु विशेषतः ॥ ३३ ॥
क्षमा दानं क्षमा सत्यं क्षमा यज्ञश्च पुत्रिकाः ।
क्षमा यशः क्षमा धर्मः क्षमायां धिष्ठितं जगत् ॥ ३४ ॥
प्रदानसमयं चैव मन्येऽहं वोऽद्य सर्वशः ।
गम्यतामिष्टतः पुत्र्यश्चिन्तयिष्यामि वो हितं ॥ ३५ ॥
विसृज्य चैव ताः कन्यास्ततः स नृपसत्तमः ।
तासां प्रदानं धर्मज्ञो मन्त्रयामास मन्त्रिभिः ॥ ३६ ॥
यद्वायुना च ताः कन्यास्तत्र कुब्जीकृताः पुरा ।
कन्यकुब्जमिति ख्यातं ततः प्रभृति तत् पुरं ॥ ३७ ॥
एतस्मिन्नेव काले तु चूली नाम महाद्युतिः ।
ऊर्ध्वरेताः शुभाचारो ब्राह्मं तप उपागमत् ॥ ३८ ॥

तपस्यन्तमृषिं तत्र गन्धर्वी पर्युपासत ।
सोमदा नाम भद्रं ते ऊर्मिलातनया तदा ॥ ३९ ॥
सा च तं प्रणता भूत्वा शुश्रूषणपरायणा ।
उवास काले धर्मिष्ठा तस्यास्तुष्टोऽभवद्गुरुः ॥ ४० ॥
स च तां कालयोगेन प्रोवाच रघुनन्दन ।
परितुष्टोऽस्मि भद्रं ते किं करोमि तव प्रियं ॥ ४१ ॥
परितुष्टं मुनिं ज्ञात्वा गन्धर्वी मधुरस्वरा ।
उवाच परमप्रीता वाक्यज्ञा वाक्यकोविदं ॥ ४२ ॥
लक्ष्म्या समुदितो ब्राह्म्या ब्रह्मभूतो महातपाः ।
ब्राह्मेण तपसा युक्तं पुत्रमिच्छामि धार्मिकं ॥ ४३ ॥
अपतिश्चास्मि भद्रं ते भार्या चास्मि न कस्यचित् ।
ब्राह्मणोपगतायास्त्वं दातुमर्हसि मे सुतं ॥ ४४ ॥
तस्याः प्रसन्नो ब्रह्मर्षिर्ददौ पुत्रमनुत्तमं ।
ब्रह्मदत्त इति ख्यातं मानसं चूलिनः सुतं ॥ ४५ ॥
स राजा ब्रह्मदत्तस्तु पुरीमध्यवसत् तदा ।
काम्पिल्यां परया लक्ष्म्या देवराजो यथा दिवं ॥ ४६ ॥
स बुद्धिं कृतवान् राजा कुशनाभः सुधार्मिकः ।
ब्रह्मदत्ताय काकुत्स्थ दातुं कन्याशतं तदा ॥ ४७ ॥
तमाहूय महातेजा ब्रह्मदत्तं महीपतिं ।
ददौ कन्याशतं तस्मै सुप्रीतेनान्तरात्मना ॥ ४८ ॥

Digitized by Google

यथाक्रमं तदा पाणिं जग्राह रघुनन्दन ।
ब्रह्मदत्तो महीपालस्तासां देवपतिर्यथा ॥ ४९ ॥
स्पृष्टमात्रे तदा पाणौ विकुब्जा विगतज्वराः ।
युक्तं परमया लक्ष्म्या बभौ कन्याशतं तदा ॥ ५० ॥
स दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः ।
बभूव परमप्रीतो हर्षं लेभे पुनः पुनः ॥ ५१ ॥
कृतोद्वाहं तु राजानं ब्रह्मदत्तं महीपतिः ।
सदारं प्रेषयामास स्वपुरं परमार्चितं ॥ ५२ ॥
यथान्यायं च गन्धर्वी स्नुषास्ताः प्रत्यनन्दत ।
स्पृष्ट्वा स्पृष्ट्वा च ता कन्याः कुशनाभं प्रशस्य च ॥ ५३ ॥

इति बालकाण्डे ब्रह्मदत्तविवाहो नाम चतुस्त्रिंशः सर्गः
॥ ३४ ॥

Digitized by Google

## CAPUT XXXV.

### STIRPIS VISVAMITRAE PRAECONIUM.

कृतोद्वाहे गते तस्मिन् ब्रह्मदत्ते नराधिपे ।
अपुत्रः कुशनाभो ऽथ पौत्रीमिष्टिमकल्पयत् ॥ १ ॥
इष्ट्यां तु वर्तमानायां कुशनाभं महीपतिं ।
उवाच परमोदारो कुशो ब्रह्मसुतस्तदा ॥ २ ॥
पुत्रस्ते सदृशः पुत्र भविष्यति सुधार्मिकः ।
गाधिः प्राप्स्यसि येन त्वं कीर्तिं लोकेषु शाश्वतीं ॥ ३ ॥
एवमुक्त्वा कुशो राम कुशनाभं महीपतिं ।
जगामाकाशमाविश्य ब्रह्मलोकं सनातनं ॥ ४ ॥
कस्यचित् त्वथ कालस्य कुशनाभस्य धीमतः ।
जज्ञे परमधर्मिष्ठो गाधिरित्येव नामतः ॥ ५ ॥
स पिता मम धर्मात्मा गाधिः सत्यपराक्रमः ।
कुशवंशप्रसूतो ऽस्मि गाधिजो रघुनन्दन ॥ ६ ॥
पूर्वजा भगिनी चापि मम राघव सुव्रता ।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥ ७ ॥
सशरीरा गता स्वर्गं भर्तारमनुवर्तिनी ।
कौशिकी परमोदारा सा प्रवृत्ता महानदी ॥ ८ ॥

Digitized by Google

दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता ।
लोकस्य हितकामार्थं प्रवृत्ता भगिनी मम ॥ ९ ॥
ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखं ।
भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन ॥ १० ॥
सा तु सत्यवती पुण्या सत्यधर्मे प्रतिष्ठिता ।
पतिव्रता महाभागा कौशिकी सरितां वरा ॥ ११ ॥
अहं हि नियमाद्राम हित्वा तां समुपागतः ।
सिद्धाश्रममनुप्राप्य सिद्धोऽस्मि तव तेजसा ॥ १२ ॥
एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता ।
देशस्य च महाबाहो यन्मां त्वं परिपृच्छसि ॥ १३ ॥
गतोऽर्धरात्रः काकुत्स्थ कथाः कथयतो मम ।
निद्रामभ्येहि भद्रं ते मा भूद्विघ्नोऽध्वनीह नः ॥ १४ ॥
निष्पन्दास्तरवः सर्वे निलीना मृगपक्षिणः ।
नैशेन तमसा व्याप्ता दिशश्च रघुनन्दन ॥ १५ ॥
शनैर्वियुज्यते संध्या नभो नेत्रैरिवावृतं ।
नक्षत्रताराग्रहनं ज्योतिर्भिरवभासते ॥ १६ ॥
उत्तिष्ठते च शीतांशुः शशी लोकतमोनुदः ।
ह्लादयन् प्राणिनां लोके मनांसि प्रभया स्वया ॥ १७ ॥
नैशानि सर्वभूतानि प्रचरन्ति ततस्ततः ।
यक्षराक्षससंघाश्च रौद्राश्च पिशिताशनाः ॥ १८ ॥

Digitized by Google

एवमुक्त्वा महातेजा विरराम महामुनिः ।
साधु साध्विति ते सर्वे मुनयो ह्यभ्यपूजयन् ॥ १९ ॥
कौशिकानामयं वंशो महान् धर्मपरः सदा ।
ब्रह्मोपमा महात्मानः कुशवंश्या नरोत्तमाः ॥ २० ॥
विशेषेण भवान् एव विश्वामित्रो महायशाः ।
कौशिकी सरितां श्रेष्ठा कुलोद्द्योतकरी तव ॥ २१ ॥
इति तैर्मुनिशार्दूलैः प्रशस्तः कुशिकात्मजः ।
निद्रामुपागमच्छ्रीमान् अस्तं गत इवांशुमान् ॥ २२ ॥
रामोऽपि सहसौमित्रिः किंचिदागतविस्मयः ।
प्रशस्य मुनिशार्दूलं निद्रां समुपसेवते ॥ २३ ॥

इति बालकाण्डे विश्वामित्रवंशकीर्तनं नाम पञ्चत्रिंशः सर्गः ॥ ३५ ॥

---

Digitized by Google

## CAPUT XXXVI.

### Nymphae Gangae origo.

उपास्य रात्रिशेषं तु शोणाकूले महर्षिभिः ।
निशायां सुप्रभातायां विश्वामित्रो ऽभ्यभाषत ॥ १ ॥
सुप्रभाता निशा राम पूर्वा संध्या प्रवर्तते ।
उत्तिष्ठोत्तिष्ठ भद्रं ते गमनायाभिरोचय ॥ २ ॥
तच्छ्रुत्वा वचनं तस्य कृत्वा पौर्वाह्णिकीं क्रियां ।
गमनं रोचयामास वाक्यं चेदमुवाच ह ॥ ३ ॥
अयं शोणः शुभजलो ऽगाधः पुलिनमण्डितः ।
कतरेण पथा ब्रह्मन् संतरिष्यामहे वयं ॥ ४ ॥
एवमुक्तस्तु रामेण विश्वामित्रो ऽब्रवीदिदं ।
एष पन्था मयोद्दिष्टो येन यान्ति महर्षयः ॥ ५ ॥
ते गत्वा दूरमध्वानं गते ऽर्धदिवसे तदा ।
जाह्नवीं सरितां श्रेष्ठां ददृशुर्मुनिसेवितां ॥ ६ ॥
तां दृष्ट्वा पुण्यसलिलां हंससारससेवितां ।
बभूवुर्मुनयः सर्वे मुदिताः सहराघवाः ॥ ७ ॥
तस्यास्तीरे तदा सर्वे चक्रुर्वासपरिग्रहं ।
ततः स्नात्वा यथान्यायं संतर्प्य पितृदेवताः ॥ ८ ॥

Digitized by Google

हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः ।
विविशुर्जाह्नवीतीरे शुभा मुदितमानसाः ॥ ९ ॥
विश्वामित्रं महात्मानं परिवार्य समन्ततः ।
विष्ठितास्ते यथान्यायं राघवौ च यथार्हतः ॥ १० ॥
संप्रहृष्टमना रामो विश्वामित्रमथाब्रवीत् ।
भगवन् श्रोतुमिच्छामि गङ्गां त्रिपथगां नदीं ॥ ११ ॥
चोदितो रामवाक्येन विश्वामित्रो महामुनिः ।
वृद्धिं जन्म च गङ्गाया वक्तुमेवोपचक्रमे ॥ १२ ॥
शैलेन्द्रो हिमवान् नाम धातूनामाकरो महान् ।
तस्य कन्याद्वयं जातं रूपेणाप्रतिमं भुवि ॥ १३ ॥
या मेरुदुहिता राम तयोर्माता सुमध्यमा ।
नाम्ना मेना मनोज्ञा वै पत्नी हिमवतः प्रिया ॥ १४ ॥
तस्यां गङ्गेयमभवज्ज्येष्ठा हिमवतः सुता ।
उमा नाम द्वितीयाभूत् कन्या तस्यैव राघव ॥ १५ ॥
अथ ज्येष्ठां सुराः सर्वे देवकार्यचिकीर्षया ।
शैलेन्द्रं वरयामासुर्गङ्गां त्रिपथगां नदीं ॥ १६ ॥
ददौ धर्मेण हिमवांस्तनयां लोकपावनीं ।
स्वच्छन्दपथगां गङ्गां त्रैलोक्यहितकाम्यया ॥ १७ ॥
प्रतिगृह्य च गङ्गां ते त्रैलोक्यपथचारिणीं ।
यथागतं ययुर्देवाः कृतार्थेनान्तरात्मना ॥ १८ ॥

Digitized by Google

या चान्या शैलदुहिता कन्यासीद्रघुनन्दन ।
उग्रं सा व्रतमास्थाय तपस्तेपे तपोधना ॥ १९ ॥
उग्रेण तपसा युक्तां ददौ शैलवरः सुतां ।
रुद्रायाप्रतिरूपाय उमां लोकनमस्कृतां ॥ २० ॥
इत्येते शैलराजस्य सुते राम बभूवतुः ।
गङ्गा च सरितां श्रेष्ठा देवीनां चाप्युमा वरा ॥ २१ ॥
सैषा सुरनदी रम्या शैलेन्द्रस्य सुता तदा ।
सुरलोकं समारूढा विपापा जलवाहिनी ॥ २२ ॥

इति बालकाण्डे गङ्गोत्पत्तिर्नाम षट्त्रिंशः सर्गः ॥ ३६ ॥

---

## CAPUT XXXVII.

### Umae magnanimitas.

उक्तवाक्ये मुनौ तस्मिन्नुभौ राघवलक्ष्मणौ ।
प्रतिनन्द्य कथां वीरावूचतुर्मुनिपुङ्गवं ॥ १ ॥
धर्मयुक्तमिदं ब्रह्मन् कथितं परमं त्वया ।
दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि ॥ २ ॥

त्रीन् पथो हेतुना केन प्लावयेल्लोकपावनी ।
त्रिषु लोकेषु धर्मज्ञ कर्मभिः कैः समन्विता ॥ ३ ॥
तथा ब्रुवति काकुत्स्थे विश्वामित्रस्तपोधनः ।
निखिलेन कथां सर्वामृषिमध्ये न्यवेदयत् ॥ ४ ॥
पुरा राम कृतोद्वाहः शितिकण्ठो महातपाः ।
उमा च स्पर्धया देवी मैथुनायोपचक्रतुः ॥ ५ ॥
तस्य संक्रीडमानस्य महादेवस्य धीमतः ।
शितिकण्ठस्य देव्याश्च दिव्यं वर्षशतं गतं ॥ ६ ॥
एवं मन्मथयुद्धे तु तयोर्नासीत् पराजयः ।
न चापि तनयो राम तस्यामासीत् परंतप ॥ ७ ॥
ततो देवाः समुद्विग्नाः पितामहपुरोगमाः ।
यदिहोत्पद्यते भूतं कस्तत् प्रतिसहिष्यते ॥ ८ ॥
तेऽभिगम्य सुराः सर्वे प्रणिपत्य वृषध्वजं ।
शितिकण्ठं महात्मानमिदं वचनमब्रुवन् ॥ ९ ॥
देवदेव महाभाग सर्वभूतहिते रतः ।
सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि ॥ १० ॥
न लोका धारयिष्यन्ति तव तेजः सुरोत्तम ।
ब्राह्मेण तपसा युक्तो देव्या सह तपश्चर ॥ ११ ॥
त्रैलोक्यहितकामार्थं तेजस्तेजसि धारय ।
रक्ष सर्वान् इमान् लोकान् नालोकं कर्तुमर्हसि ॥१२॥

Digitized by Google

देवतानां वचः श्रुत्वा सर्वलोकमहेश्वरः ।
बाढमित्यब्रवीत् सर्वान् पुनश्चेदमुवाच ह ॥ १३ ॥
धारयिष्याम्यहं तेजस्तेजस्येव सहोमया ।
त्रिदशाः पृथिवी चैव निर्वाणमधिगच्छतु ॥ १४ ॥
यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमं ।
धारयिष्यति कस्तन्मे ब्रुवन्तु सुरसत्तमाः ॥ १५ ॥
एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजं ।
यत् तेजः क्षुभितं ह्यद्य तद्धरा धारयिष्यति ॥ १६ ॥
एवमुक्तः सुरपतिः प्रमुमोच महीतले ।
तेजसा पृथिवी येन व्याप्ता सगिरिकानना ॥ १७ ॥
ततो देवाः पुनरिदमूचुश्चापि हुताशनं ।
आविश त्वं महातेजो रौद्रं वायुसमन्वितः ॥ १८ ॥
. . . . . . . . . . . ।
तदग्निना पुनर्व्याप्तं तज्जातः श्वेतपर्वतः ॥ १९ ॥
दिव्यं शरवणं चैव पावकादित्यसंनिभं ।
यत्र जातो महातेजाः कार्त्तिकेयोऽग्निसंभवः ॥ २० ॥
अथोमां च शिवं चैव देवा ऋषिगणास्तथा ।
पूजयामासुरत्यर्थं सुप्रीतमनसस्ततः ॥ २१ ॥
अथ शैलसुता राम त्रिदशान् अभिवीक्ष्य तान् ।
समन्युरशपत् सर्वान् क्रोधसंरक्तलोचना ॥ २२ ॥

Digitized by Google

यस्मान्निवारिता चाहं संगता पुत्रकाम्यया ।
अद्य प्रभृति युष्माकमप्रजाः सन्तु पत्नयः ॥ २३ ॥
एवमुक्त्वा सुरान् सर्वान् शशाप पृथिवीमपि ।
अवने नैकरूपा त्वं बहुभार्या भविष्यसि ॥ २४ ॥
न च पुत्रकृतां प्रीतिं मत्क्रोधकलुषीकृता ।
प्राप्स्यसि त्वं सुदुर्मेधो मम पुत्रमनिच्छती ॥ २५ ॥
तान् सर्वान् व्रीडितान् दृष्ट्वा सुरान् सुरपतिस्तदा ।
गमनायोपचक्राम दिशं वरुणपालितां ॥ २६ ॥
स गत्वा तप आतिष्ठत् पार्श्वे तस्योत्तरे गिरेः ।
हिमवत्प्रभवे शृङ्गे सह देव्या महेश्वरः ॥ २७ ॥
एष ते विस्तरो राम शैलपुत्र्या निवेदितः ।
गङ्गायाः प्रभवं चैव शृणु मे सहलक्ष्मण ॥ २८ ॥

इति बालकाण्डे उमामाहात्म्यं नाम सप्तत्रिंशः सर्गः
॥ ३७ ॥

Digitized by Google

## CAPUT XXXVIII.

### CARTICEII GENERATIO.

तपस्तप्यति देवेशे त्र्यम्बके विबुधास्ततः ।
सेनापतिमभीप्सन्तः पितामहमुपागमन् ॥ १ ॥
अब्रुवंश्च सुराः सर्वे भगवन्तं पितामहं ।
प्रणिपत्य शुभं वाक्यं सेन्द्राः साग्निपुरोगमाः ॥ २ ॥
यो नः सेनापतिर्देव दत्तो भगवता पुरा ।
स तपः परमास्थाय तप्यते स्म सहोमया ॥ ३ ॥
यदत्रानन्तरं कार्यं लोकानां हितकाम्यया ।
संविधत्स्व विधानज्ञ त्वं हि नः परमा गतिः ॥ ४ ॥
देवतानां वचः श्रुत्वा सर्वलोकपितामहः ।
सान्त्वयन् मधुरैर्वाक्यैस्त्रिदशान् इदमब्रवीत् ॥ ५ ॥
शैलपुत्र्या यदुक्तं तन्न प्रजास्यथ पत्निषु ।
तस्या वचनमक्लिष्टं सत्यमेव न संशयः ॥ ६ ॥
इयमाकाशगा गङ्गा यस्यां पुत्रं हुताशनः ।
जनयिष्यति देवानां सेनापतिमरिंदमं ॥ ७ ॥
ज्येष्ठा शैलेन्द्रदुहिता मानयिष्यति तं सुतं ।
उमायास्तद्बहुमतं भविष्यति न संशयः ॥ ८ ॥

Digitized by Google

तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनन्दन ।
प्रणिपत्य सुराः सर्वे पितामहमपूजयन् ॥ ९ ॥
ते गत्वा पर्वतं राम कैलाशं धातुमण्डितं ।
अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः ॥ १० ॥
देवकार्यमिदं देव समाधत्स्व हुताशनं ।
शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज ॥ ११ ॥
देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः ।
गर्भं धारय वै देवि देवतानामिदं प्रियं ॥ १२ ॥
इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत् ।
. . . . . . . . . . ॥ १३ ॥
स तस्या महिमां दृष्ट्वा समन्तादवकीर्यत ।
समन्ततस्तु तां देवीमभ्यषिञ्चत पावकः ॥ १४ ॥
सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन ।
तमुवाच ततो गङ्गा सर्वदेवपुरोहितं ॥ १५ ॥
अशक्ता धारणे देव तेजस्तव समुद्धतं ।
दह्यमानाग्निना तेन संप्रव्यथितचेतना ॥ १६ ॥
अथाब्रवीदिदं गङ्गां सर्वदेवहुताशनः ।
इह हैमवते पादे गर्भोऽयं संनिवेश्यतां ॥ १७ ॥
श्रुत्वा त्वग्निवचो गङ्गा तं गर्भमतिभास्वरं ।
उत्ससर्ज महत् तेजः स्रोतोभ्यो हि तदानघ ॥ १८ ॥



Digitized by Google

यदिदं निर्गतं तस्यास्तप्तजाम्बूनदप्रभं ।
काञ्चनं धरणीं प्राप्तं हिरण्यमभवत् तदा ॥ १९ ॥
ताम्रं कार्ष्णायसं चापि तैक्ष्ण्यादेवाभ्यजायत ।
मलं तस्याभवत् तत्र त्रपु सीसकमेव च ॥ २० ॥
निःक्षिप्तमात्रे गर्भे तु तेजोभिरभिरञ्जितं ।
सर्वं पर्वतसंनद्धं सौवर्णमभवद्वनं ॥ २१ ॥
जातरूपमिति ख्यातं तदा प्रभृति राघव ।
सौवर्णं प्रादुरभवद्वह्नितेजोभवं शुचि ॥ २२ ॥
तं कुमारं ततो जातं दृष्ट्वा सेन्द्रा मरुद्गणाः ।
क्षीरसंभावनार्थाय कृत्तिकाः संन्ययोजयन् ॥ २३ ॥
ताः क्षीरं जातमात्रस्य कृत्वा समयमुत्तमं ।
ददुः पुत्रोऽयमस्माकं सर्वासामिति निश्चिताः ॥ २४ ॥
ततस्तु देवताः सर्वाः कार्त्तिकेय इति ब्रुवन् ।
पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः ॥ २५ ॥
तेषां तद्वचनं श्रुत्वा स्कन्नं गर्भपरिस्रवे ।
स्नापयन् परया लक्ष्म्या दीप्यमानं यथानलं ॥ २६ ॥
स्कन्द इत्यब्रुवन् देवाः स्कन्नं गर्भपरिस्रवे ।
कार्त्तिकेयं महाबाहुं काकुत्स्थ ज्वलनोपमं ॥ २७ ॥
प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमं ।
षण्णां षडाननो भूत्वा जग्राह स्तनजं पयः ॥ २८ ॥

गृहीत्वा क्षीरमेकाह्ना सुकुमारवपूस्तदा ।
अजयत् स्वेन वीर्येण दैत्यसैन्यगणान् विभुः ॥ २९ ॥
सुरसेनागणपतिमभ्यषिञ्चन् महाद्युतिं ।
ततस्तममराः सर्वे समेत्याग्निपुरोगमाः ॥ ३० ॥
एष ते राम गङ्गायाः विस्तरोऽभिहितो मया ।
कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च ॥ ३१ ॥

इति बालकाण्डे कुमारोत्पत्तिर्नाम अष्टात्रिंशः सर्गः
॥ ३८ ॥

---

## CAPUT XXXIX.

### SAGARIDARUM PROCREATIO.

तां तथा कौशिको रामे निवेद्य मधुरां कथां ।
पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत् ॥ १ ॥
अयोध्याधिपतिर्वीर पूर्वमासीन्नराधिपः ।
सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजाः ॥ २ ॥
विदर्भराजदुहिता केशिनी नाम नामतः ।
ज्येष्ठा सगरपत्नी सा धर्मिष्ठा सत्यवादिनी ॥ ३ ॥

अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ।
द्वितीया सगरस्यासीत् पत्नी सुमतिसंज्ञिता ॥ ४ ॥
ताभ्यां सह महाराजः पत्नीभ्यां तप्तवांस्तपः ।
हिमवन्तं समाश्रित्य भृगुप्रस्रवणे गिरौ ॥ ५ ॥
अथ वर्षशते पूर्णे तपसाराधितो मुनिः ।
सगराय वरं प्रादाद्भृगुः सत्यवतां वरः ॥ ६ ॥
अपत्यलाभः सुमहान् भविष्यति तवानघ ।
कीर्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ ॥ ७ ॥
एका जनयिता तात पुत्रं वंशकरं तव ।
षष्टिं पुत्रसहस्राणि अपरा जनयिष्यति ॥ ८ ॥
भाषमाणं नरव्याघ्रं राजपुत्र्यौ प्रसाद्य तं ।
ऊचतुः परमप्रीते कृताञ्जलिपुटे तदा ॥ ९ ॥
एकः कस्याः सुतो ब्रह्मन् का बहून् जनयिष्यति ।
श्रोतुमिच्छावहे सम्यक् सत्यमस्तु वचस्तव ॥ १० ॥
तयोस्तद्वचनं श्रुत्वा भृगुः परमधार्मिकः ।
उवाच मधुरां वाणीं स्वच्छन्दोऽत्र विधीयतां ॥ ११ ॥
एको वंशकरो वास्तु बहवो वा महाबलाः ।
कीर्तिमन्तो महोत्साहाः का वां कं वरमिच्छति ॥ १२ ॥
मुनेस्तु वचनं श्रुत्वा केशिनी रघुनन्दन ।
पुत्रं वंशकरं राम जग्राह नृपसंनिधौ ॥ १३ ॥

Digitized by Google

षष्टिं पुत्रसहस्राणि सुपर्णभगिनी तदा ।
महोत्साहान् कीर्तिमतो जग्राह सुमतिः सुतान् ॥ १४ ॥
प्रदक्षिणमृषिं कृत्वा शिरसाभिप्रणम्य तं ।
जगाम स्वपुरं राजा सभार्यो रघुनन्दन ॥ १५ ॥
अथ काले गते तस्य ज्येष्ठा पुत्रं व्यजायत ।
असमञ्ज इति ख्यातं केशिनी सगरात्मजं ॥ १६ ॥
सुमतिस्तु नरव्याघ्र गर्भ तुम्बं व्यजायत ।
षष्टिः पुत्रसहस्राणि तुम्बभेदाद्विनिःसृताः ॥ १७ ॥
घृतपूर्णेषु कुम्भेषु धात्र्यस्तान् समवर्धयन् ।
ते च कालेन महता यौवनं प्रतिपेदिरे ॥ १८ ॥
समानवयसः सर्वे तुल्यवीर्यपराक्रमाः ।
षष्टिः पुत्रसहस्राणि सगरस्याभवंस्तदा ॥ १९ ॥
स च ज्येष्ठो नरश्रेष्ठ सगरस्यात्मसंभवः ।
स राज्यस्थोऽभवत् तेषामसमञ्जः परंतपः ॥ २० ॥
बालान् गृहीत्वा तु जले सरय्वा रघुनन्दन ।
प्रक्षिप्य प्राहसन्नित्यं मज्जतस्तान् समीक्ष्य वै ॥ २१ ॥
एवं पापसमाचारः सज्जनप्रतिबाधकः ।
पौराणामहिते युक्तः पित्रा निर्वासितः पुरात् ॥ २२ ॥
तस्य पुत्रोऽंशुमान् नाम असमञ्जस्य वीर्यवान् ।
संमतः सर्वलोकस्य सर्वस्यापि प्रियंवदः ॥ २३ ॥

ततः कालेन महता मतिः समभिजायत ।
सगरस्याश्वमेधेन यजेयमिति राघव ॥ २४ ॥
स कृत्वा निश्चयं राजा सोपाध्यायगणस्तदा ।
यज्ञकर्मणि वेदज्ञो यष्टुं समुपचक्रमे ॥ २५ ॥

इति बालकाण्डे सगरपुत्रजन्म नाम एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

---

## CAPUT XL.

### TERRA EFFOSSA.

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः ।
उवाच परमप्रीतो मुनिं दीप्तमिवानलं ॥ १ ॥
श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमां ।
पूर्वजो मे कथं ब्रह्मन् यज्ञं वै समुपाहरत् ॥ २ ॥
विश्वामित्रस्तु काकुत्स्थमुवाच प्रहसन्निव ।
श्रूयतां विस्तरो राम सगरस्य महात्मनः ॥ ३ ॥
शङ्करश्वशुरः श्रीमान् हिमवान् अचलोत्तमः ।
विन्ध्यश्च स्पर्धयान्योन्यं यत्र देशे निरीक्षतः ॥ ४ ॥

तयोर्मध्ये प्रवृत्तो ऽभूत् स यज्ञः पुरुषोत्तम ।
स हि देशो महापुण्यः प्रशस्तो यज्ञकर्मणि ॥ ५ ॥
तस्याश्वचर्यां काकुत्स्थ दृढधन्वा महारथः ।
अंशुमान् अकरोत् तात सगरस्य मते स्थितः ॥ ६ ॥
तस्य पर्वणि तं यज्ञं यजमानस्य वासवः ।
राक्षसीं तनुमास्थाय यज्ञियाश्वमपाहरत् ॥ ७ ॥
ह्रियमाणे तु काकुत्स्थ तस्मिन्नश्वे महात्मनः ।
उपाध्यायगणाः सर्वे यजमानमथाब्रुवन् ॥ ८ ॥
अयं पर्वणि वेगेन यज्ञियाश्वो ऽपनीयते ।
हत्वा तमश्वहर्तारं तमेवाश्वं त्वमानय ॥ ९ ॥
यज्ञच्छिद्रं भवत्येतत् सर्वेषामशिवाय नः ।
तत् तथा क्रियतां राजन् यथाच्छिद्रः क्रतुर्भवेत् ॥ १० ॥
उपाध्यायवचः श्रुत्वा तस्मिन् सदसि पार्थिवः ।
षष्टिं पुत्रसहस्राणि समाहूयेदमब्रवीत् ॥ ११ ॥
गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः ।
मन्त्रपूतैर्महाभागैरास्थितो हि महाक्रतुः ॥ १२ ॥
यो ऽसौ रसातलगतो यदिवाप्यन्तर्जले स्थितः ।
तं हत्वानयताश्वं मे पुत्रका भद्रमस्तु वः ॥ १३ ॥
समुद्रमालिनीं कृत्स्नां पृथिवीमनुगच्छत ।
प्रोत्खनध्वं प्रयत्नेन यावत् तुरगदर्शनं ॥ १४ ॥

Digitized by Google

एकैकं योजनं भूमेर्निर्भिन्दन्तो ऽनुगच्छत ।
अस्माकमश्वहर्तारं मार्गमाणा ममाज्ञया ॥ १५ ॥
दीक्षितः पौत्रसहितः सोपाध्यायगणास्त्वहं ।
इह स्थास्यामि भद्रं वो यावत् तुरगदर्शनं ॥ १६ ॥
ते सर्वे हृष्टमनसो राजपुत्रा महाबलाः ।
जग्मुर्महीतलं राम पितृवचनयन्त्रिताः ॥ १७ ॥
योजनायामविस्तारमेकैको धरणीतलं ।
बिभिदुः पुरुषव्याघ्रा वज्रस्पर्शसमैर्भुजैः ॥ १८ ॥
शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः ।
भिद्यमाना वसुमती नैरार्तेव ननाद सा ॥ १९ ॥
नागानां बध्यमानानामसुराणां च राघव ।
राक्षसानां च दुर्धर्षः सत्त्वानां निनदो ऽभवत् ॥ २० ॥
योजनानां सहस्राणि षष्टिं तु रघुनन्दन ।
बिभिदुर्धरणीं क्रुद्धाः सर्वे यावद्रसातलं ॥ २१ ॥
एवं पर्वतसंबाधं जम्बुद्वीपं नृपात्मजाः ।
खनन्तो नृपशार्दूल सर्वतः परिचक्रमुः ॥ २२ ॥
ततो देवाः सगन्धर्वाः सासुराः सहपन्नगाः ।
संभ्रान्तमनसः सर्वे पितामहमुपागमन् ॥ २३ ॥
ते प्रसाद्य महात्मानं विषण्णवदनास्तदा ।
ऊचुः परमसंत्रस्ताः पितामहमिदं वचः ॥ २४ ॥

Digitized by Google

भगवन् पृथिवी सर्वा खन्यते सगरात्मजैः ।
खनद्भिश्चैव तैर्ब्रह्मन् महासत्त्ववधः कृतः ॥ २५ ॥
अयं यज्ञहरो ऽस्माकमनेनाश्वो ऽपनीयते ।
इति ते सर्वभूतानि निघ्नन्ति सगरात्मजाः ॥ २६ ॥

इति बालकाण्डे पृथिवीविदारणं नाम चत्वारिंशः सर्गः
॥ ४० ॥

1078
26
1104

## CAPUT XLI.

### CAPILI CONSPECTUS.

देवतानां वचः श्रुत्वा भगवान् वै पितामहः ।
प्रत्युवाच सुसंत्रस्तान् कृतान्तबलमोहितान् ॥ १ ॥
यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः ।
महिषी माधवस्येष्टा स एष भगवान् प्रभुः ॥ २ ॥
कापिलं रूपमास्थाय धारयत्यनिशं धरां ।
तस्य कोपाग्निना दग्धा भविष्यन्ति नृपात्मजाः ॥ ३ ॥
पृथिव्याश्चापि निर्भेदो दृष्ट एव सनातनः ।
सगरस्य च पुत्राणां विनाशो दीर्घदर्शिना ॥ ४ ॥

Digitized by Google

पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिंदम ।
देवाः परमसंहृष्टाः पुनर्जग्मुर्यथागतं ॥ ५ ॥
सगरस्य च पुत्राणां प्रादुरासीन्महौजसां ।
पृथिव्यां भिद्यमानायां निर्घातसमनिस्वनः ॥ ६ ॥
ततो भित्त्वा महीं कृत्स्नां कृत्वा चापि प्रदक्षिणां ।
उपेत्य सागराः सर्वे पितरं वाक्यमब्रुवन् ॥ ७ ॥
परिक्रान्ता मही सर्वा सत्ववन्तश्च सूदिताः ।
देवदानवरक्षांसि पिशाचोरगपन्नगाः ॥ ८ ॥
न च पश्यामहे ऽश्वं ते अश्वहर्तारमेव च ।
किं करिष्यामो भद्रं ते बुद्धिरत्र विचार्यतां ॥ ९ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां राजसत्तमः ।
समन्युरब्रवीद्वाक्यं सगरो रघुनन्दन ॥ १० ॥
भूयः खनत भद्रं वो निर्भिद्य वसुधातलं ।
अश्वहर्तारमासाद्य कृतार्थाश्च निवर्तत ॥ ११ ॥
पितुर्वचनमास्थाय सगरस्य महात्मनः ।
षष्टिः पुत्रसहस्राणि रसातलमभिद्रवन् ॥ १२ ॥
खन्यमाने ततस्तस्मिन् ददृशुः पर्वतोपमं ।
दिशागजं विरूपाक्षं धारयन्तं महीतलं ॥ १३ ॥
सपर्वतवनां कृत्स्नां पृथिवीं रघुनन्दन ।
शिरसा धारयामास विरूपाक्षो महागजः ॥ १४ ॥

Digitized by Google

यदा पर्वणि काकुत्स्थ विश्रामार्थं महागजः ।
खेदाच्चालयते शीर्षं भूमिकम्पस्तदा भवेत् ॥ १५ ॥
तं ते प्रदक्षिणं कृत्वा दिशापालं महागजं ।
मानयन्तो हि ते राम जग्मुर्भित्वा रसातलं ॥ १६ ॥
ततः पूर्वां दिशं हित्वा दक्षिणां बिभिदुः पुनः ।
दक्षिणस्यामपि दिशि ददृशुस्ते गजोत्तमं ॥ १७ ॥
महापद्मं महानागं तिष्ठन्तं पर्वतोपमं ।
शिरसा धारयन्तं गां ते दृष्ट्वा विस्मयं गताः ॥ १८ ॥
ते तं प्रदक्षिणं कृत्वा सगरस्य महात्मनः ।
षष्टिः पुत्रसहस्राणि पश्चिमां बिभिदुर्दिशं ॥ १९ ॥
पश्चिमायामपि दिशि महान्तमचलोपमं ।
दिशागजं सौमनसं ददृशुस्ते महाबलाः ॥ २० ॥
ते तं प्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयं ।
खनन्तः समुपाक्रान्ता दिशं सोमवतीं तदा ॥ २१ ॥
उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपाण्डुरं ।
भद्रं भद्रेण वपुषा धारयन्तं महीमिमां ॥ २२ ॥
समालभ्य ततः सर्वे कृत्वा चैनं प्रदक्षिणं ।
षष्टिः पुत्रसहस्राणि बिभिदुर्वसुधातलं ॥ २३ ॥
ततः प्रागुत्तरां गत्वा सागराः प्रथितां दिशं ।
रोषादभ्यखनन् सर्वे पृथिवीं सगरात्मजाः ॥ २४ ॥

Digitized by Google

ते तु सर्वे महात्मानो भीमवेगा महाबलाः ।
ददृशुः कपिलं तत्र वासुदेवं सनातनं ॥ २५ ॥
हयं च तस्य देवस्य चरन्तमविदूरतः ।
प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनन्दन ॥ २६ ॥
ते तं हयहरं मत्वा क्रोधपर्याकुलेक्षणाः ।
अभ्यधावन्त संक्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् ॥ २७ ॥
अस्माकं त्वं हि तुरगं यज्ञियं हृतवान् असि ।
दुर्मेधस्त्वं हि संप्राप्तान् विद्धि नः सगरात्मजान् ॥ २८ ॥
श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ।
रोषेण महताविष्टो हुंकारमकरोत् तदा ॥ २९ ॥
ततस्तेनाप्रमेयेण कपिलेन महात्मना ।
भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः ॥ ३० ॥

इति बालकाण्डे कपिलदर्शनं नाम एकचत्वारिंशः सर्गः
॥ ४१ ॥

1104
30
1134

Digitized by Google

## CAPUT XLII.

### PROCURATIO SACRIFICII A SAGARO SUSCEPTI.

पुत्रांश्चिरगतान् ज्ञात्वा सगरो रघुनन्दन ।
नप्तारमब्रवीद्राजा दीप्यमानं स्वतेजसा ॥ १ ॥
शूरश्च कृतविद्यश्च पूर्वैस्तुल्योऽसि तेजसा ।
पितॄणां गतिमन्विच्छ येन चाश्वोऽपहारितः ॥ २ ॥
अन्तर्भौमानि सत्त्वानि वीर्यवन्ति महान्ति च ।
तेषां त्वं प्रतिघातार्थं सासिं गृह्णीष्व कार्मुकं ॥ ३ ॥
अभिवाद्याभिवाद्यांस्त्वं हत्वा विघ्नकरान् अपि ।
सिद्धार्थः संनिवर्तस्व मम यज्ञस्य पारगः ॥ ४ ॥
एवमुक्तोऽंशुमान् सम्यक् सगरेण महात्मना ।
धनुरादाय खड्गं च जगाम लघुविक्रमः ॥ ५ ॥
स खातं पितृभिर्मार्गमन्तर्भौमं महात्मभिः ।
प्रापद्यत नरश्रेष्ठ तेन राज्ञाभिचोदितः ॥ ६ ॥
देवदानवरक्षोभिः पिशाचपतगोरगैः ।
पूज्यमानं महातेजा दिशागजमपश्यत ॥ ७ ॥
स तं प्रदक्षिणं कृत्वा पृष्ट्वा चैव निरामयं ।
पितॄंस्तान् परिपप्रच्छ वाजिहर्तारमेव च ॥ ८ ॥
दिशागजस्तु तच्छ्रुत्वा प्रत्युवाच महामतिं ।
आसमञ्ज कृतार्थस्त्वं सहाश्वः शीघ्रमेष्यसि ॥ ९ ॥

Digitized by Google

तस्य तद्वचनं श्रुत्वा सर्वान् एव दिशागजान् ।
यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ १० ॥
तैश्च सर्वैर्दिशापालैर्वाक्यज्ञैर्वाक्यकोविदः ।
पूजितः सहयश्चैव गन्तासीत्यभिचोदितः ॥ ११ ॥
तेषां तद्वचनं श्रुत्वा जगाम लघुविक्रमः ।
भस्मराशीकृता यत्र पितरस्तस्य सागराः ॥ १२ ॥
स दुःखवशमापन्नस्त्वसमञ्जसुतस्तदा ।
चुक्रोश परमार्तस्तु बधात् तेषां सुदुःखितः ॥ १३ ॥
यज्ञियं च हयं तत्र चरन्तमविदूरतः ।
ददर्श पुरुषव्याघ्रो दुःखशोकसमन्वितः ॥ १४ ॥
स तेषां राजपुत्राणां कर्तुकामो जलक्रियां ।
सलिलार्थी महातेजा न चापश्यज्जलाशयं ॥ १५ ॥
विसार्य निपुणां दृष्टिं ततोऽपश्यत् खगाधिपं ।
पितॄणां मातुलं राम सुपर्णमचलोपमं ॥ १६ ॥
स चैनमब्रवीद्वाक्यं वैनतेयो महाबलः ।
मा शुचः पुरुषव्याघ्र बधोऽयं लोकसंमतः ॥ १७ ॥
कपिलेनाप्रमेयेण दग्धा हीमे महाबलाः ।
सलिलं नार्हसे प्राज्ञ दातुमेषां हि लौकिकं ॥ १८ ॥
गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ ।
भस्मराशीकृतान् एतान् प्लावयेल्लोकपावनी ॥ १९ ॥

Digitized by Google

तया क्लिन्नमिदं भस्म गङ्गया लोककान्तया ।
षष्टिं पुत्रसहस्राणि स्वर्गलोकं नयिष्यति ॥ २० ॥
गङ्गामानय भद्रं ते देवलोकान्महीतलं ।
क्रियतां यदि शक्नोषि गङ्गाया अवतारणं ॥ २१ ॥
गच्छाश्वं तं समादाय पुनरेव यथागतं ।
यज्ञं पैतामहं वीर संवर्तयितुमर्हसि ॥ २२ ॥
सुपर्णवचनं श्रुत्वा सोऽंशुमान् अतिवीर्यवान् ।
त्वरितं हयमादाय पुनरायान्महायशाः ॥ २३ ॥
स राजानं समासाद्य दीक्षितं रघुनन्दन ।
न्यवेदयद्यथावृत्तं सुपर्णवचनं तथा ॥ २४ ॥
तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः ।
यज्ञं निवर्तयामास यथाकल्पं यथाविधि ॥ २५ ॥
स्वपुरं त्वगमच्छ्रीमान् इष्टयज्ञो महामतिः ।
गङ्गायाश्चागमे राजा निश्चयं नाध्यगच्छत ॥ २६ ॥
अगत्वा निश्चयं राजा कालेन महता महान् ।
त्रिंशद्वर्षसहस्राणि राज्यं कृत्वा दिवं गतः ॥ २७ ॥

इति बालकाण्डे सगरयज्ञसमाप्तिर्नाम द्विचत्वारिंशः सर्गः
॥ ४२ ॥

## CAPUT XLIII.

### MUNUS BHAGIRATHI CONCESSUM.

कालधर्मं गते राम सगरे प्रकृतीजनाः ।
राजानं रोचयामासुरंशुमन्तं सुधार्मिकं ॥ १ ॥
स राजा सुमहान् आसीदंशुमान् रघुनन्दन ।
तस्य पुत्रः समभवद्दिलीप इति विश्रुतः ॥ २ ॥
तस्मै राज्यं समादिश्य अंशुमान् रघुनन्दन ।
हिमवच्छिखरे रम्ये तपस्तेपे सुदारुणं ॥ ३ ॥
गङ्गावतरणं पुण्यं चिकीर्षुरमरद्युतिः ।
अनवाप्यैव तं कामं स वै नृपतिसत्तमः ॥ ४ ॥
द्वात्रिंशतं सहस्राणि वर्षाणां सुमहायशाः ।
तपोवनं गतो राजा स्वर्गं लेभे तपोधनः ॥ ५ ॥
दिलीपस्तु महातेजाः श्रुत्वा पैतामहं बधं ।
दुःखोपहतया बुद्ध्या निश्चयं नाध्यगच्छत ॥ ६ ॥
कथं गङ्गावतरणं कथं तेषां जलक्रिया ।
तारयेयं कथं चैतान् इति चिन्तापरोऽभवत् ॥ ७ ॥
तस्य चिन्तयतो नित्यं धर्मेण विदितात्मनः ।
पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः ॥ ८ ॥

Digitized by Google

दिलीपस्तु महातेजा यज्ञैर्बहुभिरिष्टवान् ।
त्रिंशद्वर्षसहस्राणि राजा राज्यमकारयत् ॥ ९ ॥
अगत्वा निश्चयं राजा तेषामुद्धरणं प्रति ।
व्याधिना नरशार्दूल कालधर्ममुपेयिवान् ॥ १० ॥
इन्द्रलोकं गतो राजा स्वार्जितेनैव कर्मणा ।
राज्ये भगीरथं पुत्रमभिषिच्य नरर्षभः ॥ ११ ॥
भगीरथस्तु राजर्षिर्धार्मिको रघुनन्दन ।
अनपत्यो महातेजाः प्रजाकामः स चाप्रजाः ॥ १२ ॥
मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः ।
स तपो दीर्घमातिष्ठद्गोकर्णे रघुनन्दन ॥ १३ ॥
ऊर्द्धबाहुः पञ्चतपा मासाहारो जितेन्द्रियः ।
जलशायी च हेमन्ते वर्षास्वभ्रावकाशिकः ॥ १४ ॥
तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः ।
सुप्रीतो भगवान् ब्रह्मा प्रजानां प्रभुरीश्वरः ॥ १५ ॥
ततः सुरगणैः सार्द्धमुपागम्य पितामहः ।
भगीरथं महात्मानं तप्यमानमथाब्रवीत् ॥ १६ ॥
भगीरथ महाभाग प्रीतस्तेऽहं जनेश्वर ।
तपसा च सुतप्तेन वरं वरय सुव्रत ॥ १७ ॥
तमुवाच महातेजाः सर्वलोकपितामहं ।
भगीरथो महाबाहुः कृताञ्जलिपुटः स्थितः ॥ १८ ॥



Digitized by Google

यदि मे भगवान् प्रीतो यद्यस्ति तपसः फलं ।
सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ॥ १९ ॥
गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनां ।
स्वर्गं गच्छेयुरत्यन्तं सर्वे ते प्रपितामहाः ॥ २० ॥
देया च संततिर्देव नावसीदेत् कुलं च नः ।
इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः ॥ २१ ॥
उक्तवाक्यं च राजानं सर्वलोकपितामहः ।
प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षरां ॥ २२ ॥
मनोरथो महान् एष भगीरथ महारथ ।
एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन ॥ २३ ॥
इयं हैमवती ज्येष्ठा गङ्गा हिमवतः सुता ।
तां वै धारयितुं राजन् शिवो देवः प्रसाद्यतां ॥ २४ ॥
गङ्गायाः पतनं वीर पृथिवी न सहिष्यते ।
तस्या धारयितारं च नान्यं पश्यामि शूलिनः ॥ २५ ॥
तमेवमुक्त्वा राजानं गङ्गामाभाष्य लोककृत् ।
जगाम त्रिदिवं देवैः सर्वैः सहमरुद्गणैः ॥ २६ ॥

इति बालकाण्डे भगीरथवरप्रदानं नाम त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

11 61/2 / 1187

## CAPUT XLIV.

### NYMPHAE GANGAE DESCENSUS.

प्रजापतौ गते तस्मिन् सोऽङ्गुष्ठाग्रनिपीडितं ।
कृत्वा महीतलं राजा संवत्सरमुपासत ॥ १ ॥
ऊर्द्धवाहुर्निरालम्बो वायुभक्षो निराश्रयः ।
अचलः स्थाणुवत् स्थित्वा रात्रिं दिवमतन्द्रितः ॥ २ ॥
अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः ।
उमापतिः पशुपतिर्भगीरथमभाषत ॥ ३ ॥
प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियं ।
शिरसा धारयिष्यामि शैलराजसुतामहं ॥ ४ ॥
ततो हिमवतः शृङ्गमभिरुह्य महेश्वरः ।
निपतेत्यब्रवीद्गङ्गामाभाष्याकाशगां नदीं ॥ ५ ॥
ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता ।
उमापतेर्वचः श्रुत्वा गङ्गा क्रोधसमन्विता ॥ ६ ॥
तदा सातिमहद्रूपं कृत्वा वेगं च दुःसहं ।
आकाशादपतद्गङ्गा शिवे शिवशिरस्युत ॥ ७ ॥
अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा ।
विशाम्यहं हि पातालं स्रोतसा गृह्य शङ्करं ॥ ८ ॥

Digitized by Google

तस्याऽवलेपनं ज्ञात्वा क्रुद्धस्तु भगवान् हरः ।
तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा ॥ ९ ॥
सा तस्मिन् पतिता पुण्या पुण्ये रुद्रस्य मूर्धनि ।
हिमवत्प्रतिमे राम जटामण्डलगह्वरे ॥ १० ॥
सा कथंचिन्महीं गन्तुं नाशक्नोद्यत्नमास्थिता ।
नैव सा निर्गमं लेभे जटामण्डलमोहिता ॥ ११ ॥
तत्रैवाबिभ्रमद्देवी संवत्सरगणान् बहून् ।
तामपश्यत् पुनस्तत्र तपः परममास्थितः ॥ १२ ॥
स तेन तोषितश्चाभूदत्यर्थं रघुनन्दन ।
विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति ॥ १३ ॥
तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ।
ह्लादिनी पावनी चैव नलिनी च तथापरा ॥ १४ ॥
तिस्रः प्राचीं दिशं जग्मुर्गङ्गाः शिवजलाः शुभाः ।
सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी ॥ १५ ॥
तिस्रश्चैता दिशं जग्मुः प्रतीचीं तु शुभोदकाः ।
सप्तमी चान्वगात् तासां भगीरथमथो नृपं ॥ १६ ॥
गगनाच्छङ्करशिरस्ततो धरणिमागता ।
व्यसर्पत जलं तत्र तीव्रशब्दपुरस्कृतं ॥ १७ ॥
मत्स्यकच्छपसंघैश्च शिशुमारगणैस्तथा ।
पतद्भिः पतितैश्चैव व्यरोचत वसुंधरा ॥ १८ ॥

Digitized by Google

ततो देवर्षिगन्धर्वा यक्षसिद्धगणास्तथा ।
व्यलोकयन्त ते तत्र गगनाद्गां गतां नदीं ॥ १९ ॥
विमानैर्नगराकारैर्हयैर्गजवरैस्तथा ।
पारिप्लवगताश्चापि देवतास्तत्र विष्ठिताः ॥ २० ॥
तदद्भुतमिदं लोके गङ्गावतारमुत्तमं ।
दिदृक्षवो देवगणाः समीयुरमितौजसः ॥ २१ ॥
संपतद्भिः सुरगणैस्तेषां चाभरणौजसा ।
शतादित्यमिवाभाति गगनं गततोयदं ॥ २२ ॥
शिशुमारोरगगणैर्मीनैरपि च चञ्चलैः ।
विद्युद्भिरिव विक्षिप्तैराकाशमभवद्वृतं ॥ २३ ॥
पाण्डुरैः सलिलोत्पीडैः कीर्यमाणैः सहस्रधा ।
शारदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः ॥ २४ ॥
क्वचिद्द्रुततरं याति कुटिलं क्वचिदागतं ।
विततं क्वचिदुद्भूतं क्वचिद्याति शनैः शनैः ॥ २५ ॥
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ।
मुहुरूर्द्ध्वपथं गत्वा पपात वसुधां ततः ॥ २६ ॥
तच्छङ्करशिरोभ्रष्टं भ्रष्टं भूमितले पुनः ।
व्यरोचत तदा तोयं निर्मलं गतकल्मषं ॥ २७ ॥
तत्र देवर्षिगन्धर्वा वसुधातलवासिनः ।
भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः ॥ २८ ॥

Digitized by Google

शापात् प्रपतिता ये च गगनाद्वसुधातलं ।
पूतात्मानः पुनस्तेन सलिलेन दिवं गताः ॥ २९ ॥
मुमुदे मुदितो लोकस्तेन तोयेन भास्वता ।
कृताभिषेको गङ्गायां बभूव गतकल्मषः ॥ ३० ॥
भगीरथो हि राजर्षिर्दिव्यं स्यन्दनमास्थितः ।
प्रायादग्रे महातेजास्तं गङ्गा पृष्ठतोऽन्वगात् ॥ ३१ ॥
देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ।
गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ॥ ३२ ॥
सर्वाश्चाप्सरसो राम भगीरथरथानुगाः ।
गङ्गामन्वगमन् प्रीताः सर्वे जलचराश्च ये ॥ ३३ ॥
यतो भगीरथो राजा ततो गङ्गा यशस्विनी ।
जगाम सरितां श्रेष्ठा सर्वपापप्रणाशिनी ॥ ३४ ॥
ततो हि यजमानस्य जह्नोरद्भुतकर्मणः ।
गङ्गा संप्लावयामास यज्ञवाटं महात्मनः ॥ ३५ ॥
तस्याऽवलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च राघव ।
अपिबत् तु जलं सर्वं गङ्गायाः परमाद्भुतं ॥ ३६ ॥
ततो देवाः सगन्धर्वा ऋषयश्च सुविस्मिताः ।
पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमं ॥ ३७ ॥
गङ्गां चापि नयन्ति स्म दुहितृत्वे महात्मनः ।
ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत् पुनः ॥ ३८ ॥

Digitized by Google

तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च ।
जगाम च पुनर्गङ्गा भगीरथरथानुगा ॥ ३९ ॥
सागरं चापि संप्राप्ता सा सरित्प्रवरा तदा ।
रसातलमुपागच्छत् सिद्ध्यर्थं तस्य कर्मणः ॥ ४० ॥
स गत्वा सागरं राजा गङ्गयानुगतस्तदा ।
प्रविवेश तलं भूमेः खातं यत् सगरात्मजैः ॥ ४१ ॥
उपानीय ततो गङ्गां रसातलतलं प्रभुः ।
तर्पयामास तान् सर्वान् भस्मभूतान् पितामहान् ॥४२॥
अथ गङ्गाम्भसा तत्र प्लाविताः सगरात्मजाः ।
दिव्यमूर्तिधरा भूत्वा जग्मुः स्वर्गं मुदान्विताः ॥ ४३ ॥
तान् दृष्ट्वा प्लावितान् सर्वान् पितॄंस्तेन महात्मना ।
भगीरथमुवाचेदं ब्रह्मा सुरगणैः सह ॥ ४४ ॥
तारिता नरशार्दूल दिवं याताश्च देववत् ।
षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ॥ ४५ ॥
सागरस्य जलं लोके यावत् स्थास्यति पार्थिव ।
सगरस्यात्मजाः सर्वे दिवि स्थास्यन्ति देववत् ॥ ४६ ॥
इयं च दुहिता ज्येष्ठा तव गङ्गा भविष्यति ।
त्वत्कृतेन च नाम्ना वै लोके स्थास्यति विश्रुता ॥ ४७ ॥
गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च ।
त्रीन् पथो भावयन्तीति ततस्त्रिपथगा स्मृता ॥ ४८ ॥

Digitized by Google

पितामहानां सर्वेषां त्वमत्र मनुजाधिप ।
कुरुष्व सलिलं राजन् प्रतिज्ञामपवर्जय ॥ ४९ ॥
पूर्वकेण हि ते राजन् तेनातियशसा तदा ।
धर्मिणां प्रवरेणापि नैष प्राप्तो मनोरथः ॥ ५० ॥
तथैवांशुमता वत्स लोकेऽप्रतिमतेजसा ।
गङ्गां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता ॥ ५१ ॥
राजर्षिणा गुणवता महर्षिसमतेजसा ।
अतुल्यतपसा चैव क्षत्रधर्मे स्थितेन च ॥ ५२ ॥
दिलीपेन महाभाग तव पित्रातितेजसा ।
पुनर्न शकिता नेतुं गङ्गा प्रार्थयतानघ ॥ ५३ ॥
सा तु त्वया समाक्रान्ता प्रतिज्ञा पुरुषर्षभ ।
प्राप्तोऽसि परमं लोके यशस्त्रिदशसंमतं ॥ ५४ ॥
तच्च गङ्गावतरणं त्वया कृतमरिंदम ।
अनेन च भवान् प्राप्तो धर्मस्यायतनं महत् ॥ ५५ ॥
प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते ।
सलिले पुरुषव्याघ्र शुचिः पुण्यफलो भव ॥ ५६ ॥
पितामहानां सर्वेषां कुरुष्व सलिलक्रियां ।
स्वस्ति तेऽस्तु गमिष्यामि स्वर्लोकं गम्यतां नृप ॥ ५७ ॥
इत्युक्त्वा भगवान् ब्रह्मा भगीरथमरिंदमं ।
जगाम सहितो देवैर्ब्रह्मलोकमनामयं ॥ ५८ ॥

Digitized by Google

भगीरथोऽपि राजर्षिः कृत्वा सलिलमुत्तमं ।
यथाक्रमं यथान्यायं सागराणां महायशाः ॥ ५९ ॥
कृतोदकः शुची राजा स्वपुरं पुनरागमत् ।
समृद्धार्थो नरश्रेष्ठः स्वराज्यं प्रशशास ह ॥ ६० ॥
प्रमुमोद च लोकस्तं नृपमासाद्य राघव ।
नष्टशोकः समृद्धार्थो बभूव विगतज्वरः ॥ ६१ ॥
एष ते राम गङ्गाया विस्तरोऽभिहितो मया ।
स्वस्ति प्राप्नुहि भद्रं ते संध्याकालोऽतिवर्तते ॥ ६२ ॥
धन्यं यशस्यमायुष्यं स्वर्ग्यं पावनमेव च ।
इदमाख्यानमाख्यातं गङ्गावतरणं मया ॥ ६३ ॥

इति बालकाण्डे गङ्गावतरणं नाम चतुश्चत्वारिंशः सर्गः
॥ ४४ ॥

1187
63
1250

## CAPUT XLV.

### AMBROSIAE ORIGO.

विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ।
विस्मयं परमं गत्वा विश्वामित्रमथाब्रवीत् ॥ १ ॥
अत्यद्भुतमिदं ब्रह्मन् कथितं परमं त्वया ।
गङ्गावतरणं पुण्यं सागरस्यापि पूरणं ॥ २ ॥
क्षणभूतेव नौ रात्रिः संवृत्तेयं परंतप ।
इमां चिन्तयतोः सर्वां निखिलेन कथां तव ॥ ३ ॥
तस्य सा शर्वरी सर्वा मम सौमित्रिणा सह ।
जगाम चिन्तयानस्य विश्वामित्रकथां शुभां ॥ ४ ॥
ततः प्रभाते विमले विश्वामित्रं तपोधनं ।
उवाच राघवो वाक्यं कृताह्निकमरिंदमः ॥ ५ ॥
गता भगवती रात्रिः श्रोतव्यं परमं श्रुतं ।
तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीं ॥ ६ ॥
नौरेषा हि सुविस्तीर्णा ऋषीणां पुण्यकर्मणां ।
भगवन्तमिह प्राप्तं ज्ञात्वा त्वरितमागता ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ।
संतारं कारयामास ऋषिसंघस्य कौशिकः ॥ ८ ॥

Digitized by Google

उत्तरं तीरमासाद्य संपूज्यर्षिगणान् तदा ।
गङ्गाकूले निविष्टास्ते विशालां ददृशुः पुरीं ॥ ९ ॥
ततो मुनिवरस्तूर्णं जगाम सहराघवः ।
विशालां नगरीं रम्यां दिव्यां स्वर्गोपमां तदा ॥ १० ॥
अथ रामो महातेजा विश्वामित्रं महामुनिं ।
पप्रच्छ प्राञ्जलिर्भूत्वा विशालामुत्तमां पुरीं ॥ ११ ॥
कतमो राजवंशोऽयं विशालायां महामुने ।
श्रोतुमिच्छामि भद्रं ते परं कौतूहलं हि मे ॥ १२ ॥
तस्य तद्वचनं श्रुत्वा रामस्य मुनिपुंगवः ।
आख्यातुं तत् समारेभे विशालायाः पुरातनं ॥ १३ ॥
श्रूयतां राम शक्रस्य कथां कथयतः शुभां ।
अस्मिन् देशे हि यद्वृत्तं शृणु तत्त्वेन राघव ॥ १४ ॥
आसन् कृतयुगे राम दितेः पुत्रा महाबलाः ।
अदितेश्च महाभागा वीर्यवन्तः सुधार्मिकाः ॥ १५ ॥
भ्रातरः स्पर्धिनः पुत्राः कश्यपस्य महात्मनः ।
मातृष्वसेयाः सापत्न्यात् परस्परजिगीषवः ॥ १६ ॥
तेषां किल समेतानां बुद्धिरासीन्महौजसां ।
अजराश्चामराश्चैव कथं स्यामेति राघव ॥ १७ ॥
तेषां चिन्तयतां तत्र बुद्धिरासीद्विपश्चितां ।
क्षीरोदमथनं कृत्वा रसं प्राप्स्याम तत्र वै ॥ १८ ॥

Digitized by Google

ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिं ।
मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥ १९ ॥
अथ वर्षसहस्रेण योक्त्रसर्पशिरांसि च ।
वमन्त्यतिविषं तत्र ददंशुर्दशनैःशिलाः ॥ २० ॥
उत्पपाताग्निसंकाशं हालाहलमहाविषं ।
तेन दग्धं जगत् सर्वं सदेवासुरमानुषं ॥ २१ ॥
अथ देवा महादेवं शङ्करं शरणार्थिनः ।
जग्मुः पशुपतिं रुद्रं त्राहि त्राहीति तुष्टुवुः ॥ २२ ॥
प्रादुरासीत् ततोऽत्रैव शङ्खचक्रगदाधरः ।
उवाचेनं स्मितं कृत्वा रुद्रं शूलधरं हरिः ॥ २३ ॥
दैवतैर्मथ्यमाने तु यत् पूर्वं समुपस्थितं ।
तत् त्वदीयं सुरश्रेष्ठ सुराणामग्रजो हि यत् ॥ २४ ॥
अग्रपूजामिह स्थित्वा गृहाणेदं विषं प्रभो ।
इत्युक्त्वा च सुरश्रेष्ठस्तत्रैवान्तरधीयत ॥ २५ ॥
देवतानां भयं दृष्ट्वा श्रुत्वा वाक्यं तु शार्ङ्गिणः ।
हालाहलं विषं घोरं संजग्राहामृतोपमं ॥ २६ ॥
देवान् विसृज्य देवेशो जगाम भगवान् हरः ।
ततो देवासुराः सर्वे ममन्थू रघुनन्दन ॥ २७ ॥
प्रविवेशाथ पातालं मन्थानः पर्वतोत्तमः ।
ततो देवाः सगन्धर्वास्तुष्टुवुर्मधुसूदनं ॥ २८ ॥

Digitized by Google

त्वं गतिः सर्वभूतानां विशेषेण दिवौकसां ।
पालयास्मान् महाबाहो गिरिमुद्धर्तुमर्हसि ॥ २९ ॥
इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः ।
पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः ॥ ३० ॥
पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः ।
देवानां मध्यतः स्थित्वा ममन्थ पुरुषोत्तमः ॥ ३१ ॥
अथ वर्षसहस्रेण आयुर्वेदमयः पुमान् ।
उदतिष्ठत् सुधर्मात्मा सदण्डः सकमण्डलुः ॥ ३२ ॥
अप्सु निर्मथनादेव रसात् तस्माद्वरस्त्रियः ।
उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन् ॥ ३३ ॥
षष्टिः कोट्योऽभवंस्तासामप्सराणां सुवर्चसां ।
असंख्येयास्तु काकुत्स्थ यास्तासां परिचारिकाः ॥ ३४ ॥
न ताः स्म प्रतिगृह्णन्ति सर्वे ते देवदानवाः ।
अप्रतिग्रहणात् ताश्च ततः साधारणीकृताः ॥ ३५ ॥
वरुणस्य ततः कन्या वारुणी रघुनन्दन ।
उत्पपात रसात् तस्मान्मार्गमाणा प्रतिग्रहं ॥ ३६ ॥
दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजां ।
अदितेस्तु सुता वीर जगृहुस्तामनिन्दितां ॥ ३७ ॥
सुराप्रतिग्रहाद्देवाः सुरा इत्यभिविश्रुताः ।
अप्रतिग्रहणात् तस्या दैतेयाश्चासुरास्तथा ॥ ३८ ॥

Digitized by Google

उच्चैःश्रवाश्च तत्राश्वो मणिरत्नं च कौस्तुभं ।
उदतिष्ठन्नरश्रेष्ठ सोमदेवस्तथैव च ॥ ३९ ॥
[*ततो दीर्घेण कालेन चोत्पन्ना कमलालया ।
*अतीव रूपसंपन्ना प्रथमे वयसि स्थिता ॥ ४० ॥
*सर्वाभरणपूर्णाङ्गी सर्वलक्षणलक्षिता ।
*मुकुटाङ्गदचित्राङ्गी नीलकुञ्चितमूर्धजा ॥ ४१ ॥
*तप्तहाटकसंकाशा मुक्ताभरणभूषिता ।
*चतुर्भुजा महादेवी पद्महस्ता वरानना ॥ ४२ ॥
*सा च देवी तथोत्पन्ना पद्मा श्रीर्लोकपूजिता ।
*सा पद्मा पद्मनाभस्य ययौ वक्षःस्थलं हरेः] ॥ ४३ ॥
सुरासुराश्च गन्धर्वाः क्षोभयामासुरम्बुधिं ।
तस्मादेतत् समुद्भूतं तथैवामृतमुत्तमं ॥ ४४ ॥
अथ तस्य कृते राम महान् आसीत् कुलक्षयः ।
अदितेस्तु तदा पुत्रा दितिपुत्रान् अयोधयन् ॥ ४५ ॥
एकतोऽभ्यगमन् सर्वे असुरा राक्षसैः सह ।
युद्धमासीन्महाघोरं वीर त्रैलोक्यमोहनं ॥ ४६ ॥
यदा क्षयं गतं सर्वं तदा विष्णुर्महाबलः ।
अमृतं सोऽहरत् तूर्णं मायामास्थाय मोहिनीं ॥ ४७ ॥
ये गताऽभिमुखं विष्णुमक्षयं पुरुषोत्तमं ।
संपिष्टास्ते तदा युद्धे विष्णुना प्रभविष्णुना ॥ ४८ ॥

Digitized by Google

अदितेरात्मजा वीरा दितेः पुत्रान् निजघ्निरे ।
तस्मिन् घोरे महायुद्धे दैतेयादित्ययोर्भृशं ॥ ४९ ॥
निहत्य दितिपुत्रांस्तु राज्यं प्राप्य पुरंदरः ।
शशास मुदितो लोकान् सर्षिसंघान् सचारणान् ॥ ५० ॥

इति बालकाण्डे अमृतोत्पत्तिर्नाम पञ्चचत्वारिंशः सर्गः
॥ ४५ ॥

---

## CAPUT XLVI.
### FOETUS DITIDIS DIFFISSUS.

हतेषु तेषु पुत्रेषु दितिः परमदुःखिता ।
मारीचं कश्यपं राम भर्तारमिदमब्रवीत् ॥ १ ॥
हतपुत्रास्मि भगवंस्तव पुत्रैर्महाबलैः ।
शक्रहन्तारमिच्छामि पुत्रं दीर्घतपोऽर्जितं ॥ २ ॥
साहं तपश्चरिष्यामि गर्भमाधातुमर्हसि ।
तत्र मे शक्रहन्तारं त्वमनुज्ञातुमर्हसि ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा मारीचः कश्यपस्तदा ।
प्रत्युवाच महातेजा दितिं परमदुःखितां ॥ ४ ॥
एवं भवतु भद्रं ते शुचिर्भव तपोधने ।
जनयिष्यसि पुत्रं त्वं शक्रहन्तारमाहवे ॥ ५ ॥

Digitized by Google

पूर्णे वर्षसहस्रे तु शुचिर्यदि भविष्यसि ।
पुत्रं त्रैलोक्यहन्तारं मत्तो वै जनयिष्यसि ॥ ६ ॥
एवमुक्त्वा महातेजाः पाणिना स ममार्ज तां ।
तामालिंग्य ततः "स्वस्ति" इत्युक्त्वा तपसे ययौ ॥ ७ ॥
गते तस्मिन् नरश्रेष्ठ दितिः परमहर्षिता ।
कुशप्लवनमासाद्य तपस्तेपे सुदारुणं ॥ ८ ॥
चरन्त्यास्तु तपस्तस्याः परां संनतिमास्थितः ।
परिचर्यां स्वयं शक्रश्चकारोपेत्य तत्परः ॥ ९ ॥
अग्निं कुशान् काष्ठमपः फलमूलं तथैव च ।
न्यवेदयत् सहस्राक्षो यच्चान्यदपि काङ्क्षितं ॥ १० ॥
गात्रसंवाहनैश्चैव श्रमापनयनैस्तथा ।
शक्रः सर्वेषु कालेषु दितिं परिचचार ह ॥ ११ ॥
पूर्णे वर्षसहस्रे तु दशोने रघुनन्दन ।
दितिः परमसंहृष्टा सहस्राक्षमथाब्रवीत् ॥ १२ ॥
तपश्चरन्त्या वर्षाणि दश वीर्यवतां वर ।
अवशिष्टानि भद्रं ते भ्रातरं द्रक्ष्यसे ततः ॥ १३ ॥
तमहं त्वत्कृते पुत्र समाधास्ये जयोत्सुकं ।
त्रैलोक्यविजयं पुत्र सह भोक्ष्यसि विज्वरः ॥ १४ ॥
याचितेन सुरश्रेष्ठ तव पित्रा महात्मना ।
वरो वर्षसहस्रान्ते दत्तो मम सुतं प्रति ॥ १५ ॥

Digitized by Google

एवमुक्त्वा दितिस्तत्र प्राप्ते मध्यं दिनेश्वरे ।
निद्रयापहृता देवी पादौ कृत्वाथ शीर्षतः ॥ १६ ॥
दृष्ट्वा तामशुचिं शक्रः पादयोः कृतमूर्धजां ।
शिरःस्थाने कृतौ पादौ जहास च मुमोद च ॥ १७ ॥
तस्याः शरीरविवरं प्रविवेश पुरंदरः ।
गर्भं च सप्तधा राम चिच्छेद परमात्मवान् ॥ १८ ॥
भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा ।
रुरोद सुस्वरं राम ततो दितिरबुध्यत ॥ १९ ॥
मा रुदो मा रुदश्चेति गर्भं शक्रोऽभ्यभाषत ।
बिभेद च महातेजा रुदन्तमपि वासवः ॥ २० ॥
न हन्तव्यो न हन्तव्य इति तं दितिरब्रवीत् ।
निष्पपात ततः शक्रो मातुर्वचनगौरवात् ॥ २१ ॥
प्राञ्जलिर्वज्रसहितो दितिं शक्रोऽभ्यभाषत ।
अशुचिर्देवि सुप्तासि पादयोः कृतमूर्धजा ॥ २२ ॥
तदन्तरमहं लब्ध्वा शक्रहन्तारमाहवे ।
अच्छिदं सप्तधा देवि तन्मे त्वं क्षन्तुमर्हसि ॥ २३ ॥

इति बालकाण्डे दितिगर्भच्छेदो नाम षट्चत्वारिंशः सर्गः
॥ ४६ ॥



Digitized by Google

## CAPUT XLVII.

### CONGRESSUS CUM SUMATE.

सप्तधा तु कृते गर्भे दितिः परमधार्मिका ।
सहस्राक्षं दुराधर्षं वाक्यं सानुनयाब्रवीत् ॥ १ ॥
ममापराधाद्गर्भो ऽयं सप्तधा शकलीकृतः ।
नापराधो हि देवेश तवात्र बलिसूदन ॥ २ ॥
प्रियं तु कृतमिच्छामि मम गर्भविपर्यये ।
मरुतां सप्त सप्तानां स्थानपाला भवन्तु ते ॥ ३ ॥
वातस्कन्धा इमे पुत्र चरन्तु दिवि पुत्रकाः ।
मारुता इति विख्याता दिव्यरूपा ममात्मजाः ॥ ४ ॥
ब्रह्मलोकं चरत्वेक इन्द्रलोकं तथापरः ।
दिवि वायुरिति ख्यातस्तृतीयो ऽपि महायशाः ॥ ५ ॥
चत्वारस्तु सुरश्रेष्ठ दिशो वै तव शासनात् ।
संचरिष्यन्ति भद्रं ते देवभूता ममात्मजाः ॥ ६ ॥
तस्यास्तद्वचनं श्रुत्वा सहस्राक्षः पुरन्दरः ।
उवाच प्राञ्जलिर्वाक्यं दितिं बलिनिषूदनः ॥ ७ ॥
त्वत्कृतेनैव नाम्ना हि भविष्यन्ति तवात्मजाः ।
ख्याता मरुत इत्येते दिव्यरूपा ममाज्ञया ॥ ८ ॥

Digitized by Google

अमृतप्राशिनः पुत्रा इमे ते सह्निता मया ।
विचरिष्यन्ति लोकांस्त्रीन् निर्भया विगतज्वराः ॥ ९ ॥
एवं तौ निश्चयं कृत्वा मातापुत्रौ तपोवने ।
जग्मतुस्त्रिदिवं राम कृतार्थाविति नः श्रुतं ॥ १० ॥
एष देशः स काकुत्स्थ महेन्द्राध्युषितः पुरा ।
दितिं यत्र तपःसिद्धामेवं परिचचार सः ॥ ११ ॥
इक्ष्वाकोरत्र राजर्षेः पुत्रः परमधार्मिकः ।
अलम्बुषायामुत्पन्नो विशाल इति विश्रुतः ॥ १२ ॥
तेन चासीदिह स्थाने विशालेति पुरी कृता ।
विशालस्य सुतो राजा हेमचन्द्रो महाबलः ॥ १३ ॥
सुचन्द्र इति विख्यातो हेमचन्द्रादनन्तरः ।
सुचन्द्रतनयो राम धूम्राश्व इति विश्रुतः ॥ १४ ॥
धूम्राश्वतनयश्चापि सृञ्जयः समपद्यत ।
सृञ्जयस्य सुतः श्रीमान् सहदेवः प्रतापवान् ॥ १५ ॥
कुशाश्वः सहदेवस्य पुत्रः परमधार्मिकः ।
कुशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् ॥ १६ ॥
तस्य पुत्रो महातेजाः संप्रत्येष पुरीमिमां ।
आवसत्यमरप्रख्यः सुमतिर्नाम दुर्जयः ॥ १७ ॥
इक्ष्वाकोस्तु प्रसादेन सर्वे वैशालिका नृपाः ।
दीर्घायुषो महात्मानो वीर्यवन्तः सुधार्मिकाः ॥ १८ ॥

Digitized by Google

इहाद्य रजनीमेकां सुखं स्वप्स्यामहे वयं ।
श्वः प्रभाते नरश्रेष्ठ जनकं द्रष्टुमर्हसि ॥ १९ ॥
सुमतिस्तु ततः श्रुत्वा विश्वामित्रमुपागतं ।
प्रत्युद्गम्य महात्मानं पूजयामास पार्थिवः ॥ २० ॥
पूजां च परमां कृत्वा सोपाध्यायः सबान्धवः ।
प्राञ्जलिः कुशलं पृष्ट्वा विश्वामित्रमथाब्रवीत् ॥ २१ ॥
धन्यो ऽस्म्यनुगृहीतो ऽस्मि यस्य मे विषयं मुने ।
संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मम ॥ २२ ॥

इति बालकाण्डे सुमतिसमागमो नाम सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

1343
22
1365

Digitized by Google

## CAPUT XLVIII.

### Exsecratio Indrae et Ahalyae.

पृष्ट्वा तु कुशलं तत्र परस्परसमागमे ।
कथान्ते सुमतिर्वाक्यं व्याजहार महामुनिं ॥ १ ॥
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ।
गजसिंहगती वीरौ शार्दूलवृषभोपमौ ॥ २ ॥
पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ ।
अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ ३ ॥
यदृच्छयेव गां प्राप्तौ देवलोकादिवामरौ ।
कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ ४ ॥
भूषयन्ताविमं देशं चन्द्रसूर्याविवाम्बरं ।
परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा यथावृत्तं न्यवेदयत् ।
सिद्धाश्रमनिवासं च राक्षसानां बधं तथा ॥ ६ ॥
विश्वामित्रवचः श्रुत्वा राजा परमविस्मितः ।
अतिथी पूजयामास पुत्रौ दशरथस्य तौ ॥ ७ ॥
ततः परमसत्कारं सुमतेः प्राप्य राघवौ ।
उष्य तत्र निशामेकां जग्मतुर्मिथिलां प्रति ॥ ८ ॥

Digitized by Google

तां दृष्ट्वा दूरतः सर्वे जनकस्य पुरीं शुभां ।
मुनयो हृष्टमनसः शशंसुः साधु साध्विति ॥ ९ ॥
मिथिलोपवने तत्र आश्रमं दृश्य राघवः ।
पुराणं निर्जनं पुण्यं पप्रच्छ मुनिपुंगवं ॥ १० ॥
श्रीमदाश्रमसंकाशं किंचिदं मुनिवर्जितं ।
श्रोतुमिच्छामि भगवन् कस्यायं पूर्व आश्रमः ॥ ११ ॥
तच्छ्रुत्वा राघवेणोक्तं वाक्यं वाक्यविशारदः ।
प्रत्युवाच महातेजा विश्वामित्रो महामुनिः ॥ १२ ॥
हन्त ते कथयिष्यामि शृणु तत्त्वेन राघव ।
यस्यैतदाश्रमपदं शप्तं कोपान्महात्मना ॥ १३ ॥
गौतमस्य नरश्रेष्ठ पूर्वमासीन्महामुनेः ।
आश्रमो दिव्यसंकाशः सुरैरपि सुपूजितः ॥ १४ ॥
स चात्र तप आतिष्ठदहल्यासहितो मुनिः ।
संवत्सरसहस्राणि बहूनि रघुनन्दन ॥ १५ ॥
कदाचिद्दिवसे राम ततो दूरगते मुनौ ।
तदस्या आश्रमे दृष्ट्वा रम्यं रूपं पुरंदरः ॥ १६ ॥
तस्यान्तरं विदित्वा च कामार्थस्त्रिदिवेश्वरः ।
मुनिवेशधरो भूत्वा सोऽहल्यामिदमब्रवीत् ॥ १७ ॥
ऋतुकालं प्रतीक्षन्ते नार्थिनः सुसमाहिते ।
संगमं त्वहमिच्छामि त्वया सह सुमध्यमे ॥ १८ ॥

मुनिवेशं सहस्राक्षं विज्ञाय रघुनन्दन ।
मतिं चकार दुर्मेधा देवराजकुतूहलात् ॥ १९ ॥
अथाब्रवीत् सुरश्रेष्ठं कृतार्थेनान्तरात्मना ।
कृतार्थास्मि सुरश्रेष्ठ गच्छ शीघ्रमितः प्रभो ॥ २० ॥
आत्मानं मां च देवेश सर्वथा रक्ष गौतमात् ।
इन्द्रस्तु प्रहसन् वाक्यमहल्यामिदमब्रवीत् ॥ २१ ॥
सुश्रोणि परितुष्टोऽस्मि गमिष्यामि यथागतं ।
एवं संगम्य तु तया निश्चक्रामोटजात् ततः ॥ २२ ॥
स संभ्रमात् त्वरन् राम शङ्कितो गौतमं प्रति ।
गौतमं संददर्शाथ प्रविशन्तं महामुनिं ॥ २३ ॥
देवदानवदुर्धर्षं तपोबलसमन्वितं ।
तीर्थोदकपरिक्लिन्नं दीप्यमानमिवानलं ॥ २४ ॥
गृहीतसमिधं तत्र सकुशं मुनिपुंगवं ।
दृष्ट्वा सुरपतिस्त्रस्तो विषण्णवदनोऽभवत् ॥ २५ ॥
अथ दृष्ट्वा सहस्राक्षं मुनिवेशधरं मुनिः ।
दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् ॥ २६ ॥
मम रूपं समास्थाय कृतवान् असि दुर्मते ।
अकर्तव्यमिदं यस्माद्विफलस्त्वं भविष्यसि ॥ २७ ॥
गौतमेनैवमुक्तस्य सरोषेण महात्मना ।
पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् ॥ २८ ॥

Digitized by Google

व्यथितःस तदा चासीद्धतौजा विफलीकृतः ।
धर्षितस्तपसोग्रेण कश्मलं चैनमाविशत् ॥ २९ ॥
तथा शप्त्वा स वै शक्रं भार्यामपि च शप्तवान् ।
इह वर्षसहस्राणि बहूनि निवसिष्यसि ॥ ३० ॥
वातभक्षा निराहारा तप्यन्ती भस्मशायिनी ।
अदृश्या सर्वभूतानामाश्रमे ऽस्मिन् निवत्स्यसि ॥ ३१ ॥
यदा त्विदं वनं घोरं रामो दशरथात्मजः ।
आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ॥ ३२ ॥
तस्यातिथ्येन दुर्वृत्ते लोभमोहविवर्जिता ।
मत्सकाशे मुदा युक्ता स्वं वपुर्धारयिष्यसि ॥ ३३ ॥
एवमुक्त्वा महातेजा गौतमो दुष्टचारिणीं ।
हिमवच्छिखरे रम्ये तपस्तेपे सुदुश्चरं ॥ ३४ ॥

इति बालकाण्डे शक्राहल्याशापो नाम अष्टचत्वारिंशः
सर्गः ॥ ४८ ॥

1345
34
1311

## CAPUT XLIX.

### Ahalyae liberatio a diris.

अफलस्तु ततः शक्रो देवान् अग्निपुरोगमान् ।
अब्रवीत् त्रस्तनयनः सर्षिसंघान् सचारणान् ॥ १ ॥
कुर्वता तपसो विघ्नं गौतमस्य महात्मनः ।
क्रोधमुत्पाद्य हि मया सुरकार्यमिदं कृतं ॥ २ ॥
अफलोऽस्मि कृतस्तेन क्रोधात् सा च निराकृता ।
शापमोक्षेण महता तपोऽस्यापहृतं मया ॥ ३ ॥
तन्मां सुरवराः सर्वे सर्षिसंघाः सचारणाः ।
सुरकार्यार्थमफलं सफलं कर्तुमर्हथ ॥ ४ ॥
शतक्रतोर्वचः श्रुत्वा देवाः साग्निपुरोगमाः ।
पितृदेवान् उपेत्याहुः सर्वे सह मरुद्गणैः ॥ ५ ॥
पुरो विचार्य मोहेन ऋषिपत्नीं शतक्रतुः ।
धर्षयित्वा मुनेः शापात् तत्रैव विफलः कृतः ॥ ६ ॥
इदानीं कुप्यते देवान् देवराजः पुरंदरः ।
अयं मेषः सवृषणः शक्रो ह्यवृषणः कृतः ॥ ७ ॥
मेषस्य वृषणौ गृह्य शक्रायाशु प्रयच्छत ।
अफलस्तु कृतो मेषः परां तुष्टिं प्रदास्यति ॥ ८ ॥

Digitized by Google

भवतां हर्षणार्थाय ये च दास्यन्ति मानवाः ।
अक्षयं हि फलं तेषां यूयं दास्यथ पुष्कलं ॥ ९ ॥
अग्नेस्तु वचनं श्रुत्वा पितृदेवाः समागताः ।
इन्द्रायाश्च मेषवृषणौ सहस्रान्ते न्यवेशयन् ॥ १० ॥
तदा प्रभृति काकुत्स्थ पितृदेवाः समागताः ।
अफलान् भुञ्जते मेषान् फलैस्तेषामयोजयन् ॥ ११ ॥
इन्द्रस्तु मेषवृषणस्तदा प्रभृति राघव ।
गौतमस्य प्रभावेण तपसा च महात्मनः ॥ १२ ॥
तदागच्छ महातेज आश्रमं पुण्यकर्मणः ।
तारयैनां महाभागामहल्यां देवरूपिणीं ॥ १३ ॥
विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ।
विश्वामित्रं पुरस्कृत्य आश्रमं प्रविवेश ह ॥ १४ ॥
ददर्श च महाभागां तपसा द्योतितप्रभां ।
लोकैरपि समागम्य दुर्निरीक्ष्यां सुरासुरैः ॥ १५ ॥
प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव ।
धूमेनापि परीताङ्गीं दीप्तामग्निशिखामिव ॥ १६ ॥
तुषारेणावृतां साभ्रां पूर्णचन्द्रप्रभामिव ।
मध्ये ऽम्भसो दुराधर्षां दीप्तां सूर्यप्रभामिव ॥ १७ ॥
सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ।
त्रयाणामपि लोकानां यावद्रामस्य दर्शनं ॥ १८ ॥

+ vide Errata.

राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा ।
स्मरन्ती गौतमवचः प्रतिजग्राह सा हि तौ ॥ १९ ॥
पाद्यमर्घ्यं तथातिथ्यं चकार सुसमाहिता ।
प्रतिजग्राह काकुत्स्थो विधिदृष्टेन कर्मणा ॥ २० ॥
पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनिस्वनैः ।
गन्धर्वाप्सरसां चैव महान् आसीत् समुत्सवः ॥ २१ ॥
साधु साध्विति देवास्तामहल्यां समपूजयन् ।
तपोबलविशुद्धाङ्गीं गौतमस्य वशानुगां ॥ २२ ॥
गौतमश्च महातेजा दृष्ट्वा दिव्येन चक्षुषा ।
स्वमाश्रमपदं रामैमागतं प्रत्यपूजयत् ॥ २३ ॥
समेत्य भार्यया चैव पूतयाहल्यया तदा ।
तत्रैव सहितो भूयस्तपस्तेपे महातपाः ॥ २४ ॥
रामोऽपि परमां पूजां गौतमस्य महामुनेः ।
सकाशाद्विधिवत् प्राप्य जगाम मिथिलां ततः ॥ २५ ॥

इति बालकाण्डे अहल्याशापोद्धारो नाम एकोनपञ्चाशः सर्गः ॥ ४९ ॥

137
25
140

## CAPUT L.

### Congressus cum Janaco.

ततः प्रागुत्तरां गत्वा रामः सौमित्रिणा सह ।
विश्वामित्रं पुरस्कृत्य यज्ञवाटमुपागमत् ॥ १ ॥
रामस्तु मुनिशार्दूलमुवाच सहलक्ष्मणः ।
साध्वी यज्ञसमृद्धिर्हि जनकस्य महात्मनः ॥ २ ॥
बहूनीह सहस्राणि नानादेशनिवासिनां ।
ब्राह्मणानां महाभाग वेदाध्ययनशालिनां ॥ ३ ॥
ऋषिवाटाश्च दृश्यन्ते शकटीशतसंकुलाः ।
देशो विधीयतां ब्रह्मन् यत्र वत्स्यामहे वयं ॥ ४ ॥
रामस्य वचनं श्रुत्वा विश्वामित्रो महामुनिः ।
निवेशमकरोद्देशे विविक्ते सलिलाप्लुते ॥ ५ ॥
विश्वामित्रमनुप्राप्तं श्रुत्वा नृपवरस्तदा ।
शतानन्दं पुरस्कृत्य पुरोहितमनिन्दितं ॥ ६ ॥
ऋत्विग्भिः सहितश्चान्यैरादायार्घ्यं त्वरान्वितः ।
प्रत्युज्जगाम सहसा विनयेन समन्वितः ॥ ७ ॥
प्रतिगृह्य तु तां पूजां जनकान्मुनिसत्तमः ।
पप्रच्छ कुशलं राज्ञो यज्ञसामृद्ध्यमेव च ॥ ८ ॥

स तांश्चाथ मुनीन् पृष्ट्वा सोपाध्यायपुरोधसः ।
यथार्हमृषिभिः सर्वैः समागच्छत् प्रहृष्टवत् ॥ ९ ॥
अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत ।
आसने भगवान् आस्तां सहैभिर्मुनिपुंगवैः ॥ १० ॥
जनकस्य वचः श्रुत्वा निषसाद महामुनिः ।
पुरोधा ऋत्विजश्चैव राजा च सह मन्त्रिभिः ॥ ११ ॥
आसनेषु यथान्यायमुपविष्टान् समन्ततः ।
दृष्ट्वा स नृपतिस्तत्र विश्वामित्रमथाब्रवीत् ॥ १२ ॥
अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ।
अद्य यज्ञफलं प्राप्तं भगवद्दर्शनान्मया ॥ १३ ॥
धन्यो ऽस्म्यनुगृहीतो ऽस्मि यस्य मे मुनिपुंगव ।
यज्ञोपसदनं ब्रह्मन् प्राप्तो ऽसि मुनिभिः सह ॥ १४ ॥
द्वादशाहं तु ब्रह्मर्षे शेषमाहुर्मनस्विनः ।
ततो भागार्थिनो देवान् द्रष्टुमर्हसि कौशिक ॥ १५ ॥
इत्युक्त्वा मुनिशार्दूलं प्रहृष्टवदनस्तदा ।
पुनस्तं परिपप्रच्छ प्राञ्जलिः प्रयतो नृपः ॥ १६ ॥
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ।
गजसिंहगती वीरौ शार्दूलवृषभोपमौ ॥ १७ ॥
पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ ।
अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ १८ ॥

यदृच्छयेव गां प्राप्तौ देवलोकादिवामरौ ।
कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ १९ ॥
भूषयन्ताविमं देशं चन्द्रसूर्याविवाम्बरं ।
परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः ॥ २० ॥
तस्य तद्वचनं श्रुत्वा जनकस्य महात्मनः ।
न्यवेदयदमेयात्मा पुत्रौ दशरथस्य तौ ॥ २१ ॥
सिद्धाश्रमनिवासं च राक्षसानां बधं तथा ।
तत्रागमनमव्यग्रं विशालायाश्च दर्शनं ॥ २२ ॥
अहल्यादर्शनं चैव गौतमेन समागमं ।
महाधनुषि जिज्ञासां कर्तुमागमनं तदा ॥ २३ ॥
एतत् सर्वं महातेजा जनकाय महात्मने ।
निवेद्य विरराम

 विश्वामित्रो महामुनिः ॥ २४ ॥

इति बालकाण्डे जनकसमागमो नाम पञ्चाशः सर्गः
॥ ५० ॥

## CAPUT LI.

## Episodium de Visvamitra.

---

### 1. SATANANDI SERMO.

तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः ।
हृष्टरोमा महातेजाः शतानन्दो महातपाः ॥ १ ॥
गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः ।
रामसंदर्शनादेव परं विस्मयमागतः ॥ २ ॥
एतौ निषण्णौ संप्रेक्ष्य शतानन्दो नृपात्मजौ ।
सुखासीनं मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ॥ ३ ॥
अपि ते मुनिशार्दूल मम माता यशस्विनी ।
दर्शिता राजपुत्राय तपो दीर्घमुपागता ॥ ४ ॥
अपि रामे महाभागा मम माता यशस्विनी ।
वन्यैरुपाहरत् पूजां पूजार्हे सर्वदेहिनां ॥ ५ ॥
अपि रामाय कथितं यद्वृत्तं तत् पुरातनं ।
मम मातुर्महातेजो दैवेन दुरनुष्ठितं ॥ ६ ॥
अपि कौशिक भद्रं ते गुरुणा मम संगता ।
मम माता मुनिश्रेष्ठ रामसंदर्शनादितः ॥ ७ ॥

Digitized by Google

अपि प्रीतेन मनसा गुरुर्मे कुशिकात्मज ।
पूतां दीर्घेण तपसा मातरं मे ऽभ्यनन्दत ॥ ८ ॥
अपि मे गुरुणा रामः पूजितः कुशिकात्मज, ।
इहागतो महातेजाः पूजां प्राप्य महात्मनः ॥ ९ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रो महामुनिः ।
प्रत्युवाच शतानन्दं वाक्यज्ञो वाक्यकोविदं ॥ १० ॥
नातिक्रान्तं मुनिश्रेष्ठ यत् कर्तव्यं कृतं मया ।
संगता मुनिना पत्नी भार्गवेणेव रेणुका ॥ ११ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रस्य धीमतः ।
शतानन्दो महातेजा रामं वचनमब्रवीत् ॥ १२ ॥
स्वागतं ते नरश्रेष्ठ, दिष्ट्या प्राप्तो ऽसि राघव ।
विश्वामित्रं पुरस्कृत्य महर्षिमपराजितं ॥ १३ ॥
अचिन्त्यकर्मा तपसा ब्रह्मर्षिरमितप्रभः ।
विश्वामित्रो महावाहो, वेत्स्येनं परमां गतिं ॥ १४ ॥
नास्ति धन्यतरो राम, त्वत्तो ऽन्यो भुवि कश्चन ।
गोप्ता कुशिकपुत्रस्ते येन तप्तं महत् तपः ॥ १५ ॥
श्रूयतां चाभिधास्यामि कौशिकस्य महात्मनः ।
यथाबलं यथावृत्तं तन्मे निगदतः शृणु ॥ १६ ॥
राजासीदेष धर्मात्मा दीर्घकालमरिंदमः ।
धर्मज्ञः कृतविद्यश्च प्रजानां च हिते रतः ॥ १७ ॥

Digitized by Google

प्रजापतिसुतस्त्वासीत् कुशो नाम महीपतिः ।
कुशस्य पुत्रो बलवान् कुशनाभः सुधार्मिकः ॥ १८ ॥
कुशनाभसुतस्त्वासीद्गाधिरित्येव विश्रुतः ।
गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः ॥ १९ ॥
विश्वामित्रो महातेजाः पालयामास मेदिनीं ।
बहुवर्षसहस्राणि राजा राज्यमकारयत् ॥ २० ॥
कदाचित् तु महातेजा योजयित्वा वरूथिनीं ।
अक्षौहिणीपरिवृतः परिचक्राम मेदिनीं ॥ २१ ॥
नगराणि च राष्ट्राणि सरितश्च महागिरीन् ।
आश्रमान् क्रमशो राजा विचरन्नाजगाम ह ॥ २२ ॥
वशिष्ठस्याश्रमपदं नानापुष्पलताद्रुमं ।
नानामृगगणाकीर्णं सिद्धचारणसेवितं ॥ २३ ॥
देवदानवगन्धर्वैः किन्नरैरुपशोभितं ।
प्रशान्तहरिणाकीर्णं द्विजसंघनिषेवितं ॥ २४ ॥
तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ।
सततं संकुलं श्रीमद्ब्रह्मकल्पैर्महाव्रतैः ॥ २५ ॥
अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ।
फलमूलाशनैर्दान्तैर्जितक्रोधैर्जितेन्द्रियैः ॥ २६ ॥
ऋषिभिर्बालखिल्यैश्च जापहोमपरायणैः ।
अन्यैर्वैखानसैश्चैव समन्तादुपशोभितं ॥ २७ ॥



Digitized by Google

वशिष्ठस्याश्रमपदं ब्रह्मलोकमिवापरं ।
ददर्श जयतां श्रेष्ठो विश्वामित्रो महामनाः ॥ २८ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने शतानन्दवाक्यं
नाम एकपञ्चाशः सर्गः ॥ ५१ ॥

1428
28
1456

---

## CAPUT LII.

## EPISODIUM DE VISVAMITRA.

---

### 1. VISVAMITRAS AD EPULAS INVITATUS.

तं दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः ।
प्रणतो प्रणयाद्वीरो वशिष्ठं जपतां वरं ॥ १ ॥
स्वागतं तव चेत्युक्तो वशिष्ठेन महात्मना ।
आसनं चास्य भगवान् वशिष्ठो व्यादिदेश ह ॥ २ ॥
उपविष्टाय च तदा विश्वामित्राय धीमते ।
यथान्यायं मुनिवरः फलमूलमुपाहरत् ॥ ३ ॥

Digitized by Google

प्रतिगृह्य तु तां पूजां वशिष्ठाद्राजसत्तमः
विश्वामित्रो महातेजाः कुशलं पर्यपृच्छत ॥ ४ ॥
तपोऽग्निहोत्रशिष्येषु वनस्पतिगणे तथा ।
सर्वत्र कुशलं प्राह वशिष्ठो राजसत्तमं ॥ ५ ॥
सुखोपविष्टं राजानं विश्वामित्रं महातपाः ।
पप्रच्छ जपतां श्रेष्ठो वशिष्ठो ब्रह्मणः सुतः ॥ ६ ॥
कच्चित् ते कुशलं राजन् कच्चिद्धर्मेण रञ्जयन् ।
प्रजाः पालयसे वीर राजवृत्तेन धार्मिकः ॥ ७ ॥
कच्चित् ते संभृता भृत्याः कच्चित् तिष्ठन्ति शासने ।
कच्चित् ते विजिताः सर्वे रिपवो रिपुसूदन ॥ ८ ॥
कच्चिद्बलेषु कोशेषु मित्रेषु च परन्तप ।
कुशलं ते नरव्याघ्र पुत्रपौत्रे तथानघ ॥ ९ ॥
सर्वत्र कुशलं राजा तमृतः प्रत्युदाहरत् ।
विश्वामित्रो महातेजा वशिष्ठं विनयान्वितः ॥ १० ॥
कृत्वोभौ सुचिरं कालं धर्मिष्ठौ ताः कथास्तदा ।
मुदा परमया युक्तौ प्रीयेतां तौ परस्परं ॥ ११ ॥
ततो वशिष्ठो भगवान् कथान्ते रघुनन्दन ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥ १२ ॥
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ।
तव चैवाप्रमेयस्य यथार्हं संप्रतीच्छ मे ॥ १३ ॥

Digitized by Google

सत्क्रियां हि भवान् एतां प्रतीच्छतु मयोद्यतां ।
राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ॥ १४ ॥
एवमुक्तो वशिष्ठेन विश्वामित्रो महामतिः ।
कृतमित्यब्रवीद्राजा पूजावाक्येन मे त्वया ॥ १५ ॥
फलमूलेन भगवन् विद्यते यत् तवाश्रमे ।
पाद्येनाचमनीयेन भगवद्दर्शनेन च ॥ १६ ॥
सर्वथा च महाप्राज्ञ पूजार्हेण सुपूजितः ।
गमिष्यामि नमस्ते ऽस्तु मैत्रेणेक्षस्व चक्षुषा ॥ १७ ॥
एवं ब्रुवन्तं राजानं वशिष्ठः पुनरेव हि ।
न्यमन्त्रयत धर्मात्मा पुनः पुनरुदारधीः ॥ १८ ॥
बाढमित्येव गाधेयो वशिष्ठं प्रत्युवाच ह ।
यथा प्रियं भगवतस्तथास्तु मुनिपुंगव ॥ १९ ॥
एवमुक्तस्तथा तेन वशिष्ठो जपतां वरः ।
आजुहाव ततो धेनुं कल्माषीं धूतकल्मषां ॥ २० ॥
एह्येहि शबले क्षिप्रं शृणु चैव वचो मम ।
. . . . . . . . . . ॥ २१ ॥
सबलस्यास्य राजर्षेः कर्तुं व्यवसितो ऽस्म्यहं ।
भोजनेन महार्हेण सत्कारं तद्विधत्स्व मे ॥ २२ ॥
यस्य यस्य यथाकामं षड्रसेष्वभिपूजितं ।
तत् सर्वं कामधुग्दिव्ये अभिवर्ष कृते मम ॥ २३ ॥

Digitized by Google

रसेनान्नेन पेयेन लेह्यचोष्येण संयुतं ।
अन्नानां निचयं सर्वं सृजस्व शबले त्वर ॥ २४ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने विश्वामित्रनिमन्त्रणं
नाम द्विपञ्चाशः सर्गः ॥ ५२ ॥

---

## CAPUT LIII.

### EPISODIUM DE VISVAMITRA.

---

#### 3. COLLOQUIUM VASISTHAE CUM VISVAMITRA.

एवमुक्ता वशिष्ठेन शबला शत्रुसूदन ।
विदधे कामधुक् कामान् यस्य यस्येप्सितान् यथा ॥ १ ॥
इक्षून् मधूनि लाजांश्च मैरेयांश्च वराशवान् ।
पानानि च महार्हाणि भक्ष्यांश्चोच्चावचान् अपि ॥ २ ॥
उष्णाढ्यस्यौदनस्यात्र राशयः पर्वतोपमाः ।
मिष्टान्यन्नानि सूपाश्च दधिकुल्यास्तथैव च ॥ ३ ॥
नानास्वादुरसानां च खाण्डवानां तथैव च ।
भाजनानि सुपूर्णानि गौडानि च सहस्रशः ॥ ४ ॥

Digitized by Google

सर्वमासीत् सुसंतुष्टं हृष्टपुष्टजनायुतं ।
विश्वामित्रबलं राम वशिष्ठेन सुतर्पितं ॥ ५ ॥
विश्वामित्रो हि राजर्षिर्हृष्टपुष्टस्तदाभवत् ।
सामात्यो मन्त्रिसहितः सभृत्यबलवाहनः ॥ ६ ॥
युक्तः परेण हर्षेण वशिष्ठमिदमब्रवीत् ।
पूजितोऽहं त्वया ब्रह्मन् पूजार्हेण सुसत्कृतः ॥ ७ ॥
श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ।
गवां शतसहस्रेण दीयतां शबला मम ॥ ८ ॥
रत्नं हि भगवन्नेतद्रत्नभागी च पार्थिवः ।
तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ॥ ९ ॥
एवमुक्तस्तु भगवान् वशिष्ठो मुनिपुंगवः ।
विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिं ॥ १० ॥
नाहं शतसहस्रेण नापि कोटिशतैर्गवां ।
राजन् दास्यामि शबलां राशिभी रजतस्य वा ॥ ११ ॥
न परित्यागमर्हेयं मत्सकाशादरिंदम ।
शाश्वती शबला मह्यं कीर्तिरात्मवतो यथा ॥ १२ ॥
अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च ।
आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च ॥ १३ ॥
स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ।
आयत्तमत्र राजर्षे सर्वमेतन्न संशयः ॥ १४ ॥

Digitized by Google

सर्वस्वमेतत् सत्येन मम तुष्टिकरी तथा ।
कारणैर्बहुभी राजन् न दास्ये शबलां तव ॥ १५ ॥
वशिष्ठेनैवमुक्तस्तु विश्वामित्रो ऽब्रवीत् तदा ।
संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः ॥ १६ ॥
हिरण्यकक्ष्याग्रैवेयान् सुवर्णाङ्कुशभूषितान् ।
ददामि कुञ्जराणां ते सहस्राणि चतुर्दश ॥ १७ ॥
हैरण्यानां रथानां च श्वेताश्वानां चतुर्युजां ।
ददामि ते शतान्यष्टौ किङ्किणीकविभूषितान् ॥ १८ ॥
हयानां देशजातानां कुलजानां महौजसां ।
सहस्रमेकं दश च ददामि तव सुव्रत ॥ १९ ॥
नानावर्णविभक्तानां वयःस्थानां तथैव च ।
ददाम्येकां गवां कोटिं शबला दीयतां मम ॥ २० ॥
यावदिच्छसि रत्नानि हिरण्यं वा द्विजोत्तम ।
तावद्ददामि ते सर्वं दीयतां शबला मम ॥ २१ ॥
एवमुक्तस्तु भगवान् विश्वामित्रेण धीमता ।
न दास्यामीति शबलां प्राह राजन् कथंचन ॥ २२ ॥
एतदेव हि मे रत्नमेतदेव हि मे धनं ।
एतदेव हि सर्वस्वमेतदेव हि जीवितं ॥ २३ ॥
दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ।
एतदेव हि मे राजन् विविधाश्च क्रियास्तथा ॥ २४ ॥

अदोमूलाः क्रियाः सर्वा मम राजन् न संशयः ।
बहुना किं प्रलापेन न दास्ये कामदोहिनीं ॥ २५ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने वशिष्ठविश्वामित्रसंवादो नाम त्रिपञ्चाशः सर्गः ॥ ५३ ॥

---

## CAPUT LIV.
## EPISODIUM DE VISVAMITRA.

---

### 4. PUGNA VISVAMITRAE CUM SACIS EORUMQUE SOCIIS.

कामधेनुं वशिष्ठोऽसौ यदा न त्यजते मुनिः ।
तदास्य शबलां राजा विश्वामित्रोऽन्वकर्षत ॥ १ ॥
नीयमाना तु शबला राम राज्ञा महात्मना ।
दुःखिता चिन्तयामास रुदती शोककर्शिता ॥ २ ॥
परित्यक्ता वशिष्ठेन किमहं सुमहात्मना ।
याहं राजभटैर्दीना ह्रियेय भृशदुःखिता ॥ ३ ॥
किं मयापकृतं तस्य महर्षेर्भावितात्मनः ।
यन्मामनागसं दृष्ट्वा भक्तां त्यजति धार्मिकः ॥ ४ ॥
इति सा चिन्तयित्वा तु निःश्वस्य च पुनः पुनः ।
जगाम वेगेन तदा वशिष्ठं परमौजसा ॥ ५ ॥

Digitized by Google

विधूय तांस्तदा भृत्यान् शतशः शत्रुसूदन ।
जगामानिलवेगेन पादमूलं महात्मनः ॥ ६ ॥
शबला सा रुदती च क्रोशन्ती चेदमब्रवीत् ।
वशिष्ठस्याग्रतः स्थित्वा मेघदुन्दुभिराविणी ॥ ७ ॥
भगवन् किं परित्यक्ता त्वयाहं ब्रह्मणः सुत ।
यस्माद्राजभटा मां हि नयन्ति त्वत्सकाशतः ॥ ८ ॥
एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् ।
शोकसंतप्तहृदयां स्वसारमिव दुःखितां ॥ ९ ॥
न त्वां त्यजामि शबले नापि मेऽपकृतं त्वया ।
एष त्वां नयते राजा बलोन्मत्तो महाबलः ॥ १० ॥
न हि तुल्यं बलं मन्ये मम राज्ञा विशेषतः ।
बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ॥ ११ ॥
इयमक्षौहिणी पूर्णा गजवाजिरथाकुला ।
पत्तिध्वजसमाकीर्णा तेनासौ बलवत्तरः ॥ १२ ॥
एवमुक्ता वशिष्ठेन प्रत्युवाच विनीतवत् ।
वचनं वचनज्ञा सा ब्रह्मर्षिमतुलप्रभं ॥ १३ ॥
न बलं क्षत्रियस्याहुर्ब्राह्मणा बलवत्तराः ।
ब्रह्मन् ब्रह्मबलं दिव्यं क्षात्राच्च बलवत्तरं ॥ १४ ॥
अप्रमेयं बलं तुभ्यं न त्वया बलवत्तरः ।
विश्वामित्रो महावीर्यस्तेजस्तव दुरासदं ॥ १५ ॥

Digitized by Google

नियुंक्ष्व मां महातेजस्त्वद्ब्रह्मबलसंभृतां ।
तस्य दर्पं बलं यत् तन्नाशयामि दुरात्मनः ॥ १६ ॥
इत्युक्तस्तु तया राम वशिष्ठः स महायशाः ।
सृजस्वेति तदोवाच बलं परबलार्दनं ॥ १७ ॥
तस्या हुम्भारवोत्सृष्टाः पह्लवाः शतशो नृप ।
नाशयन्ति बलं सर्वं विश्वामित्रस्य पश्यतः ॥ १८ ॥
स राजा परमक्रुद्धः क्रोधविस्फारितेक्षणः ।
पह्लवान् नाशयामास शस्त्रैरुच्चावचैरपि ॥ १९ ॥
विश्वामित्रार्दितान् दृष्ट्वा पह्लवान् शतशस्तदा ।
भूय एवासृजद्घोरान् शकान् यवनमिश्रितान् ॥ २० ॥
तैरासीत् संवृता भूमिः शकैर्यवनमिश्रितैः ।
प्रभावद्भिर्महावीर्यैर्हेमकिञ्जल्कसंनिभैः ॥ २१ ॥
तीक्ष्णासिपट्टिशधरैर्हेमवर्णाम्बरावृतैः ।
निर्दग्धं तत् बलं सर्वं प्रदीप्तैरिव पावकैः ॥ २२ ॥
ततोऽस्त्राणि महातेजा विश्वामित्रो मुमोच ह ।
तैस्ते यवनकाम्बोजा बर्बराश्चाकुलीकृताः ॥ २३ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने विश्वामित्रशकादि
युद्धं नाम चतुःपञ्चाशः सर्गः ॥ ५४ ॥

Digitized by Google

# CAPUT LV.

## EPISODIUM DE VISVAMITRA.

---

### 5. VASISHTHAE EREMUS INCENDIO CONSUMTUS.

ततस्तान् आकुलान् दृष्ट्वा विश्वामित्रास्त्रमोहितान् ।
वशिष्ठश्चोदयामास कामधुक् सृज योगतः ॥ १ ॥
तस्या हुम्भारवज्जाताः काम्बोजा रविसंनिभाः ।
ऊधसश्चाथ संभूता वर्वराः शस्त्रपाणयः ॥ २ ॥
योनिदेशाच्च यवनाः शकृद्देशाच्छकाः स्मृताः ।
रोमकूपेषु म्लेच्छाश्च हारीताः सकिरातकाः ॥ ३ ॥
तैस्तन्निषूदितं सर्वं विश्वामित्रस्य तत्क्षणात् ।
सपदातिगजं साश्वं सरथं रघुनन्दन ॥ ४ ॥
दृष्ट्वा निषूदितं सैन्यं वशिष्ठेन महात्मना ।
विश्वामित्रसुतानां तु शतं नानाविधायुधं ॥ ५ ॥
अभ्यधावत् सुसंक्रुद्धं वशिष्ठं जपतां वरं ।
हुङ्कारेणैव तान् सर्वान् निर्ददाह महान् ऋषिः ॥ ६ ॥

Digitized by Google

ते साश्वरथपदाता वशिष्ठेन महात्मना ।
भस्मीकृता मुहूर्तेन विश्वामित्रसुतास्तथा ॥ ७ ॥
दृष्ट्वा विनाशितान् सर्वान् बलं च सुमहायशाः ।
सव्रीडं चिन्तयाविष्टो विश्वामित्रोऽभवत् तदा ॥ ८ ॥
समुद्र इव निर्वेगो भग्नदंष्ट्र इवोरगः ।
उपरक्त इवादित्यः सद्यः निष्प्रभतां गतः ॥ ९ ॥
हतपुत्रबलो दीनो लूनपक्ष इव द्विजः ।
गतसर्वबलोत्साहो निर्वेदं समपद्यत ॥ १० ॥
स पुत्रमेकं राज्याय पालयेति नियुज्य च ।
पृथिवीं क्षत्रधर्मेण वनमेवाभ्यपद्यत ॥ ११ ॥
स गत्वा हिमवत्पार्श्वे किन्नरोरगसेविते ।
महादेवप्रसादार्थं तपस्तेपे महातपाः ॥ १२ ॥
केनचित् त्वथ कालेन देवेशो वृषभध्वजः ।
दर्शयामास वरदो विश्वामित्रं महाबलं ॥ १३ ॥
किमर्थं तप्यसे राजन् ब्रूहि यत् ते विवक्षितं ।
वरदोऽस्मि वरो यस्ते काङ्क्षितः सोऽभिधीयतां ॥ १४ ॥
एवमुक्तस्तु देवेन विश्वामित्रो महातपाः ।
प्रणिपत्य महादेवमिदं वचनमब्रवीत् ॥ १५ ॥
यदि तुष्टो महादेव धनुर्वेदो ममानघ ।
साङ्गोपाङ्गोपनिषदः सरहस्यः प्रदीयतां ॥ १६ ॥

Digitized by Google

यानि देवेषु चास्त्राणि दानवेषु तथर्षिषु ।
गन्धर्वयक्षरक्षःसु प्रतिभान्तु ममानघ ॥ १७ ॥
तव प्रसादाद्भवतु देवदेव ममेप्सितं ।
एवमस्त्विति देवेशो वाक्यमुक्त्वा दिवं ययौ ॥ १८ ॥
प्राप्य चास्त्राणि देवेशाद्विश्वामित्रो महाबलः ।
दर्पेण महता युक्तो दर्पपूर्णो ऽभवत् तदा ॥ १९ ॥
विवर्धमानो वीर्येण समुद्र इव पर्वणि ।
हतमेव तदा मेने वशिष्ठमृषिसत्तमं ॥ २० ॥
ततो गत्वाश्रमपदं मुमोचास्त्राणि पार्थिवः ।
यैस्तत् तपोवनं नाम निर्दग्धं चास्त्रतेजसा ॥ २१ ॥
उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः ।
दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः ॥ २२ ॥
वशिष्ठस्य च ये शिष्या ये च वै मृगपक्षिणः ।
विद्रवन्ति भयाद्भीता नानादिग्भ्यः सहस्रशः ॥ २३ ॥
वशिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः ।
मुहूर्तमिव निःशब्दमासीदीरिणसंनिभं ॥ २४ ॥
वदतो वै वशिष्ठस्य मा भैरिति मुहुर्मुहुः ।
नाशयाम्यद्य गाधेयं नीहारमिव भास्करः ॥ २५ ॥
एवमुक्त्वा महातेजा वशिष्ठो जपतां वरः ।
विश्वामित्रं तदा वाक्यं सरोषमिदमब्रवीत् ॥ २६ ॥

आश्रमं चिरसंवृद्धं यद्विनाशितवान् असि ।
दुराचारो हि यन्मूढस्तस्मात् त्वं न भविष्यसि ॥ २७ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने वशिष्ठाश्रमदाहो
नाम पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

---

## CAPUT LVI.

### Episodium de Visvamitra.

---

#### 6. VISVAMITRAE PROPOSITUM.

एवमुक्तो वशिष्ठेन विश्वामित्रो महाबलः ।
आग्नेयमस्त्रमुद्दिश्य तिष्ठ तिष्ठेति चाब्रवीत् ॥ १ ॥
ब्रह्मदण्डं समुद्यम्य कालदण्डमिवापरं ।
वशिष्ठो भगवान् क्रोधादिदं वचनमब्रवीत् ॥ २ ॥
क्षत्रबन्धो स्थितो ह्येष यद्बलं तद्धि दर्शय ।
नाशयाम्यद्य ते दर्पं शस्त्रस्य तव गाधिज ॥ ३ ॥

Digitized by Google

क्व च ते क्षत्रियबलं क्व च ब्रह्मबलं महत् ।
पश्य ब्रह्मबलं दिव्यं मम क्षत्रियपांशन ॥ ४ ॥
तस्यास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुद्यतं ।
ब्रह्मदण्डेन तच्छान्तमग्नेर्वेग इवाम्भसा ॥ ५ ॥
वारुणं चैव रौद्रं च ऐन्द्रं पाशुपतं तथा ।
ऐषीकं चापि चिक्षेप कुपितो गाधिनन्दनः ॥ ६ ॥
मानवं मोहनं चैव गान्धर्वं स्वापनं तथा ।
जृम्भनं मादनं चैव संतापनविलापने ॥ ७ ॥
शोषणं दारुणं चैव वज्रमस्त्रं सुदुर्जयं ।
ब्रह्मपाशं कालपाशं वारुणं पाशमेव च ॥ ८ ॥
पैनाकमस्त्रं दयितं शुष्कार्द्रे अशनी तथा ।
दण्डास्त्रमथ पैशाचं क्रौञ्चमस्त्रं तथैव च ॥ ९ ॥
धर्मचक्रं कालचक्रं विष्णुचक्रं तथैव च ।
वायव्यं मथनं चैव अस्त्रं हयशिरस्तथा ॥ १० ॥
शक्तिद्वयं च चिक्षेप कङ्कालमुशलं तथा ।
वैद्याधरं महास्त्रं च कालास्त्रमथ दारुणं ॥ ११ ॥
त्रिशूलमस्त्रं घोरं च कापालमथ कङ्कणं ।
एतान्यस्त्राणि चिक्षेप सर्वाणि रघुनन्दन ॥ १२ ॥
वशिष्ठे जपतां श्रेष्ठे तदद्भुतमिवाभवत् ।
तानि सर्वाणि दण्डेन ग्रसते ब्रह्मणः सुतः ॥ १३ ॥

Digitized by Google

तेषु शान्तेषु ब्रह्मास्त्रं क्षिप्तवान् गाधिनन्दनः ।
तदस्त्रमुद्यतं दृष्ट्वा देवाः साग्निपुरोगमाः ॥ १४ ॥
देवर्षयश्च संभ्रान्ता गन्धर्वाः समहोरगाः ।
त्रैलोक्यमासीत् संत्रस्तं ब्रह्मास्त्रे समुदीरिते ॥ १५ ॥
तदप्यस्त्रं महाघोरं ब्राह्मं ब्राह्मेण तेजसा ।
वशिष्ठो ग्रसते सर्वं ब्रह्मदण्डेन राघव ॥ १६ ॥
ब्राह्मास्त्रं ग्रसमानस्य वशिष्ठस्य महात्मनः ।
त्रैलोक्यमोहनं रौद्रं रूपमासीत् सुदारुणं ॥ १७ ॥
रोमकूपेषु सर्वेषु वशिष्ठस्य महात्मनः ।
मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः ॥ १८ ॥
प्राज्वलद्ब्रह्मदण्डश्च वशिष्ठस्य करोद्यतः ।
सधूम इव कालाग्निर्यमदण्ड इवापरः ॥ १९ ॥
ततोऽस्तुवन् मुनिगणा वशिष्ठं जपतां वरं ।
अमोघं ते बलं ब्रह्मन् तेजो धारय तेजसा ॥ २० ॥
निगृहीतस्त्वया ब्रह्मन् विश्वामित्रो महाबलः ।
प्रसीद जपतां श्रेष्ठ लोकाः सन्तु गतव्यथाः ॥ २१ ॥
एवमुक्तो महातेजाः शमं चक्रे महातपाः ।
विश्वामित्रोऽपि निकृतो विनिःश्वस्येदमब्रवीत् ॥ २२ ॥
धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलं ।
एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥ २३ ॥

Digitized by Google

तदेतत् प्रसमीक्ष्याहं प्रसन्नेन्द्रियमानसः ।
तपो महत् समास्थास्ये यद्वै ब्रह्मत्वकारणं ॥ २४ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने विश्वामित्रप्रतिज्ञा
नाम षट्पञ्चाशः सर्गः ॥ ५६ ॥

---

## CAPUT LVII.

## EPISODIUM DE VISVAMITRA.

---

### 7. TRISANCÛS SERMO.

ततः संतप्तहृदयः स्मरन् निग्रहमात्मनः ।
विनिःश्वस्य विनिःश्वस्य कृतवैरो महात्मना ॥ १ ॥
स दक्षिणां दिशं गत्वा महिष्या सह राघव ।
फलमूलाशनो दान्तश्चचार परमं तपः ॥ २ ॥
अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः
हविष्यन्दो मधुष्यन्दो दृढनेत्रो महारथः ॥ ३ ॥
पूर्णे वर्षसहस्रे तु ब्रह्मा लोकपितामहः ।
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनं ॥ ४ ॥

जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ।
अनेन तपसा त्वं हि राजर्षिरिति विद्महे ॥ ५ ॥
एवमुक्त्वा महातेजा जगाम सह दैवतैः ।
त्रिपिष्टपं ब्रह्मलोकं लोकानां परमेश्वरः ॥ ६ ॥
विश्वामित्रोऽपि तच्छ्रुत्वा ह्रिया किंचिदवाङ्मुखः ।
दुःखेन महताविष्टः समन्युरिदमब्रवीत् ॥ ७ ॥
तपश्च सुमहत् तप्तं राजर्षिरिति मां विदुः ।
देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपःफलं ॥ ८ ॥
एवं निश्चित्य मनसा भूय एव महातपाः ।
तपश्चचार काकुत्स्थ परमं परमात्मवान् ॥ ९ ॥
एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः ।
त्रिशंकुरिति विख्यात इक्ष्वाकुकुलवर्धनः ॥ १० ॥
तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ।
गच्छेयं स्वशरीरेण देवतानां परां गतिं ॥ ११ ॥
वशिष्ठं स समाहूय कथयामास चिन्तितं ।
अशक्यमिति चाप्युक्तो वशिष्ठेन महात्मना ॥ १२ ॥
प्रत्याख्यातो वशिष्ठेन स ययौ दक्षिणां दिशं ।
ततस्तत्कर्मसिद्ध्यर्थं पुत्रांस्तस्य गतो नृपः ॥ १३ ॥
त्रिशंकुस्तु महातेजाः शतं परमभास्वरं ।
वशिष्ठपुत्रान् ददृशे तप्यमानान् मनस्विनः ॥ १४ ॥

Digitized by Google

सोऽभिगम्य महात्मानः सर्वान् एव गुरोः सुतान् ।
अभिवाद्यानुपूर्वेण ह्रिया किंचिदवाङ्मुखः ॥ १५ ॥
अब्रवीत् स महाभागान् सर्वान् एव कृताञ्जलिः ।
शरणं वः प्रपन्नोऽहं शरण्यः शरणप्रदान् ॥ १६ ॥
प्रत्याख्यातो हि भद्रं वो वशिष्ठेन महात्मना ।
यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ ॥ १७ ॥
गुरुपुत्रान् अहं सर्वान् नमस्कृत्य प्रसादये ।
शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान् ॥ १८ ॥
ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः ।
सशरीरो यथाहं वै देवलोकमवाप्नुयां ॥ १९ ॥
प्रत्याख्यातो वशिष्ठेन गतिमन्यां तपोधनाः ।
गुरुपुत्रानृते सर्वान् नाहं पश्यामि कंचन ॥ २० ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ।
तस्मादनन्तरं सर्वे भवन्तो दैवतं मम ॥ २१ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने त्रिशंकुवाक्यं नाम
सप्तपञ्चाशः सर्गः ॥ ५७ ॥

157/2 7601

Digitized by Google

## CAPUT LVIII.

## EPISODIUM DE VISVAMITRA.

---

### 4. TRISANCUS EXSECRATIO.

त्रिशङ्कोर्वचनं श्रुत्वा ततः क्रोधसमन्वितं ।
ऋषिपुत्रशतं राम राजानमिदमब्रवीत् ॥ १ ॥
प्रत्याख्यातोऽसि दुर्बुद्धे गुरुणा सत्यवादिना ।
तं कथं समतिक्रम्य शाखान्तरमुपेयिवान् ॥ २ ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ।
न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ॥ ३ ॥
अशक्यमिति चोवाच वशिष्ठो भगवान् ऋषिः ।
तं वयं वै समाहर्तुं क्रतुं शक्ताः कथं तव ॥ ४ ॥
बालिशस्त्वं नरश्रेष्ठ गम्यतां स्वपुरं पुनः ।
याजने भगवान् शक्तस्त्रैलोक्यस्यापि पार्थिव ॥ ५ ॥
तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरं ।
स राजा पुनरेवैतान् इदं वचनमब्रवीत् ॥ ६ ॥
प्रत्याख्यातो भगवता गुरुपुत्रैस्तथैव हि ।
अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः ॥ ७ ॥

Digitized by Google

ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोरमभिसंहितं ।
शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि ॥ ८ ॥
इत्युक्त्वा ते महात्मानो विविशुः स्वं स्वमाश्रमं ।
अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः ॥ ९ ॥
नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः ।
चित्यमाल्याङ्गरागश्च आयसाभरणो ऽभवत् ॥ १० ॥
तं दृष्ट्वा मन्त्रिणः सर्वे त्यज्य चण्डालरूपिणं ।
प्राद्रवन् सहिता राम पौरा ये चानुयायिनः ॥ ११ ॥
एको हि राजा काकुत्स्थ जगाम परमात्मवान् ।
दह्यमानो दिवारात्रं विश्वामित्रं तपोधनं ॥ १२ ॥
विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतं ।
चण्डालरूपिणं राम मुनिः कारुण्यमागतः ॥ १३ ॥
कारुण्यात् स महातेजा वाक्यं परमधार्मिकः ।
इदं जगाद भद्रं ते राजानं घोरदर्शनं ॥ १४ ॥
किमागमनकार्यं ते राजपुत्र महाबल ।
अयोध्याधिपते वीर शापाच्चण्डालतां गतः ॥ १५ ॥
अथ तद्वाक्यमाकर्ण्य राजा चण्डालदर्शनः ।
अब्रवीत् प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदं ॥ १६ ॥
प्रत्याख्यातो ऽस्मि गुरुणा गुरुपुत्रैस्तथैव च ।
अनवाप्यैव तं कामं मया प्राप्तो विपर्ययः ॥ १७ ॥

Digitized by Google

सशरीरो दिवं यायामिति मे सौम्य दर्शनं ।
मया चेष्टं क्रतुशतं तच्च नावाप्यते फलं ॥ १८ ॥
अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ।
कृच्छ्रेष्वपि गतः सौम्य क्षत्रधर्मेण ते शपे ॥ १९ ॥
यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः ।
गुरवश्च महात्मानः शीलवृत्तेन तोषिताः ॥ २० ॥
धर्मे प्रयतमानस्य यज्ञं चाहर्तुमिच्छतः ।
परितोषं न गच्छन्ति गुरवो मुनिपुंगव ॥ २१ ॥
दैवमेव परं मन्ये पौरुषं तु निरर्थकं ।
दैवेनाक्रम्यते सर्वं दैवं हि परमा गतिः ॥ २२ ॥
तस्य मे परमार्त्तस्य प्रसादमभिकाङ्क्षतः ।
कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः ॥ २३ ॥
नान्यां गतिं प्रपश्यामि नान्यच्छरणमस्ति मे ।
दैवं पुरुषकारेण निवर्तयितुमर्हसि ॥ २४ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने त्रिशंकुशापो नाम
अष्टपञ्चाशः सर्गः ॥ ५८ ॥

Digitized by Google

## CAPUT LIX.

## EPISODIUM DE VISVAMITRA.

---

### 9. VASISHTHIDARUM EXSECRATIO.

उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः ।
अब्रवीन्मधुरं वाक्यं साक्षाच्चण्डालतां गतं ॥ १ ॥
इक्ष्वाको स्वागतं वत्स जानामि त्वां सुधार्मिकं ।
शरणं ते प्रदास्यामि मा भैषीर्नृपपुंगव ॥ २ ॥
अहमामन्त्रये सर्वान् महर्षीन् पुण्यकर्मणः ।
यज्ञसाह्यकरान् राजंस्ततो यक्ष्यसि निर्वृतः ॥ ३ ॥
गुरुशापकृतं रूपं यदिदं त्वयि वर्तते ।
अनेन सह रूपेण सशरीरो गमिष्यसि ॥ ४ ॥
हस्तप्राप्तमहं मन्ये स्वर्गं तव नराधिप ।
यस्त्वं कौशिकमागम्य शरण्यः शरणं गतः ॥ ५ ॥
एवमुक्त्वा महातेजाः पुत्रान् परमधार्मिकान् ।
व्यादिदेश महाप्राज्ञान् यज्ञसंभारकारणात् ॥ ६ ॥
सर्वान् शिष्यान् समाहूय वाक्यमेतदुवाच ह ।
सर्वान् ऋषीन् सवाशिष्ठान् आनयध्वं ममाज्ञया ॥ ७ ॥

Digitized by Google

यश्च यद्वचनं ब्रूयान्मद्वाक्यबलचोदितः ।
तत् सर्वमखिलेनोक्तं ममाख्येयमनादृतं ॥ ८ ॥
तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया ।
आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः ॥ ९ ॥
ते च शिष्याः समागम्य मुनिं ज्वलिततेजसं ।
अब्रुवन् वचनं सर्वं सर्वेषां ब्रह्मवादिनां ॥ १० ॥
श्रुत्वा ते वचनं सर्वे समायान्ति द्विजातयः ।
सर्वदेशेषु चागच्छन् वर्जयित्वा महोदयं ॥ ११ ॥
वाशिष्ठं तच्छतं सर्वं क्रोधपर्याकुलाक्षरं ।
यदुवाच वचो घोरं शृणु त्वं मुनिपुंगव ॥ १२ ॥
क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥ १३ ॥
ब्राह्मणा वा महात्मानो भुक्त्वा चण्डालभोजनं ।
कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः ॥ १४ ॥
एतद्वचननैष्ठुर्यमूचुः संरक्तलोचनाः ।
वाशिष्ठा मुनिशार्दूल सर्वे सहमहोदयाः ॥ १५ ॥
इति तेषां वचः श्रुत्वा शिष्याणां मुनिपुंगवः ।
क्रोधसंरक्तनयनः सरोषमिदमब्रवीत् ॥ १६ ॥ ब्रवीत्
यद्दूषयन्त्यदुष्टं मां तप उग्रं समास्थितं ।
भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः ॥ १७ ॥

Digitized by Google

अद्य ते कालपाशेन नीता वैवस्वतक्षयं ।
सप्त जातिशतान्येव मृतपाः संभवन्तु ते ॥ १८ ॥
श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः ।
विकृताश्च विरूपाश्च लोकान् अनुचरन्त्विमान् ॥ १९ ॥
महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत् ।
दूषितः सर्वलोकेषु निषादत्वं गमिष्यति ॥ २० ॥
प्राणानिपातनिरतो निरनुक्रोशतां गतः ।
दीर्घकालं मम क्रोधाद्दुर्गतिं वर्तयिष्यति ॥ २१ ॥
एतावदुक्त्वा वचनं विश्वामित्रो महामुनिः ।
विरराम महातेजास्तस्मिन् मुनिसमागमे ॥ २२ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने वाशिष्ठशापो नाम
एकोनषष्टितमः सर्गः ॥ ५९ ॥

## CAPUT LX.

## Episodium de Visvamitra.

---

### 10. TRISANCUS IN COELUM SUBLATUS.

तपोबलहतान् कृत्वा वाशिष्ठान् समहोदयान् ।
ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
अयमिक्ष्वाकुदायादस्त्रिशंकुरिति विश्रुतः ।
धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः ॥ २ ॥
यथायं स्वशरीरेण देवलोकं गमिष्यति ।
तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह ॥ ३ ॥
विश्वामित्रवचः श्रुत्वा ततस्ते मुनिपुंगवाः ।
मिथः संमन्त्रयामासुर्विश्वामित्रभयार्दिताः ॥ ४ ॥
अयं कुशिकदायादो मुनिः परमकोपनः ।
यदाह वचनं सम्यगेतत् कार्यं न संशयः ॥ ५ ॥
अग्निकल्पो हि भगवान् शापं दास्यति रोषितः ।
तस्मात् प्रवर्त्यतां यज्ञो यथैवोक्तं महर्षिणा ॥ ६ ॥
क्रियतां च तथा यत्नः सशरीरो यथा दिवं ।
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ॥ ७ ॥

Digitized by Google

ततः प्रववृते यज्ञः सर्वसंभारसंभृतः ।
याजकश्च महातेजा विश्वामित्रोऽभवत् क्रतौ ॥ ८ ॥
ऋत्विजश्चानुपूर्वेण मन्त्रवन्मन्त्रकोविदाः ।
चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि ॥ ९ ॥
ततः कालेन महता विश्वामित्रो महातपाः ।
चकारावाहनं तत्र भागार्थं सर्वदेवताः ॥ १० ॥
नाभ्यगमन् यदा तत्र भागार्थं सर्वदेवताः ।
ततः कोपसमाविष्टो विश्वामित्रो महामुनिः ॥ ११ ॥
स्रुवमुद्यम्य सक्रोधस्त्रिशंकुमिदमब्रवीत् ।
पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर ॥ १२ ॥
एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ।
दुष्प्रापं स्वशरीरेण स्वर्गं गच्छ नरेश्वर ॥ १३ ॥
स्वार्जितं किंचिदप्यस्ति मया हि तपसः फलं ।
राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज ॥ १४ ॥
उक्तवाक्ये मुनौ तस्मिन् सशरीरो नरेश्वरः ।
दिवं जगाम काकुत्स्थ मुनीनां पश्यतां तदा ॥ १५ ॥
स्वर्गलोकं गतं दृष्ट्वा त्रिशंकुं पाकशासनः ।
सह सर्वैः सुरगणैरिदं वचनमब्रवीत् ॥ १६ ॥
त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ।
गुरुशापहतो मूढ पत भूमिमवाक्शिराः ॥ १७ ॥

Digitized by Google

एवमुक्तो महेन्द्रेण त्रिशंकुरपतत् पुनः ।
विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनं ॥ १८ ॥
तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः ।
रोषमाहारयत् तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १९ ॥
ततो ब्रह्मतपोयोगात् प्रजापतिरिवापरः ।
ससर्ज दक्षिणे भागे सप्तर्षीन् अपरान् पुनः ॥ २० ॥
दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः ।
नक्षत्रमालामपरामसृजत् क्रोधमूर्छितः ॥ २१ ॥
अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः ।
दैवतान्यपि स क्रोधात् स्रष्टुं समुपचक्रमे ॥ २२ ॥
ततः परमसंभ्रान्ताः सर्षिसङ्घाः सुरासुराः ।
विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥ २३ ॥
अयं राजा महाभाग गुरुशापपरिक्षतः ।
सशरीरो दिवं यातुं नार्हत्यकृतपावनः ॥ २४ ॥
तेषां तद्वचनं श्रुत्वा देवानां मुनिपुंगवः ।
अब्रवीत् सुमहद्वाक्यं कौशिकः सर्वदेवताः ॥ २५ ॥
सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः ।
आरोहणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे ॥ २६ ॥
स्वर्गोऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः ।
नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ ॥ २७ ॥

Digitized by Google

यावल्लोका धारिष्यन्ति तिष्ठन्त्वेतानि सर्वशः ।
मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥ २८ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुंगवं ।
एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वशः ॥ २९ ॥
गगने तान्यनेकानि वैश्वानरपथाद्बहिः ।
नक्षत्राणि मुनिश्रेष्ठ तेषु ज्योतिःषु जाज्वलन् ॥ ३० ॥
अवाक्शिरास्त्रिशंकुश्च तिष्ठत्वमरसंनिभः ।
अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमं ॥ ३१ ॥
विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः ।
ऋषिमध्ये महातेजा बाढमित्याह देवताः ॥ ३२ ॥
ततो देवा महात्मान ऋषयश्च तपोधनाः ।
जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ॥ ३३ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने त्रिशंकुस्वर्गारोहणं
नाम षष्टितमः सर्गः ॥ ६० ॥

1622
33
1655

Digitized by Google

## CAPUT LXI.

## EPISODIUM DE VISVAMITRA.

---

### 11. SUNASSEPHI MANCIPATIO.

विश्वामित्रो महातेजाः प्रस्थितान् वीक्ष्य तान् ऋषीन् ।
अब्रवीन्नरशार्दूल सर्वांस्तान् वनवासिनः ॥ १ ॥
महान् विघ्नः प्रवृत्तोऽयं दक्षिणामास्थितो दिशं ।
दिशमन्यां प्रपत्स्यामस्तत्र तप्स्यामहे तपः ॥ २ ॥
पश्चिमस्यां विशालायां पुष्करारण्यमाश्रिताः ।
सुखं तपश्चरिष्यामः परं तद्धि तपोवनं ॥ ३ ॥
एवमुक्त्वा महातेजाः पुष्करेषु महामुनिः ।
तप उग्रं दुराधर्षं तेपे मूलफलाशनः ॥ ४ ॥
एतस्मिन्नेव काले तु अयोध्याधिपतिर्महान् ।
अम्बरीष इति ख्यातो यष्टुं समुपचक्रमे ॥ ५ ॥
तस्य वै यजमानस्य पशुमिन्द्रो जहार ह ।
प्रणष्टे तु पशौ विप्रो राजानमिदमब्रवीत् ॥ ६ ॥
पशुरत्र हृतो राजन् प्रणष्टस्तव दुर्नयात् ।
अरक्षितारं राजानं घ्नन्ति दोषा नरेश्वर ॥ ७ ॥

Digitized by Google

प्रायश्चित्तं महद्ध्येतन्नरं वा पुरुषर्षभ ।
आनयस्व पशुं शीघ्रं यावत् कर्म प्रवर्तते ॥ ८ ॥
उपाध्यायवचः श्रुत्वा इक्ष्वाकुः सोऽमितप्रभः ।
अन्विवेष महाबुद्धिः पशुं गोभिः सहस्रशः ॥ ९ ॥
देशान् जनपदांस्तांस्तान् नगराणि वनानि च ।
आश्रमाणि च पुण्यानि मार्गमाणो महीपतिः ॥ १० ॥
स पुत्रसहितं तात सभार्यं रघुनन्दन ।
भृगुतुङ्गे समासीनमृचीकं संददर्श ह ॥ ११ ॥
अम्बरीषो महातेजाः प्रणम्याभिप्रसाद्य च ।
ब्रह्मर्षिं तपसा दीप्तं राजर्षिरिदमब्रवीत् ॥ १२ ॥
गवां शतसहस्रेण विक्रीणीषे सुतं यदि ।
पशोरर्थे महाभाग कृतकृत्योऽस्मि भार्गव ॥ १३ ॥
सर्वे परिगता देशा यज्ञियं न लभे पशुं ।
दातुमर्हसि मूल्येन सुतमेकमितो मम ॥ १४ ॥
एवमुक्तो महातेजा ऋचीकस्त्वब्रवीद्वचः ।
नाहं ज्येष्ठं नरश्रेष्ठ विक्रीणीयां कथंचन ॥ १५ ॥
ऋचीकवचनं श्रुत्वा तेषां माता महात्मनां ।
उवाच नरशार्दूलमम्बरीषमिदं वचः ॥ १६ ॥
अविक्रेयं सुतं ज्येष्ठं भगवान् आह भार्गवः ।
ममापि दयितं विद्धि कनिष्ठं शुनकं प्रभो ॥ १७ ॥

Digitized by Google

प्रायेण हि नरश्रेष्ठ ज्येष्ठाः पितृषु वल्लभाः ।
मातॄणां च कनीयांसस्तस्माद्रक्षे कनीयसं ॥ १८ ॥
उक्तवाक्ये मुनौ तस्मिन् मुनिपत्न्यां तथैव च ।
शुनःशेफः स्वयं राम मध्यमो वाक्यमब्रवीत् ॥ १९ ॥
पिता ज्येष्ठमविक्रेयं माता चाह कनीयसं ।
विक्रीतं मध्यमं मन्ये राजपुत्र नयस्व मां ॥ २० ॥
गवां शतसहस्रेण शुनःशेफं ततो नृपः ।
गृहीत्वा परमप्रीतो जगाम रघुनन्दन ॥ २१ ॥
रथमारोप्य तं राम शुनःशेफं त्वरान्वितः ।
आजगाम ततो यज्ञं समापयितुमात्मनः ॥ २२ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने शुनःशेफविक्रयो
नाम एकषष्टितमः सर्गः ॥ ६१ ॥

# CAPUT LXII.

## Episodium de Visvâmitra.

---

### 12. Ambarishi sacrificium.

शुनःशेफं तमादाय स राजा श्रान्तवाहनः ।
व्यश्राम्यत् पुष्करे तीर्थे मध्याह्ने रघुनन्दन ॥ १ ॥
तस्य विश्राम्यतस्तत्र शुनःशेफो महाद्युतिः ।
पुष्करं ज्येष्ठमागम्य विश्वामित्रं ददर्श ह ॥ २ ॥
तप्यन्तमृषिभिः सार्द्धं मातुलं परमातुरः ।
विषण्णवदनो दीनस्तृष्णया च श्रमेण च ॥ ३ ॥
पपाताङ्के मुने राम वाक्यं चेदमुवाच ह ।
न मेऽस्ति माता न पिता ज्ञातयो बान्धवाः कुतः ॥ ४ ॥
त्रातुमर्हसि मां सौम्य धर्मेण मुनिपुंगव ।
त्राता त्वं हि नरश्रेष्ठ सर्वेषां त्वं हि भावनः ॥ ५ ॥
राजा च कृतकार्यः स्यादहं दीर्घायुरव्ययः ।
स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमं ॥ ६ ॥
स मे नाथो ह्यनाथस्य भव भव्येन चेतसा ।
पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्विषात् ॥ ७ ॥



Digitized by Google

तस्य तद्वचनं श्रुत्वा विश्वामित्रो महातपाः ।
शान्त्वयित्वा बहुविधं पुत्रान् इदमुवाच ह ॥ ८ ॥
यत्कृते पितरः पुत्रान् जनयन्ति शुभार्थिनः ।
परलोकहितार्थाय तस्य कालोऽयमागतः ॥ ९ ॥
अयं मुनिसुतो बालो मत्तः शरणमिच्छति ।
अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः ॥ १० ॥
सर्वे सुकृतकर्माणः सर्वे धर्मपरायणाः ।
पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छत ॥ ११ ॥
नाथवांश्च शुनःशेफो यज्ञश्चाविघ्नितो भवेत् ।
देवतास्तर्पिताश्च स्युर्मम चापि कृतं वचः ॥ १२ ॥
मुनेस्तु वचनं श्रुत्वा मधुष्यन्दादयः सुताः ।
साभिमानं नरश्रेष्ठ सलीलमिदमब्रुवन् ॥ १३ ॥
कथमात्मसुतान् हित्वा त्रायसेऽन्यसुतान् विभो ।
अकार्यमिव पश्यामः स्वमांसमिव भोजने ॥ १४ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां मुनिपुंगवः ।
क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे ॥ १५ ॥
निःसाधसमिदं प्रोक्तं धर्मादपि विगर्हितं ।
अतिक्रम्य तु मद्वाक्यं दारुणं रोमहर्षणं ॥ १६ ॥
अमांसभोजनाः सर्वे वाशिष्ठा इव जातिषु ।
पूर्णवर्षसहस्रं तु पृथिव्यामनुवत्स्यथ ॥ १७ ॥

Digitized by Google

कृत्वा शापसमायुक्तान् पुत्रान् मुनिवरस्तदा ।
शुनःशेफमुवाचार्त्तं कृत्वा रक्षां निरामयां ॥ १८ ॥
पवित्रपाशैराबद्धो रक्तमाल्यानुलेपनः ।
वैष्णवं यूपमासाद्य वाग्भिरग्निमुदाहर ॥ १९ ॥
इमे च गाथे द्वे दिव्ये गायेथा मुनिपुत्रक ।
अम्बरीषस्य यज्ञेऽस्मिंस्ततः सिद्धिमवाप्स्यसि ॥ २० ॥
शुनःशेफो गृहीत्वा ते द्वे गाथे सुसमाहितः ।
त्वरया राजसिंहं तमम्बरीषमुवाच ह ॥ २१ ॥
राजसिंह महाबुद्धे शीघ्रं गच्छामहे वयं ।
निवर्तयस्व राजेन्द्र दीक्षां च समुपाविश ॥ २२ ॥
तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमन्वितः ।
जगाम नृपतिः शीघ्रं यज्ञवाटमतन्द्रितः ॥ २३ ॥
सदस्यानुमते राजा पवित्रकृतलक्षणं ।
पशुं रक्ताम्बरं कृत्वा यूपे तं समबन्धयत् ॥ २४ ॥
स बद्धो वाग्भिरग्न्याभिरभितुष्टाव वै सुरौ ।
इन्द्रमिन्द्रानुजं चैव यथावन्मुनिपुत्रकः ॥ २५ ॥
तस्मै प्रीतः सहस्राक्षो रहस्यस्तुतितोषितः ।
दीर्घमायुस्तदा प्रादाच्छुनःशेफाय वासवः ॥ २६ ॥
स च राजा नरश्रेष्ठ तस्य यज्ञस्य लब्धवान् ।
फलं बहुगुणं राम सहस्राक्षप्रसादजं ॥ २७ ॥

Digitized by Google

विश्वामित्रोऽपि धर्मात्मा भूयस्तेपे महत् तपः ।
पुष्करेष्वेव वर्षाणां सहस्रं नियतव्रतः ॥ २८ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने अम्बरीषयज्ञो नाम
द्विषष्टितमः सर्गः ॥ ६२ ॥

---

## CAPUT LXIII.

## EPISODIUM DE VISVAMITRA.

---

### 15. MENACAE HABITATIO TERRESTRIS.

पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिं ।
अभ्यागच्छन् सुराः सर्वे तपःफलं चिकीर्षवः ॥ १ ॥
तत्रैनमब्रवीत् ब्रह्मा पुनः सुरुचिरं वचः ।
ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ॥ २ ॥
तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात् ।
विश्वामित्रोऽपि तच्छ्रुत्वा भूयस्तेपे महत् तपः ॥ ३ ॥
ततः कालेन महता मेनका परमाप्सराः ।
पुष्करेषु नरश्रेष्ठ स्नातुं समुपचक्रमे ॥ ४ ॥

Digitized by Google

तां ददर्श महातेजा मेनकां कुशिकात्मजः ।
रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा ॥ ५ ॥
तां दृष्ट्वा चारुसर्वाङ्गीं मेनकां विजने वने ।
कन्दर्पवशगोऽभ्येत्य मुनिर्वचनमब्रवीत् ॥ ६ ॥
अप्सरः स्वागतं तेऽस्तु वस चेह ममाश्रमे ।
अनुगृह्णीष्व भद्रं ते मदनेन विमोहितं ॥ ७ ॥
इत्युक्ता सा वरारोहा तत्र वासमथाकरोत् ।
तपसो हि महाविघ्नो विश्वामित्रमुपागमत् ॥ ८ ॥
तस्यां वसन्त्यां वर्षाणि पञ्च पञ्च च राघव ।
विश्वामित्राश्रमे सौम्ये सुखेन व्यतिचक्रमुः ॥ ९ ॥
अथ काले गते तस्मिन् विश्वामित्रो महामुनिः ।
सव्रीड इव संवृत्तश्चिन्ताशोकपरायणः ॥ १० ॥
बुद्धिर्मुनेः समुत्पन्ना सामर्षा रघुनन्दन ।
सर्वसुराणां कर्मैतत् तपोऽपहरणं महत् ॥ ११ ॥
अहोरात्रापदेशेन गताः सम्वत्सरा दश ।
काममोहाभिभूतस्य विघ्नोऽयं प्रत्युपस्थितः ॥ १२ ॥
स निःश्वसन् मुनिवरः पश्चात्तापेन दुःखितः ।
भीतामप्सरसं दृष्ट्वा वेपन्तीं प्राञ्जलिं स्थितां ॥ १३ ॥
मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ।
उत्तरं पर्वतं राम विश्वामित्रो जगाम ह ॥ १४ ॥

Digitized by Google

स कृत्वा नैष्ठिकीं बुद्धिं जेतुकामो महायशाः ।
कौशिकीतीरमासाद्य तपस्तेपे दुरासदं ॥ १५ ॥
तस्य वर्षसहस्राणि घोरं तप उपासतः ।
उत्तरे पर्वते राम देवतानामभूद्भयं ॥ १६ ॥
अमन्त्रयन् समागम्य सर्वे सर्षिगणाः सुराः ।
महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः ॥ १७ ॥
देवतानां वचः श्रुत्वा सर्वलोकपितामहः ।
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनं ॥ १८ ॥
महर्षे स्वागतं वत्स तपसोग्रेण तोषितः ।
महत्त्वमृषिमुख्यत्वं ददामि तव कौशिक ॥ १९ ॥
ब्रह्मणस्तद्वचः श्रुत्वा विश्वामित्रस्तपोधनः ।
न विषण्णो न संतुष्टः प्रत्युवाच पितामहं ॥ २० ॥
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ।
यदि मे भगवान् आह ततोऽहं विजितेन्द्रियः ॥ २१ ॥
तमुवाच ततो ब्रह्मा न तावत् त्वं जितेन्द्रियः ।
यतस्व मुनिशार्दूल इत्युक्त्वा स दिवं गतः ॥ २२ ॥
विश्वामित्रोऽपि तत्रैव तेपे घोरतरं तपः ।
ऊर्ध्वबाहुर्निरालम्ब एकपादप्रतिष्ठितः ॥ २३ ॥
वायुभक्षः स्थितः स्थान एकस्मिन् स्थाणुवत् स्थिरः ।
घर्मे पञ्चतपा भूत्वा वर्षास्वभ्रावकाशकः ॥ २४ ॥

Digitized by Google

शिशिरे सलिले शायी रात्र्यहानि तपोधनः ।
एवं वर्षसहस्रं हि तपो घोरमुपागमत् ॥ २५ ॥
तस्मिन् संतप्यमाने तु विश्वामित्रे महामुनौ ।
संतापः सुमहान् आसीत् सुराणां वासवस्य च ॥ २६ ॥
संभ्रमं परमास्थाय ततः शक्रः सुराधिपः ।
चिन्तयित्वा तपोविघ्नमुपायं रघुनन्दन ॥ २७ ॥
आहूयाप्सरसं रम्भां मरुद्गणावृतः प्रभुः ।
उवाचात्महितं वाक्यमहितं कौशिकस्य च ॥ २८ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने मेनकानिर्वासो
नाम त्रिषष्टितमः सर्गः ॥ ६३ ॥

1415
26
1733

## CAPUT LXIV.

## EPISODIUM DE VISVAMITRA.

---

### 14. RAMBHAE EXSECRATIO.

सुरकार्यमिदं रम्भे कर्तव्यं सुमहत् त्वया ।
लोभनं कौशिकस्येह काममोहसमन्वितं ॥ १ ॥
तथोक्ता साप्सरा राम सहस्राक्षेण धीमता ।
वीडिता प्राञ्जलिर्वाक्यं प्रत्युवाच सुरेश्वरं ॥ २ ॥
अयं सुरपते घोरो विश्वामित्रो महामुनिः ।
क्रोधमुत्सृजते क्रूरं मयि देव न संशयः ॥ ३ ॥
ततो हि मे भयं देव प्रसादं कर्तुमर्हसि ।
एवमुक्तस्तया राम सभयं भीतया तदा ॥ ४ ॥
तामुवाच सहस्राक्षो वेपमानां कृताञ्जलिं ।
मा भैषी रम्भे भद्रं ते कुरुष्व मम शासनं ॥ ५ ॥
कोकिलो हृदयग्राही माधवे रुचिरद्रुमे ।
अहं कन्दर्पसहितः स्थास्यामि तव पार्श्वतः ॥ ६ ॥
त्वं हि रूपं बहुगुणं कृत्वा परमभास्वरं ।
तमृषिं कौशिकं रम्भे भेदयस्व तपस्विनं ॥ ७ ॥

Digitized by Google

सा श्रुत्वा वचनं तस्य कृत्वा रूपमनुत्तमं ।
लोभयामास ललिता विश्वामित्रं शुचिस्मिता ॥ ८ ॥
कोकिलस्य तु शुश्राव वल्गु व्याहरतः स्वनं ।
संप्रहृष्टेन मनसा स चैनामन्ववैक्षत ॥ ९ ॥
अथ तस्य च शब्देन गीतेनाप्रतिमेन च ।
दर्शनेन च रम्भाया मुनिः संदेहमागतः ॥ १० ॥
सहस्राक्षस्य तत् सर्वं विज्ञाय मुनिपुंगवः ।
रम्भां क्रोधसमाविष्टः शशाप कुशिकात्मजः ॥ ११ ॥
यन्मां लोभयसे रम्भे कामक्रोधजयैषिणं ।
दश वर्षसहस्राणि शैली स्थास्यसि दुर्भगे ॥ १२ ॥
ब्राह्मणः सुमहातेजास्तपोबलसमन्वितः ।
उद्धरिष्यति रम्भे त्वां मत्क्रोधकलुषीकृतां ॥ १३ ॥
एवमुक्त्वा महातेजा विश्वामित्रो महामुनिः ।
अशक्नुवन् धारयितुं कोपं संतापमागतः ॥ १४ ॥
तस्य शापेन महता रम्भा शैली तदाभवत् ।
वचः श्रुत्वा तु कन्दर्पो महर्षेः स च निर्गतः ॥ १५ ॥
कोपेन च महातेजास्तपोऽपहरणे कृते ।
इन्द्रियैरजितै राम न लेभे शान्तिमात्मनः ॥ १६ ॥
बभूवास्य पुनश्चिन्ता . . . . . . . ।
. . . . . . . . . . . . . ॥ १७ ॥

नैव क्रोधं गमिष्यामि न च वक्ष्ये कथंचन ।
अथ वा नोच्छ्वसिष्यामि सम्वत्सरशतान्यपि ॥ १८ ॥
अहं हि शोषयिष्यामि आत्मानं विजितेन्द्रियः ।
तावद्यावद्धि मे प्राप्तं ब्राह्मण्यं तपसार्जितं ॥ १९ ॥
अनुच्छ्वसन्नभुञ्जानस्तिष्ठेयं शाश्वतीः समाः ।
न हि मे तप्यमानस्य क्षयं यास्यन्ति मूर्त्तयः ॥ २० ॥

इति बालकाण्डे विश्वामित्रोपाख्याने रम्भाशापो नाम
चतुःषष्टितमः सर्गः ॥ ६४ ॥

## CAPUT LXV.

## Episodium de Visvamitra.

### 15. Visvamitras in Brahmanum ordinem receptus.

अथ हैमवतीं राम दिशं त्यक्त्वा महामुनिः ।
पूर्वां दिशमनुप्राप्य तपस्तेपे सुदारुणं ॥ १ ॥
मौनं वर्षसहस्रस्य कृत्वा व्रतमनुत्तमं ।
चकाराप्रतिमं लोके तपः परमदुष्करं ॥ २ ॥

Digitized by Google

पूर्णे वर्षसहस्रे तु काष्ठभूतं महामुनिं ।
विघ्नैर्बहुभिराधूतं क्रोधो नान्तरमाविशत् ॥ ३ ॥
स कृत्वा निश्चयं राम तप आतिष्ठताव्ययं ।
तस्य वर्षसहस्रस्य व्रते पूर्णे महाव्रतः ॥ ४ ॥
भोक्तुमारब्धवान् अन्नं तस्मिन् काले रघूत्तम ।
इन्द्रो द्विजातिर्भूत्वा तं सिद्धमन्नमयाचत ॥ ५ ॥
तस्मै दत्वा तदा सिद्धं सर्वं विप्राय निश्चितः ।
निःशेषिते ऽन्ने भगवान् अभुक्त्वैव महातपाः ॥ ६ ॥
न किंचिदवदद्विप्रं मौनव्रतमुपास्थितः ।
तथैव मौनमकरोदनुच्छ्वासं च राघव ॥ ७ ॥
तस्यानुच्छ्वसमानस्य मूर्ध्नि धूमो व्यजायत ।
त्रैलोक्यं येन संभ्रान्तमादीपितमिवाभवत् ॥ ८ ॥
ततो देवर्षिगन्धर्वाः पन्नगोरगराक्षसाः ।
कश्मलोपहताः सर्वे पितामहमथाब्रुवन् ॥ ९ ॥
बहुभिः कारणैर्देव विश्वामित्रो महामुनिः ।
लोभितः क्रोधितश्चैव तपसा चाभिवर्धते ॥ १० ॥
न दीयते यदि त्वस्य मनसा यदभीप्सितं ।
विनाशयति त्रैलोक्यं तपसा सचराचरं ॥ ११ ॥
व्याकुलाश्च दिशः सर्वा न च किंचित् प्रकाशते ।
सागराः क्षुभिताः सर्वे विशीर्यन्ते च पर्वताः ॥ १२ ॥

Digitized by Google

प्रकम्पते च पृथिवी वायुर्वातीह संकुलः ।
ब्रह्मन् न प्रतिजानीमो नास्तिको जायते जनः ॥ १३ ॥
संमूढमिव त्रैलोक्यं संप्रक्षुभितमानसं ।
भास्करो निष्प्रभश्चैव महर्षेस्तस्य तेजसा ॥ १४ ॥
बुद्धिं न कुरुते यावन्नाशे देव महामुनिः ।
तावत् प्रसाद्यो भगवान् अग्निरूपो महाद्युतिः ॥ १५ ॥
कालाग्निना यथा पूर्वं त्रैलोक्यं दह्यते ऽखिलं ।
देवराज्यं चिकीर्षेत दीयतामस्य यन्मतं ॥ १६ ॥
ततः सुरगणाः सर्वे पितामहपुरोगमाः ।
विश्वामित्रं महात्मानं वाक्यं मधुरमब्रुवन् ॥ १७ ॥
ब्रह्मर्षे स्वागतं ते ऽस्तु तपसा स्म सुतोषिताः ।
ब्राह्मण्यं तपसोग्रेण प्राप्तवान् असि कौशिक ॥ १८ ॥
दीर्घमायुश्च ते ब्रह्मन् ददामि समरुद्गणाः ।
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य यथासुखं ॥ १९ ॥
पितामहवचः श्रुत्वा सर्वेषां त्रिदिवौकसां ।
कृत्वा प्रणामं मुदितो व्याजहार महामुनिः ॥ २० ॥
ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ।
ओंकारो ऽथ वषट्कारो वेदाश्च वरयन्तु मां ॥ २१ ॥
क्षत्रवेदविदां श्रेष्ठो ब्रह्मवेदविदामपि ।
ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः ॥ २२ ॥

Digitized by Google

ततः प्रसादितो देवैर्वशिष्ठो जपतां वरः ।
सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् ॥ २३ ॥
ब्रह्मर्षित्वं न संदेहः सर्वं संपद्यते तव ।
इत्युक्त्वा देवताश्चापि सर्वा जग्मुर्यथागतं ॥ २४ ॥
विश्वामित्रोऽपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमं ।
पूजयामास ब्रह्मर्षिं वशिष्ठं जपतां वरं ॥ २५ ॥
कृतकामो महीं सर्वां चचार तपसि स्थितः ।
एवं त्वनेन ब्राह्मण्यं प्राप्तं राम महात्मना ॥ २६ ॥
एष राम मुनिश्रेष्ठ एष विग्रहवत् तपः ।
एष धर्मपरो नित्यं वीर्यस्यैष परायणं ॥ २७ ॥

एवमुक्त्वा महातेजा विरराम द्विजोत्तमः ।
अपूजयच्छतानन्दं साधु साध्विति कौशिकः ॥ २८ ॥
शतानन्दवचः श्रुत्वा रामलक्ष्मणसंनिधौ ।
जनकः प्राञ्जलिर्वाक्यमुवाच कुशिकात्मजं ॥ २९ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुंगव ।
यज्ञं काकुत्स्थसहितः प्राप्तवान् असि धार्मिकः ॥ ३० ॥
पावितोऽहं त्वया ब्रह्मन् दर्शनेन महामुने ।
गुणा बहुविधाः प्राप्तास्तव संदर्शनान्मया ॥ ३१ ॥

Digitized by Google

विस्तरेण च वै ब्रह्मन् कीर्त्यमानं महत् तपः ।
श्रुतं मया महातेजो रामेण च महात्मना ॥ ३२ ॥
अप्रमेयं तपस्तुभ्यमप्रमेयं च ते बलं ।
अप्रमेया गुणाश्चैव नित्यं ते कुशिकात्मज ॥ ३३ ॥
तृप्तिराश्चर्यभूतानां कथानां नास्ति मे विभो ।
कर्मकालो मुनिश्रेष्ठ लम्बते रविमण्डलं ॥ ३४ ॥
श्वः प्रभाते महातेजो द्रष्टुमर्हसि मां पुनः ।
स्वागतं तपतां श्रेष्ठ मामनुज्ञातुमर्हसि ॥ ३५ ॥
एवमुक्तो मुनिवरः प्रशस्य पुरुषर्षभं ।
विससर्जाशु जनकं प्रीतं प्रीतमनास्तदा ॥ ३६ ॥
एवमुक्त्वा मुनिश्रेष्ठं वैदेहो मिथिलाधिपः ।
प्रदक्षिणं चकाराशु सोपाध्यायः सबान्धवः ॥ ३७ ॥
विश्वामित्रोऽपि धर्मात्मा सहरामः सलक्ष्मणः ।
स्ववाटमभिचक्राम पूज्यमानो महात्मभिः ॥ ३८ ॥

इति बालकाण्डे विश्वामित्रोपाख्याने विश्वामित्रब्रह्मत्वप्राप्तिर्नाम पञ्चषष्टितमः सर्गः ॥ ६५ ॥

1753
733
1791

Digitized by Google

## CAPUT LXVI.

### JANACI SERMO.

ततः प्रभाते विमले कृतकर्मा नराधिपः ।
विश्वामित्रं महात्मानमाजुहाव सराघवं ॥ १ ॥
तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन कर्मणा ।
राघवौ च महात्मानौ तदा वाक्यमुवाच ह ॥ २ ॥
भगवन् स्वागतं तेऽस्तु किं करोमि तवानघ ।
भवान् आज्ञापयतु मामाज्ञाप्यो भवतां ह्यहं ॥ ३ ॥
एवमुक्तः स धर्मात्मा जनकेन महात्मना ।
प्रत्युवाच मुनिर्वीरं वाक्यं वाक्यविशारदः ॥ ४ ॥
पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ ।
द्रष्टुकामौ धनुःश्रेष्ठं यदेतत् त्वयि तिष्ठति ॥ ५ ॥
एतद्दर्शय भद्रं ते कृतकामौ नृपात्मजौ ।
दर्शनादस्य धनुषो यथेष्टं प्रतियास्यतः ॥ ६ ॥
एवमुक्तस्तु जनकः प्रत्युवाच महामुनिं ।
श्रूयतामस्य धनुषो यदर्थमिह तिष्ठति ॥ ७ ॥
देवरात इति ख्यातो निमेः षष्ठो महीपतिः ।
न्यासोऽयं तस्य भगवन् हस्ते दत्तो महात्मनः ॥ ८ ॥
दक्षयज्ञवधे पूर्वं धनुरायम्य वीर्यवान् ।
विधस्य त्रिदशान् रुद्रः सलीलमिदमब्रवीत् ॥ ९ ॥

Digitized by Google

यस्माद्भागार्थिनो भागान् नाकल्पयत मे सुराः ।
वराङ्गानि महार्हाणि धनुषा शातयामि वः ॥ १० ॥
ततो विमनसः सर्वे देवा वै मुनिपुंगव ।
प्रासादयन्त देवेशं तेषां प्रीतोऽभवद्भवः ॥ ११ ॥
प्रीतश्चापि ददौ तेषां तान्यङ्गानि महौजसां ।
धनुषा यानि यान्यासन् शातितानि महात्मना ॥ १२ ॥
तदेतद्देवदेवस्य धनूरत्नं महात्मनः ।
न्यासभूतं तदा न्यस्तमस्माकं पूर्वके विभो ॥ १३ ॥
अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः ।
क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ॥ १४ ॥
भूतलादुत्थिता सा तु वर्धमाना ममात्मजा ।
वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा ॥ १५ ॥
भूतलादुत्थितां तां तु वर्धमानां ममात्मजां ।
वरयामासुरागत्य राजानो मुनिपुंगव ॥ १६ ॥
तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षितां ।
वीर्यशुल्केति भगवन् न ददामि सुतामहं ॥ १७ ॥
ततः सर्वे नृपतयः समेत्य मुनिपुंगव ।
मिथिलामभ्युपागम्य वीर्यं जिज्ञासवस्तदा ॥ १८ ॥
तेषां जिज्ञासमानानां शैवं धनुरुपाहृतं ।
न शेकुर्ग्रहणे तस्य धनुषस्तोलनेऽपि वा ॥ १९ ॥

तेषां वीर्यवतां वीर्यमल्पं ज्ञात्वा मह्ामुने ।
प्रत्याख्याता नृपतयस्तन्निबोध तपोधन ॥ २० ॥
ततस्तेनैव कोपेन राजानो सुमह्ाबलाः ।
व्यरुन्धन् मिथिलां सर्वे वीर्यसंदेह्मागताः ॥ २१ ॥
आत्मानमवधूतं ते विज्ञाय नृपपुंगवाः ।
रोषेण मह्ताविष्टाः पीडयन् मिथिलां पुरीं ॥ २२ ॥
ततः सम्वत्सरे पूर्णे क्षयं यातानि सर्वशः ।
साधनानि मुनिश्रेष्ठ ततोऽहं भृशदुःखितः ॥ २३ ॥
ततो देवगणान् सर्वांस्तपसाहं प्रसादये ।
ददुश्च परमप्रीताश्चतुरङ्गबलं सुराः ॥ २४ ॥
ततो भग्ना नृपतयो हन्यमाना दिशो ययुः ।
अवीर्या वीर्यसंदिग्धाः सामात्याः पापकारिणाः ॥ २५ ॥
तदेतन्मुनिशार्दूल धनुः परमभास्वरं ।
रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत ॥ २६ ॥
यद्यस्य धनुषो रामः कुर्यादारोपणं मुने ।
सुतामयोनिजां सीतां दद्यां दाशरथेरहं ॥ २७ ॥

इति बालकाण्डे जनकवाक्यं नाम षट्षष्टितमः सर्गः
॥ ६६ ॥



Digitized by Google

## CAPUT LXVII.

### ARCUS DIFFRACTUS.

जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ।
धनुर्दर्शय रामाय इति होवाच पार्थिवं ॥ १ ॥
ततः स राजा जनकः सचिवान् व्यादिदेश ह ।
धनुरानीयतां दिव्यं गन्धमाल्यविभूषितं ॥ २ ॥
जनकेन समादिष्टाः सचिवाः प्राविशन् पुरीं ।
तद्धनुः पुरतः कृत्वा निर्जग्मुः पार्थिवाज्ञया ॥ ३ ॥
नृणां शतानि पञ्चाशद्व्यायतानां महौजसां ।
मञ्जूषामष्टचक्रस्थां समूहुस्ते कथंचन ॥ ४ ॥
तामानीय तु मञ्जूषामायसीं यत्र तद्धनुः ।
सुरोपमं ते जनकमूचुर्नृपतिमन्त्रिणः ॥ ५ ॥
इदं धनुर्वरं राजन् पूजितं सर्वराजभिः ।
मिथिलाधिप राजेन्द्र दर्शनीयं यदीच्छसि ॥ ६ ॥
तेषां नृपो वचः श्रुत्वा कृताञ्जलिरभाषत ।
विश्वामित्रं महात्मानं तौ चोभौ रामलक्ष्मणौ ॥ ७ ॥
इदं धनुर्वरं ब्रह्मन् जनकैरभिपूजितं ।
राजभिश्च महावीर्यैरशक्यं पूरितुं तदा ॥ ८ ॥
नैतत् सुरगणाः सर्वे नासुरा न च राक्षसाः ।
गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ॥ ९ ॥

Digitized by Google

ह्वा गतिर्मानुषाणां च धनुषोऽस्य प्रपूरणे ।
आरोपणे समायोगे वेपने तोलनेऽपि वा ॥ १० ॥
तदेतद्धनुषां श्रेष्ठमानीतं मुनिपुंगव ।
दर्शयैतन्महाभाग अनयो राजपुत्रयोः ॥ ११ ॥
विश्वामित्रः स धर्मात्मा श्रुत्वा जनकभाषितं ।
वत्स राम धनुः पश्य इति राघवमब्रवीत् ॥ १२ ॥
महर्षेर्वचनाद्रामो यत्र तिष्ठति तद्धनुः ।
मञ्जूषां तामपावृत्य दृष्ट्वा धनुरथाब्रवीत् ॥ १३ ॥
इदं धनुर्वरं दिव्यं संस्पृशामीह पाणिना ।
यत्नवांश्च भविष्यामि तोलने पूरणेऽपि वा ॥ १४ ॥
बाढमित्यब्रवीद्राजा मुनिश्च समभाषत ।
लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ॥ १५ ॥
पश्यतां नृसहस्राणां बहूनां रघुनन्दनः ।
आरोपयत् स धर्मात्मा सलीलमिव तद्धनुः ॥ १६ ॥
आरोपयित्वा मौर्वीं च पूरयामास वीर्यवान् ।
तद्बभञ्ज धनुर्मध्ये नरश्रेष्ठो महायशाः ॥ १७ ॥
तस्य शब्दो महान् आसीन्निर्घातसमनिस्वनः ।
भूमिकम्पश्च सुमहान् पर्वतस्येव दीर्यतः ॥ १८ ॥
निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ।
वर्जयित्वा मुनिवरं राजानं तौ च राघवौ ॥ १९ ॥

Digitized by Google

प्रत्याश्वस्ते जने तस्मिन् राजा विगतसाध्वसः ।
उवाच प्राञ्जलिर्वाक्यं वाक्यज्ञो मुनिपुंगवं ॥ २० ॥
भगवन् दृष्टवीर्यो मे रामो दशरथात्मजः ।
अत्यद्भुतमचिन्त्यं च अतर्कितमिदं मया ॥ २१ ॥
जनकानां कुले कीर्तिमाहरिष्यति मे सुता ।
सीता भर्तारमासाद्य रामं दशरथात्मजं ॥ २२ ॥
मम सत्या प्रतिज्ञा च वीर्यशुल्केति कौशिक ।
सीता प्राणैर्बहुमता देया रामाय मे सुता ॥ २३ ॥
भवतोऽनुमते ब्रह्मन् शीघ्रं गच्छन्तु मन्त्रिणः ।
मम कौशिक भद्रं ते अयोध्यां त्वरिता रथैः ॥ २४ ॥
राजानं प्रसृतैर्वाक्यैरानयन्तु पुरं मम ।
प्रदानं वीर्यशुल्कायाः कथयन्तु च सर्वशः ॥ २५ ॥
मुनिगुप्तौ च काकुत्स्थौ वेदयन्तु नृपाय वै ।
प्रीतियुक्तं तु राजानमानयन्तु सुशीघ्रगाः ॥ २६ ॥
कौशिकस्तु तथेत्याह राजा चाभाष्य मन्त्रिणः ।
अयोध्यां प्रेषयामास धर्मात्मा कृतशासनान् ॥ २७ ॥

इति बालकाण्डे धनुर्भङ्गो नाम सप्तषष्टितमः सर्गः
॥ ६७ ॥

1818
7
184/5

Digitized by Google

## CAPUT LXVIII.

### Legatorum Janaci oratio.

जनकेन समादिष्टा दूतास्ते क्लान्तवाहनाः ।
मार्गे त्रिरात्रमुषिता अयोध्यां प्राविशन् पुरीं ॥ १ ॥
ते राजवचनाद्दूता राजवेश्म प्रवेशिताः ।
ददृशुर्देवसंकाशं वृद्धं दशरथं नृपं ॥ २ ॥
बद्धाञ्जलिपुटाः सर्वे दूता विगतसाध्वसाः ।
राजानं प्रसृतं वाक्यमब्रुवन् मधुराक्षरं ॥ ३ ॥
वैदेहो जनको राजा पृच्छति त्वां नराधिप ।
कुशलानामयं स्निग्धं सामात्यं सपुरोहितं ॥ ४ ॥
पृष्ट्वा कुशलमव्यग्रं वैदेहो मिथिलाधिपः ।
कौशिकानुमते वाक्यं भवन्तमिदमब्रवीत् ॥ ५ ॥
पूर्वं प्रतिज्ञा विदिता वीर्यशुल्का ममात्मजा ।
राजानश्च कृतामर्षा निर्वीर्या विमुखीकृताः ॥ ६ ॥
सेयं मम सुता राजन् विश्वामित्रपुरःसरैः ।
यदृच्छयागतैर्वीरैर्निर्जिता तव पुत्रकैः ॥ ७ ॥

Digitized by Google

तच्च रत्नं धनुर्दिव्यं मध्ये भग्नं महात्मना ।
रामेण हि महावाहो महत्यां जनसंसदि ॥ ८ ॥
अस्मै देया मया सीता वीर्यशुल्का महात्मने ।
प्रतिज्ञां तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥ ९ ॥
सोपाध्यायो महाराज पुरोहितपुरस्कृतः ।
शीघ्रमागच्छ भद्रं ते द्रष्टुमर्हसि राघवं ॥ १० ॥
प्रतिज्ञां मम राजेन्द्र निर्वर्तयितुमर्हसि ।
पुत्रयोरुभयोरेव प्रीतिं त्वमुपलप्स्यसे ॥ ११ ॥
एवं विदेहाधिपतिर्मधुरं वाक्यमब्रवीत् ।
विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः ॥ १२ ॥
दूतवाक्यं तु तच्छ्रुत्वा राजा परमहर्षितः ।
वशिष्ठं वामदेवं च मन्त्रिणश्चैवमब्रवीत् ॥ १३ ॥
गुप्तः कौशिकपुत्रेण कौशल्यानन्दवर्धनः ।
लक्ष्मणेन सह भ्रात्रा विदेहेषु वसत्यसौ ॥ १४ ॥
दृष्टवीर्यस्तु काकुत्स्थो जनकेन महात्मना ।
संप्रदानं सुतायाः स राघवे कर्तुमिच्छति ॥ १५ ॥
यदि वो रोचते वृत्तं जनकस्य महात्मनः ।
पुरीं गच्छामहे शीघ्रं मा भूत् कालस्य पर्ययः ॥ १६ ॥
मन्त्रिणो वाढमित्याहुः सह सर्वैर्महर्षिभिः ।
सुप्रीतश्चाब्रवीद्राजा श्वो यात्रेति स मन्त्रिणः ॥ १७ ॥

Digitized by Google

मन्त्रिणस्तु नरेन्द्रस्य रात्रिं परमसत्कृताः ।
ऊषुः प्रमुदिताः सर्वे गुणैः सर्वैः समन्विताः ॥ १८ ॥

इति बालकाण्डे जनकदूतवाक्यं नाम अष्टषष्टितमः सर्गः
॥ ६८ ॥

1845
18
1863

## CAPUT LXIX.

### COLLOQUIUM JANACI CUM DASARATHA.

ततो रात्र्यां व्यतीतायां सोपाध्यायः सबान्धवः ।
राजा दशरथो हृष्टः सुमन्त्रमिदमब्रवीत् ॥ १ ॥
अद्य सर्वे धनाध्यक्षा धनमादाय पुष्कलं ।
व्रजन्त्वग्रे सुविहिता नानारत्नसमन्विताः ॥ २ ॥
चतुरङ्गबलं चापि शीघ्रं निर्यातु सर्वशः ।
ममाज्ञासमकालं च यानयुग्यमनुत्तमं ॥ ३ ॥
वशिष्ठो वामदेवश्च जावालिरथ काश्यपः ।
मार्कण्डेयश्च दीर्घायुर्ऋषिः कात्यायनस्तदा ॥ ४ ॥
एते द्विजाः प्रयान्त्वग्रे स्यन्दनं योजयस्व मे ।
यथा कालात्ययो न स्याद्दूता हि त्वरयन्ति मां ॥ ५ ॥

Digitized by Google

वचनाच्च नरेन्द्रस्य सेना सा चतुरङ्गिणी ।
राजानमृषिभिः सार्धं व्रजन्तं पृष्ठतोऽन्वगात् ॥ ६ ॥
गत्वा चतुरहं मार्गे विदेहान् अभ्युपेयिवान् ।
राजा च जनकः श्रीमान् श्रुत्वा पूजामकल्पयत् ॥ ७ ॥
ततो राजा समासाद्य वृद्धं दशरथं नृपं ।
उवाच वचनं श्रेष्ठो नरश्रेष्ठं मुदान्वितं ॥ ८ ॥
स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव ।
पुत्रयोरुभयोः प्रीतिमाप्स्यसे वीर्यनिर्जितां ॥ ९ ॥
दिष्ट्या प्राप्तो महातेजा वशिष्ठो भगवान् ऋषिः ।
सह सर्वैर्द्विजश्रेष्ठैर्देवैरिव शतक्रतुः ॥ १० ॥
दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलं ।
राघवैः सह संबन्धाद्वीर्यश्रेष्ठैर्महाबलैः ॥ ११ ॥
श्वः प्रभाते नरेन्द्र त्वं निर्वर्तयितुमर्हसि ।
यज्ञस्यान्ते नरश्रेष्ठ विवाहमृषिसंमतं ॥ १२ ॥
तस्य तद्वचनं श्रुत्वा ऋषिमध्ये नराधिपः ।
वाक्यं वाक्यविदां श्रेष्ठः प्रत्युवाच महीपतिं ॥ १३ ॥
प्रतिग्रहो दातृवशः श्रुतमेतन्मया पुरा ।
यथा वक्ष्यसि धर्मज्ञ तत् करिष्यामहे वयं ॥ १४ ॥
तद्धर्मिष्ठं यशस्यं च वचनं सत्यवादिनः ।
श्रुत्वा विदेहाधिपतिः परं विस्मयमागतः ॥ १५ ॥

Digitized by Google

ततः सर्वे मुनिगणाः परस्परसमागमे ।
हर्षेण महता युक्तास्तां रात्रिमवसन् सुखं ॥ १६ ॥
अथ रामो महातेजा लक्ष्मणेन समं ययौ ।
कौशिकं च पुरस्कृत्य पितुः पादावुपास्पृशत् ॥ १७ ॥
राजा च राघवौ पुत्रौ निशाम्य परिहर्षितः ।
उवास परमप्रीतो जनकेनाभिपूजितः ॥ १८ ॥
जनकोऽपि महातेजाः क्रिया धर्मेण तत्त्ववित् ।
यज्ञस्य च सुताभ्यां च कृत्वा रात्रिमुवास ह ॥ १९ ॥

इति बालकाण्डे जनकदशरथसंवादो नाम एकोनसप्तति
तमः सर्गः ॥ ६९ ॥

## CAPUT LXX.

### PUELLARUM PETITIO.

ततः प्रभाते जनकः कृतकर्मा महर्षिभिः ।
उवाच वाक्यं वाक्यज्ञः शतानन्दं पुरोहितं ॥ १ ॥
भ्राता मम महातेजा यवीयान् अतिधार्मिकः ।
कुशध्वज इति ख्यातः पुरीमध्यावसच्छुभां ॥ २ ॥
वार्याफलकपर्यन्तां पिवन्निक्षुमतीं नदीं ।
सांकाश्यां पुण्यसंकाशां विमानमिव पुष्पकं ॥ ३ ॥
तमहं द्रष्टुमिच्छामि यज्ञगोप्ता स मे मतः ।
प्रीतिं सोऽपि महातेजा इमां भोक्ता मया सह ॥ ४ ॥
एवमुक्ते तु वचने शतानन्दस्य संनिधौ ।
आगताः केचिदव्यग्रा जनकस्तान् समादिशत् ॥ ५ ॥
शासनात् तु नरेन्द्रस्य प्रययुः शीघ्रवाजिनः ।
समानेतुं नरव्याघ्रं विष्णुमिन्द्राज्ञया यथा ॥ ६ ॥
सांकाश्यां ते समागम्य ददृशुश्च कुशध्वजं ।
न्यवेदयन् यथावृत्तं जनकस्य च चिन्तितं ॥ ७ ॥
तद्वृत्तं नृपतिः श्रुत्वा दूतश्रेष्ठैर्महाजवैः ।
आज्ञया हि नरेन्द्रस्य आजगाम कुशध्वजः ॥ ८ ॥

Digitized by Google

सोऽभिवाद्य शतानन्दं जनकं चप्रतिधार्मिकं ।
राजार्हं परमं दिव्यमासनमध्यरोहत ॥ ९ ॥
उपविष्टावुभौ तौ तु भ्रातरावमिततेजसौ ।
प्रेषयामासतुर्वीरौ मन्त्रिश्रेष्ठं सुदामनं ॥ १० ॥
गच्छ मन्त्रिपते शीघ्रमिक्ष्वाकुममितप्रभं ।
आत्मजैः सह दुर्धर्षमानयस्व समन्त्रिणं ॥ ११ ॥
औपकार्यं स गत्वा तु रघूणां कुलवर्धनं ।
ददर्श शिरसा चैनमभिवाद्येदमब्रवीत् ॥ १२ ॥
अयोध्याधिपते वीर वैदेहो मिथिलाधिपः ।
स त्वां द्रष्टुं व्यवसितः सोपाध्यायपुरोहितं ॥ १३ ॥
मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणास्तदा ।
सबन्धुरागमत् तत्र जनको यत्र वर्तते ॥ १४ ॥
राजा च मन्त्रिसहितः सोपाध्यायः सबान्धवः ।
वाक्यं वाक्यविदां श्रेष्ठो वैदेहमिदमब्रवीत् ॥ १५ ॥
विदितं ते महाराज इक्ष्वाकुकुलदैवतं ।
वक्ता सर्वेषु कृत्येषु वशिष्ठो भगवान् ऋषिः ॥ १६ ॥
विश्वामित्राभ्यनुज्ञातः सह सर्वैर्महर्षिभिः ।
एष वक्ष्यति धर्मात्मा यथाधर्मं यथाक्रमं ॥ १७ ॥
तूष्णीं भूते दशरथे वशिष्ठो भगवान् ऋषिः ।
उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोधसं ॥ १८ ॥

Digitized by Google

अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ।
तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥ १९ ॥
विवस्वान् कश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः ।
मनुः प्रजापतिः पूर्वमिक्ष्वाकुश्च मनोः सुतः ॥ २० ॥
तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकं ।
इक्ष्वाकोस्तु सुतः श्रीमान् कुक्षिरित्येव विश्रुतः ॥ २१ ॥
कुक्षेरथात्मजः श्रीमान् विकुक्षिरुदपद्यत ।
विकुक्षेस्तु महातेजा बाणः पुत्रो व्यजायत ॥ २२ ॥
बाणस्य तु महातेजा अनरण्यः प्रतापवान् ।
अनरण्यात् पृथुर्जज्ञे त्रिशंकुस्तु पृथोरपि ॥ २३ ॥
त्रिशङ्कोरभवत् पुत्रो धुन्धुमारो महायशाः ।
धुन्धुमारान्महातेजा युवनाश्वो महारथः ॥ २४ ॥
युवनाश्वसुतश्चैव मान्धाता पृथिवीपतिः ।
मान्धातुस्तु सुतः श्रीमान् सुसंधिरुदपद्यत ॥ २५ ॥
सुसंधेरपि पुत्रौ द्वौ ध्रुवसंधिः प्रसेनजित् ।
यशस्वी ध्रुवसंधेस्तु भरतो नाम नामतः ॥ २६ ॥
भरतात् तु महातेजा असितो समजायत ।
* यस्यैते प्रतिराजान उदपद्यन्त शत्रवः ॥ २७ ॥
* हैहयास्तालजङ्घाश्च शूराश्च शशिविन्दवः ।
* तांश्च स प्रतियुध्यन् वै युद्धे राजा प्रवासितः ॥ २८ ॥

Digitized by Google

* हिमवन्तमुपागम्य भार्याभ्यां सहितस्तदा ।
* असितो ऽल्पबलो राजा कालधर्ममुपेयिवान् ॥ २९ ॥
* द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतं ।
* एका गर्भविनाशार्थं सपत्न्यै सा गरं ददौ ॥ ३० ॥
* ततः शैलवरे रम्ये बभूवाभिरतो मुनिः ।
* भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः ॥ ३१ ॥
* तत्र चैका महाभागा भार्गवं देववर्चसं ।
* ववन्दे पद्मपत्राक्षी काङ्क्षन्ती सुतमुत्तमं ॥ ३२ ॥
* तमृषिं साभ्युपागम्य कालिन्दी चाभ्यवादयत् ।
* स तामभ्यवदद्विप्रः पुत्रेप्सुं पुत्रजन्मनि ॥ ३३ ॥
* तव कुक्षौ महाभागे अचिरात् संजनिष्यति ।
* गरेण सहितः श्रीमान्मा शुचः कमलेक्षणे ॥ ३४ ॥
* च्यवनं तु नमस्कृत्य राजपुत्री पतिव्रता ।
* पतिना रहिता तस्मात् पुत्रं देवी व्यजायत ॥ ३५ ॥
* सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया ।
* सह तेन गरेणैव जातः स सगरो ऽभवत् ॥ ३६ ॥
सगरस्यासमञ्जस्तु असमञ्जादथांशुमान् ।
दिलीपो ऽंशुमतः पुत्रो दिलीपस्य भगीरथः ॥ ३७ ॥
भगीरथात् ककुत्स्थश्च ककुत्स्थाच्च रघुस्तदा ।
रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ॥ ३८ ॥

Digitized by Google

कल्माषपादो ऽप्यभवत् तस्माज्जातस्तु शङ्खणः ।
सुदर्शनः शङ्खणस्य अग्निवर्णः सुदर्शनात् ॥ ३९ ॥
शीघ्रगस्त्वग्निवर्णस्य शीघ्रगस्य मरुः सुतः ।
मरोः प्रशुश्रुकस्त्वासीदम्बरीषः प्रशुश्रुकात् ॥ ४० ॥
अम्बरीषस्य पुत्रो ऽभून्नहुषः पृथिवीपतिः ।
नहुषस्य ययातिस्तु नाभागस्तु ययातिजः ॥ ४१ ॥
नाभागस्य बभूवाज अजाद्दशरथो ऽभवत् ।
अस्माद्दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ ॥ ४२ ॥
आदिवंशविशुद्धानां राज्ञां परमधर्मिणां ।
इक्ष्वाकुकुलजातानां वीराणां सत्यवादिनां ॥ ४३ ॥
रामलक्ष्मणयोरर्थे त्वत्सुते वरये नृप ।
सदृशाभ्यां नरश्रेष्ठ सदृशे दातुमर्हसि ॥ ४४ ॥

इति बालकाण्डे कन्यावरणं नाम सप्ततितमः सर्गः
॥ ७० ॥

## CAPUT LXXI.

### Janaci prosapiae declaratio.

एवं ब्रुवाणं जनकः प्रत्युवाच कृताञ्जलिः ।
श्रोतुमर्हसि भद्रं ते कुलं नः परिकीर्त्तितं ॥ १ ॥
प्रदाने हि मुनिश्रेष्ठ कुलं निरवशेषतः ।
वक्तव्यं कुलजातेन तन्निबोध महामुने ॥ २ ॥
राजाभूत् त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा ।
निमिः परमधर्मात्मा सर्वसत्यवतां वरः ॥ ३ ॥
तस्य पुत्रो मिथिर्नाम जनको मिथिपुत्रकः ।
प्रथमो जनको राजा जनकादप्युदावसुः ॥ ४ ॥
उदावसोस्तु धर्मात्मा जातो वै नन्दिवर्धनः ।
नन्दिवर्धसुतः शूरः सुकेतुर्नाम नामतः ॥ ५ ॥
सुकेतोरपि धर्मात्मा देवरातो महाबलः ।
देवरातस्य राजर्षेर्वृहद्रथ इति स्मृतः ॥ ६ ॥
वृहद्रथस्य शूरोऽभून्महावीरः प्रतापवान् ।
महावीरस्य धृतिमान् सुधृतिः सत्यविक्रमः ॥ ७ ॥
सुधृतेरपि धर्मात्मा धृष्टकेतुरभूत् सुतः ।
धृष्टकेतोश्च राजर्षेर्हर्यश्व इति विश्रुतः ॥ ८ ॥

Digitized by Google

हर्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रतीन्धकः ।
प्रतीन्धकस्य धर्मात्मा राजा कीर्तिरथः सुतः ॥ ९ ॥
पुत्रः कीर्तिरथस्यापि देवमीढ इति स्मृतः ।
देवमीढस्य विबुधो विबुधस्य महान्ध्रकः ॥ १० ॥
महान्ध्रकसुतो राजा कीर्तिरातो महाबलः ।
कीर्तिरातस्य राजर्षेर्महारोमा व्यजायत ॥ ११ ॥
महारोम्णास्तु धर्मात्मा स्वर्णरोमेति विश्रुतः ।
स्वर्णरोम्णास्तु राजर्षेर्ह्रस्वरोमा व्यजायत ॥ १२ ॥
तस्य पुत्रद्वयं जज्ञे धर्मज्ञस्य महात्मनः ।
ज्येष्ठोऽहमनुजो भ्राता मम वीरः कुशध्वजः ॥ १३ ॥
मां तु ज्येष्ठं पिता राज्ये सोऽभिषिच्य नराधिपः ।
कुशध्वजं समावेश्य भारं मयि वनं गतः ॥ १४ ॥
वृद्धे पितरि स्वर्याते धर्मेण धुरमावहं ।
भ्रातरं देवसंकाशं स्नेहात् पश्यन् कुशध्वजं ॥ १५ ॥
कस्यचित् त्वथ कालस्य सांकाश्यादागतः पुरात् ।
सुधन्वा वीर्यवान् राजा मिथिलामवरोधकः ॥ १६ ॥
स च मे प्रेषयामास शैवं धनुरनुत्तमं ।
सीता च कन्या पद्माक्षी मह्यं वै दीयतामिति ॥ १७ ॥
तस्याऽप्रदानाद्ब्रह्मर्षे युद्धमासीन्मया सह ।
स हतोऽभिमुखो राजा सुधन्वा तु मया रणे ॥ १८ ॥

Digitized by Google

निहत्य तं मुनिश्रेष्ठ सुधन्वानं नराधिपं ।
सांकाश्ये भ्रातरं शूरमभ्यसिञ्चं कुशध्वजं ॥ १९ ॥
कनीयान् एष मे भ्राता अहं ज्येष्ठो महामुने ।
ददामि परमप्रीतो बध्वौ ते मुनिपुंगव ॥ २० ॥
सीतां रामाय भद्रं ते ऊर्मिलां लक्ष्मणाय वै ।
वीर्यशुल्कां मम सुतां सीतां सुरसुतोपमां ॥ २१ ॥
द्वितीयामूर्मिलां चैव त्रिर्वदामि न संशयः ।
ददामि परमप्रीतो बध्वौ ते मुनिपुंगव ॥ २२ ॥
रामलक्ष्मणयो राजन् गोदानं कारयस्व ह ।
पितृकार्यं च भद्रं ते ततो वैवाहिकं कुरु ॥ २३ ॥
मघा ह्यद्य महाबाहो तृतीये दिवसे प्रभो ।
फाल्गुण्यामुत्तरे राजन् तस्मिन् वैवाहिकं कुरु ॥ २४ ॥

इति बालकाण्डे जनककुलप्रख्यानं नाम एकसप्ततितमः सर्गः ॥ ७१ ॥



Digitized by Google

## CAPUT LXXII.

### VACCARUM DONATIO.

उक्तवाक्ये तु जनके विश्वामित्रो महामुनिः ।
उवाच वचनं धीमान् वशिष्ठसहितस्तदा ॥ १ ॥
अचिन्त्यान्यप्रमेयानि कुलानि रघुनन्दन ।
इक्ष्वाकूणां विदेहानां नैषां तुल्योऽस्ति कश्चन ॥ २ ॥
सदृशो धर्मसंबन्धः सदृशो रूपसंपदा ।
सितीया ऊर्मिलायाश्च रामलक्ष्मणयोस्तथा ॥ ३ ॥
वक्तव्यं च नरश्रेष्ठ श्रूयतां वचनं मम ।
भ्राता यवीयान् धर्मज्ञ एष राजा कुशध्वजः ॥ ४ ॥
अस्य धर्मात्मनो राजन् रूपेणाप्रतिमं भुवि ।
सुताद्वयं नरश्रेष्ठ पत्न्यर्थं वरयामहे ॥ ५ ॥
भरतस्य कुमारस्य शत्रुघ्नस्य च धीमतः ।
वरये ते सुते राजंस्तयोरर्थे महात्मनोः ॥ ६ ॥
पुत्रा दशरथस्येमे रूपयौवनशालिनः ।
लोकपालसमाः सर्वे देवतुल्यपराक्रमाः ॥ ७ ॥
उभयोरपि राजेन्द्र संबन्धेनानुबध्यतां ।
इक्ष्वाकुकुलमव्यग्रं भवतः पुण्यकर्मणाः ॥ ८ ॥

Digitized by Google

विश्वामित्रवचः श्रुत्वा वशिष्ठस्य मते तदा ।
जनकः प्राञ्जलिर्वाक्यमुवाच मुनिपुंगवौ ॥ ९ ॥
कुलं धन्यमिदं मन्ये येषां नो मुनिपुंगवौ ।
सदृशं कुलसंबन्धं यदाज्ञापयथः स्वयं ॥ १० ॥
एवं भवतु भद्रं वः कुशध्वजसुते इमे ।
पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ ॥ ११ ॥
एकाह्ना राजपुत्रीणां चतसृणां महामुने ।
पाणिं गृह्णन्तु चत्वारो राजपुत्रा महाबलाः ॥ १२ ॥
उत्तरे दिवसे ब्रह्मन् फाल्गुणीभ्यां मनीषिणः ।
वैवाहिकं प्रशंसन्ति भगो यत्र प्रजापतिः ॥ १३ ॥
एवमुक्त्वा वचः सौम्यं प्रत्युत्थाय कृताञ्जलिः ।
उभौ मुनिवरौ राजा जनको वाक्यमब्रवीत् ॥ १४ ॥
परो धर्मः कृतो मह्यं शिष्योऽस्मि भवतोः सदा ।
इमान्यासनमुख्यानि आस्येतां मुनिपुंगवौ ॥ १५ ॥
यथा दशरथस्येयं तथायोध्या पुरी मम ।
प्रभुत्वे नास्ति संदेहो यथार्हं कर्तुमर्हथ ॥ १६ ॥
तथा ब्रुवति वैदेहे जनके रघुनन्दनः ।
राजा दशरथो हृष्टः प्रत्युवाच महीपतिं ॥ १७ ॥
युवामसंख्येयगुणौ भ्रातरौ मिथिलेश्वरौ ।
ऋषयो राजसंघाश्च भवद्भ्यामभिपूजिताः ॥ १८ ॥

Digitized by Google

स्वस्ति प्राप्नुहि भद्रं ते गमिष्यामि स्वमालयं ।
श्राद्धकर्माणि विधिवद्विधास्य इति चाब्रवीत् ॥ १९ ॥
तमापृष्ट्वा नरपतिं राजा दशरथस्तदा ।
मुनीन्द्रौ तौ पुरस्कृत्य जगामाशु महायशाः ॥ २० ॥
स गत्वा निलयं राजा श्राद्धं कृत्वा विधानतः ।
प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमं ॥ २१ ॥
गवां शतसहस्रं हि ब्राह्मणेभ्यो नराधिपः ।
एकैकशो ददौ राजा पुत्रान् उद्दिश्य धर्मतः ॥ २२ ॥
सुवर्णशृङ्गसंपन्नाःसवत्साः कांस्यदोहनाः ।
गवां शतसहस्राणि चत्वारि पुरुषर्षभः ॥ २३ ॥
स सुतैः कृतगोदानैर्वृतस्तु नृपतिस्तदा ।
लोकपालैरिवाभाति वृतः सौम्यः प्रजापतिः ॥ २४ ॥

इति बालकाण्डे गोदानं नाम द्विसप्ततितमः सर्गः
॥ ७२ ॥

## CAPUT LXXIII.

### DASARATHAE FILIORUM NUPTIAE.

यस्मिंस्तु दिवसे राजा चक्रे गोदानमुत्तमं ।
तस्मिंस्तु दिवसे वीरो युधाजित् समुपेयिवान् ॥ १ ॥
पुत्रः केकयराजस्य साक्षाद्भरतमातुलः ।
दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत् ॥ २ ॥
केकयाधिपती राजन् स्नेहात् कुशलमब्रवीत् ।
येषां कुशलकामोऽसि तेषां संप्रत्यनामयं ॥ ३ ॥
स्वस्रीयं मम राजेन्द्र द्रष्टुकामो महीपतिः ।
तदर्थमुपयातोऽहमयोध्यां रघुनन्दन ॥ ४ ॥
श्रुत्वा त्वहमयोध्यायामिहस्थं त्वां सबान्धवं ।
त्वरयाभ्युपयातोऽहं द्रष्टुकामः स्वसुः सुतं ॥ ५ ॥
अथ राजा दशरथः प्रियातिथिमुपस्थितं ।
दृष्ट्वा परमसत्कारैः पूजनार्हमपूजयत् ॥ ६ ॥
ततस्तामुषितो रात्रिं सह पुत्रैर्महीपतिः ।
पुरस्कृत्य वशिष्ठादीन् मुनीन् यज्ञमुपाययौ ॥ ७ ॥
युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः ।
भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ॥ ८ ॥
पितुः समीपमाश्रित्य तस्थौ भ्रातृभिरावृतः ।
वशिष्ठो भगवान् एत्य वैदेहमिदमब्रवीत् ॥ ९ ॥

Digitized by Google

राजा दशरथो राजन् कृतकौतुकमङ्गलैः ।
पुत्रैर्नरवरश्रेष्ठ दातारमभिकाङ्क्षते ॥ १० ॥
दातृप्रतिग्रहीतृभ्यां सर्वार्थाः प्रभवन्ति हि ।
स्वधर्मं प्रतिपद्यस्व कृत्वा वैवाह्यमुत्तमं ॥ ११ ॥
इत्युक्तः परमोदारो वशिष्ठेन महात्मना ।
प्रत्युवाच महातेजा वाक्यं परमधर्मवित् ॥ १२ ॥
कः स्थितः प्रतिहारो मे कस्याज्ञां संप्रतीक्षते ।
स्वगृहे को विचारो ऽस्ति यथा राज्यमिदं तव ॥ १३ ॥
यज्ञभूमिमिमां प्राप्ताः कृतकौतुकमङ्गलाः ।
मम कन्याश्चतस्रो हि दीप्ता वह्नेरिवार्चिषः ॥ १४ ॥
सद्यो ऽहं त्वत्प्रतीक्षो ऽस्मि वेद्यामस्यां प्रतिष्ठितः ।
अविघ्नं क्रियतां सर्वं किमर्थं हि विलम्ब्यते ॥ १५ ॥
तद्वाक्यं जनकेनोक्तं श्रुत्वा दशरथस्तदा ।
प्रवेशयामास सुतान् सर्वान् ऋषिगणान् अपि ॥ १६ ॥
ततो राजा विदेहानां वशिष्ठमिदमब्रवीत् ।
कारयस्व ऋषे सर्वां क्रियां वैवाहिकीं प्रभो ॥ १७ ॥
तथेत्युक्त्वा तु जनकं वशिष्ठो भगवान् ऋषिः ।
विश्वामित्रं पुरस्कृत्य शतानन्दं च धार्मिकं ॥ १८ ॥
प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ।
अलंचकार तां वेदिं गन्धपुष्पैः समन्ततः ॥ १९ ॥

Digitized by Google

सुवर्णपालिकाभिश्च छिद्रकुम्भैश्च सांकुरैः ।
अंकुराढ्यैः शरावैश्च धूपपात्रैः सधूपकैः ॥ २० ॥
शङ्खपात्रैः स्रुवैः स्रुग्भिः पात्रैरर्घ्यादिपूजितैः ।
लाजपूर्णैस्तथा पात्रैरक्षतैरपि संस्कृतैः ॥ २१ ॥
दर्भैः समैः समास्तीर्य विधिवन्मन्त्रपूर्वकं ।
जुहावाग्नौ महातेजा वशिष्ठो मुनिसत्तमः ॥ २२ ॥
ततः सीतां समानीय सर्वाभरणभूषितां ।
समक्षमग्नेः संस्थाप्य राघवाभिमुखे तदा ॥ २३ ॥
अब्रवीज्जनको राजा कौशल्यानन्दवर्धनं ।
इयं सीता मम सुता सहधर्मचरी तव ॥ २४ ॥
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।
पतिव्रता महाभागा छायेवानुगता सदा ॥ २५ ॥
इत्युक्त्वा प्राक्षिपद्राजा मन्त्रपूतं जलं तदा ।
साधु साध्विति देवानामृषीणां वदतां तदा ॥ २६ ॥
एवं दत्त्वा सुतां सीतां मन्त्रोदकपुरस्कृतां ।
अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः ॥ २७ ॥
लक्ष्मणागच्छ भद्रं ते ऊर्मिलामुद्यतां मया ।
प्रतीच्छ पाणिं गृह्णीष्व मा भूत् कालस्य पर्ययः ॥ २८ ॥
तमेवमुक्त्वा जनको भरतं चाभ्यभाषत ।
गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन ॥ २९ ॥

Digitized by Google

शत्रुघ्नं चापि धर्मात्मा अब्रवीन्मिथिलेश्वरः ।
श्रुतकीर्तेर्महाबाहो पाणिं गृह्णीष्व पाणिना ॥ ३० ॥
सर्वे भवन्तः सौम्याश्च सर्वे सुचरितव्रताः ।
पत्नीभिः सन्तु काकुत्स्था मा भूत् कालस्य पर्ययः ॥ ३१ ॥
जनकस्य वचः श्रुत्वा पाणीन् पाणिभिरस्पृशन् ।
चत्वारस्ते चतसृणां वशिष्ठस्य मते स्थिताः ॥ ३२ ॥
अग्निं प्रदक्षिणं चक्रुर्वेदिं राजानमेव च ।
ऋषींश्चापि महात्मानः सहभार्या रघूद्वहाः ॥ ३३ ॥
पुष्पवृष्टिर्महत्यासीदन्तरीक्षात् सुभास्वरा ।
दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिस्वनैः ॥ ३४ ॥
ननृतुश्चाप्सरःसंघा गन्धर्वाश्च जगुः कलं ।
विवाहे रघुमुख्यानां तदद्भुतमदृश्यत ॥ ३५ ॥
ईदृशे वर्तमाने तु तूर्यैरुद्घुष्टनिनादिते ।
त्रिरग्निं ते परिक्रम्य ऊहुर्भार्या महौजसः ॥ ३६ ॥
अथोपकार्यां जग्मुस्ते सभार्या रघुनन्दनाः ।
राजाप्यनुययौ पश्यन् सर्षिसंघः सबान्धवः ॥ ३७ ॥

इति बालकाण्डे दशरथपुत्रविवाहो नाम त्रिसप्ततितमः सर्गः ॥ ७३ ॥

---

Digitized by Google

## CAPUT LXXIV.

### Congressus cum Jamadagneio.

अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ।
आपृच्छ्य तौ नरव्याघ्रौ जगामोत्तरपर्वतं ॥ १ ॥
विश्वामित्रे गते तस्मिन् वैदेहं मिथिलाधिपं ।
आपृच्छ्य प्रययौ चापि राजा दशरथः पुरीं ॥ २ ॥
अथ राजा विदेहानां ददौ कन्याधनं बहु ।
कम्बलादीनि वस्त्राणि क्षौमपट्टाम्बराणि च ॥ ३ ॥
हस्त्यश्वरथपादातं दिव्यरूपं स्वलंकृतं ।
ददौ कन्यापिता तासां दासीदासमनुत्तमं ॥ ४ ॥
हिरण्यस्य सुवर्णस्य मुक्तानां विद्रुमस्य च ।
ददौ राजा सुसंहृष्टः कन्याधनमभीप्सितं ॥ ५ ॥
दत्वा बहुविधं राजा समनुज्ञाप्य पार्थिवं ।
प्रविवेश स्वनिलयं मिथिलां मिथिलेश्वरः ॥ ६ ॥
राजाप्ययोध्याधिपतिः सह पुत्रैर्महात्मभिः ।
ऋषीन् सर्वान् पुरस्कृत्य जगाम सबलानुगः ॥ ७ ॥
गच्छन्तं तं नरव्याघ्रं सर्षिसंघं सराघवं ।
घोराः स्म पक्षिणो वाचो व्याहरन्ति समन्ततः ॥ ८ ॥

Digitized by Google

भौमाश्चैव मृगाः सर्वे गच्छन्ति स्म प्रदक्षिणं ।
तान् दृष्ट्वा राजशार्दूलो वशिष्ठं पर्यपृच्छत ॥ ९ ॥
असौम्याः पक्षिणो घोरा मृगाश्चापि प्रदक्षिणाः ।
किमिदं हृदयोत्कम्पि मनो मम विषीदति ॥ १० ॥
राज्ञो दशरथस्यैतच्छ्रुत्वा वाक्यं महान् ऋषिः ।
उवाच मधुरां वाणीं श्रूयतामस्य यत् फलं ॥ ११ ॥
उपस्थितं भयं घोरं दिव्यपक्षिमुखाच्च्युतं ।
मृगाः प्रशमयन्त्येते संतापस्त्यज्यतामयं ॥ १२ ॥
तेषां संवदतां तत्र वायुःप्रादुर्बभूव ह ।
कम्पयन् मेदिनीं सर्वां पातयंश्च महाद्रुमान् ॥ १३ ॥
तमसा संवृतः सूर्यः सर्वे नाविदिषुर्दिशः ।
भस्मना चावृतं सर्वं संमूढमिव तद्बलं ॥ १४ ॥
वशिष्ठ ऋषयश्चान्ये राजा च ससुतस्तदा ।
ससंज्ञा इव तत्रासन् सर्वमन्यद्विचेतनं ॥ १५ ॥
तस्मिंस्तमसि घोरे तु भस्मछन्नेव सा चमूः ।
ददर्श भीमसंकाशं जटामण्डलधारिणं ॥ १६ ॥
भार्गवं जामदग्नेयं राजराजविमर्दनं ।
कैलासमिव दुर्धर्षं कालाग्निमिव दुःसहं ॥ १७ ॥
स्कन्धे चासज्य परशुं धनुर्विद्युद्गणोपमं ।
प्रगृह्य शस्त्रमुग्रं च त्रिपुरघ्नं यथा शिवं ॥ १८ ॥

Digitized by Google

तं दृष्ट्वा भीमसंकाशं ज्वलन्तमिव पावकं ।
वशिष्ठप्रमुखा विप्रा जपहोमपरायणाः ॥ १९ ॥
संगता मुनयः सर्वे संजजल्पुरथो मिथः ।
कच्चित् पितृबधामर्षी क्षत्रं नोत्सादयिष्यति ॥ २० ॥
पूर्वं क्षत्रबधं कृत्वा गतमन्युर्गतज्वरः ।
क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितं ॥ २१ ॥
एवमुक्त्वार्घ्यमादाय भार्गवं भीमदर्शनं ।
ऋषयो राम रामेति मधुरां वाचमब्रुवन् ॥ २२ ॥
प्रतिगृह्य तु तां पूजामप्रत्युक्त्वा च तान् ऋषीन् ।
रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥ २३ ॥

इति बालकाण्डे जामदग्न्यसमागमो नाम चतुःसप्ततितमः सर्गः ॥ ७४ ॥

2011
23
2034

Digitized by Google

## CAPUT LXXV.

### JAMADAGNEII SERMO.

राम दाशरथे वीर वीर्यं ते श्रूयतेऽद्भुतं ।
धनुषो भेदनं चैव निखिलेन मया श्रुतं ॥ १ ॥
तदद्भुतमचिन्त्यं च भेदनं धनुषस्त्वया ।
तच्छ्रुत्वाहमनुप्राप्तो धनुर्गृह्यापरं शुभं ॥ २ ॥
तदिदं घोरसंकाशं जामदग्न्यं महद्धनुः ।
पूरयस्व शरेणैव स्वबलं दर्शयस्व च ॥ ३ ॥
तदहं ते बलं दृष्ट्वा धनुषोऽप्यस्य पूरणे ।
द्वन्द्वयुद्धं प्रदास्यामि वीर श्लाघ्यमिदं तव ॥ ४ ॥
तस्य तद्वचनं श्रुत्वा राजा दशरथस्तदा ।
विषण्णवदनो दीनः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ५ ॥
क्षत्ररोषात् प्रशान्तस्त्वं ब्राह्मणश्च महातपाः ।
बालानां मम पुत्राणामभयं दातुमर्हसि ॥ ६ ॥
भार्गवाणां कुले जातः स्वाध्यायव्रतशालिनां ।
सहस्राक्षे प्रतिज्ञाय शस्त्रं प्रक्षिप्तवान् असि ॥ ७ ॥
स त्वं धर्मपरो भूत्वा कश्यपाय वसुंधरां ।
दत्त्वा वनमुपागम्य महेन्द्रकृतकेतनः ॥ ८ ॥

Digitized by Google

मम सर्वविनाशाय संप्राप्तस्त्वं महामुने ।
न ह्येकस्मिन् हते रामे सर्वे जीवामहे वयं ॥ ९ ॥
ब्रुवत्येवं दशरथे जामदग्न्यः प्रतापवान् ।
अनादृत्य तु तद्वाक्यं राममेवाभ्यभाषत ॥ १० ॥
इमे द्वे धनुषी राम दिव्ये लोकाभिपूजिते ।
दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥ ११ ॥
अनुसृष्टं सुरैरेकं त्र्यम्बकाय युयुत्सवे ।
त्रिपुरघ्नं नरश्रेष्ठ भग्नं काकुत्स्थ यत् त्वया ॥ १२ ॥
इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः ।
तदिदं वैष्णवं राम धनुः परपुरंजयं ॥ १३ ॥
तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहं ।
शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया ॥ १४ ॥
अभिप्रायं तु विज्ञाय देवतानां पितामहः ।
विरोधं जनयामास तयोः सत्यवतां वरः ॥ १५ ॥
विरोधे तु महद्युद्धमभवद्रोमहर्षणं ।
शितिकण्ठस्य विष्णोश्च परस्परजयैषिणोः ॥ १६ ॥
तदा तु जृम्भितं शैवं धनुर्भीमपराक्रमं ।
हुंकारेण महादेवः स्तम्भितोऽथ त्रिलोचनः ॥ १७ ॥
देवैस्तदा समागम्य सर्षिसंघैः सचारणैः ।
याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ ॥ १८ ॥

Digitized by Google

जृम्भितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ।
अधिकं मेनिरे विष्णुं देवाः सर्षिगणास्तथा ॥ १९ ॥
धनू रुद्रस्तु संक्रुद्धो विदेहेषु महायशाः ।
देवरातस्य राजर्षेर्ददौ हस्ते ससायकं ॥ २० ॥
इदं च वैष्णवं राम धनुः परपुरंजयं ।
ऋचीके भार्गवे प्रादाद्विष्णुः स न्यासमुत्तमं ॥ २१ ॥
ऋचीकस्तु महातेजाः पुत्रस्याप्रतिकर्मणः ।
पितुर्मम ददौ दिव्यं जमदग्नेर्महात्मनः ॥ २२ ॥
न्यस्तशस्त्रे पितरि मे तपोबलसमन्विते ।
अर्जुनो विदधे मृत्युं प्राकृतीं बुद्धिमास्थितः ॥ २३ ॥
बधमप्रतिरूपं तु पितुः श्रुत्वा सुदारुणं ।
क्षत्रमुत्सादयं रोषाज्जातं जातमनेकशः ॥ २४ ॥
पृथिवीं चाखिलां प्राप्य कश्यपाय महात्मने ।
यज्ञस्यान्ते तदा राम दक्षिणां पुण्यकर्मणे ॥ २५ ॥
दत्वा महेन्द्रनिलयस्तपोबलसमन्वितः ।
स्थितोऽस्मि तस्मिंस्तप्यन् वै सुसुखं सुरसेविते ॥ २६ ॥
श्रुत्वा तु धनुषो भेदं विस्मितानां नभस्तले ।
भाषतां देवसंघानां ततोऽहं द्रुतमागतः ॥ २७ ॥
तदिदं वैष्णवं राम पितृपैतामहं महत् ।
क्षत्रधर्मं पुरस्कृत्य गृह्णीष्व धनुरुत्तमं ॥ २८ ॥

Digitized by Google

योजयस्व धनुःश्रेष्ठे शरं परपुरंजयं ।
यदि शक्नोषि काकुत्स्थ द्वन्द्वं दास्यामि ते तदा ॥ २१ ॥

इति बालकाण्डे जामदग्न्यवाक्यं नाम पञ्चसप्ततितमः
सर्गः ॥ ७५ ॥

---

## CAPUT LXXVI.

### JAMADAGNEIUS SUPERUM SEDIBUS EXCLUSUS.

श्रुत्वा तु जामदग्न्यस्य वाक्यं दाशरथिस्तदा ।
गौरवयन्त्रितकथः पितू राममथाब्रवीत् ॥ १ ॥
श्रुतवान् अस्मि यत् कर्म कृतवान् असि भार्गव ।
अनुरुध्यामहे ब्रह्मन् पितुरानृण्यमास्थितं ॥ २ ॥
वीर्यहीनमिवाशक्तं क्षत्रधर्मेण भार्गव ।
अवजानासि मे तेजः पश्य मेऽद्य पराक्रमं ॥ ३ ॥
इत्युक्त्वा राघवः क्रुद्धो भार्गवस्य वरायुधं ।
शरं च प्रतिसंगृह्य हस्ताल्लघुपराक्रमः ॥ ४ ॥
आरोप्य स धनू रामः शरं सज्जं चकार ह ।
जामदग्न्यं ततो रामं रामः क्रुद्धोऽब्रवीदिदं ॥ ५ ॥
ब्राह्मणोऽसीति पूज्यो मे विश्वामित्रकृतेन च ।
शक्तोऽपि न ते मुञ्चेयं त्वहं प्राणाहरं शरं ॥ ६ ॥

इमां वा त्वद्गतिं राम तपोबलसमर्जितां ।
लोकान् अप्रतिमान् वापि हनिष्यामीति मे मतिः ॥ ७ ॥
न ह्ययं वैष्णवो दिव्यः शरः परपुरंजयः ।
मोघः पतति वीर्येण बलदर्पविनाशनः ॥ ८ ॥
वरायुधधरं रामं द्रष्टुं सर्षिगणाः सुराः ।
पितामहं पुरस्कृत्य समेतास्तत्र सर्वशः ॥ ९ ॥
गन्धर्वाप्सरसश्चैव सिद्धचारणकिन्नराः ।
यक्षराक्षसनागाश्च तद्द्रष्टुं महदद्भुतं ॥ १० ॥
जडीकृते तदा लोके रामे वरधनुर्धरे ।
निर्वीर्यो जामदग्न्योऽसौ रामो राममुदैक्षत ॥ ११ ॥
तेजोऽभिहतवीर्यत्वाज्जामदग्न्यो जडीकृतः ।
रामं कमलपत्राक्षं मन्दं मन्दमुवाच ह ॥ १२ ॥
कश्यपाय मया दत्ता यदा पूर्वं वसुंधरा ।
विषये मे न वस्तव्यमिति मां कश्यपोऽब्रवीत् ॥ १३ ॥
सोऽहं गुरुवचः कुर्वन् पृथिव्यां न वसे निशां ।
मिथ्याप्रतिज्ञः काकुत्स्थ मा भूवमिति निश्चितं ॥ १४ ॥
तदिमां मद्गतिं वीर हन्तुं नार्हसि राघव ।
मनोजवं गमिष्यामि महेन्द्रं पर्वतोत्तमं ॥ १५ ॥
लोकास्त्वप्रतिमा राम निर्जितास्तपसा मया ।
जहि तान् शरमोक्षेण मा भूत् कालस्य पर्ययः ॥ १६ ॥

Digitized by Google

अक्षयं मधुहन्तारं जानामि त्वां महेश्वरं ।
धनुषोऽस्य परामर्शात् स्वस्ति तेऽस्तु परंतप ॥ १७ ॥
एते सुरगणाः सर्वे निरीक्षन्ते समागताः ।
त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥ १८ ॥
न चेयं मम काकुत्स्थ व्रीडा भवितुमर्हति ।
त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः ॥ १९ ॥
शरमप्रतिमं राम मोक्तुमर्हसि सुव्रत ।
शरमोक्षे गमिष्यामि महेन्द्रं पर्वतोत्तमं ॥ २० ॥
तथा ब्रुवति रामे तु जामदग्न्ये प्रतापवान् ।
रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमं ॥ २१ ॥
स हतान् दृश्य रामेण स्वाँल्लोकांस्तपसार्जितान् ।
जामदग्न्यो जगामाशु महेन्द्रं पर्वतोत्तमं ॥ २२ ॥
ततो वितिमिराः सर्वा दिशश्चोपदिशस्तथा ।
सुराः सर्षिगणा रामं प्रशशंसुरुदायुधं ॥ २३ ॥
रामं दाशरथिं रामो जामदग्न्यो प्रशस्य ह ।
ततः प्रदक्षिणं कृत्वा जगामात्मगतिं प्रभुः ॥ २४ ॥

इति बालकाण्डे जामदग्न्यलोकविरोधो नाम
षट्सप्ततितमः सर्गः ॥ ७६ ॥

---



Digitized by Google

## CAPUT LXXVII.

### BHARATAE DIMISSIO.

गते रामे प्रशान्तात्मा रामो दाशरथिर्धनुः ।
वरुणायाप्रमेयाय ददौ हस्ते ससायकं ॥ १ ॥
अभिवाद्य ततो रामो वशिष्ठप्रमुखानृषीन् ।
पितरं विह्वलं दृष्ट्वा प्रोवाच रघुनन्दनः ॥ २ ॥
जामदग्न्यो गतो रामः प्रयातु चतुरङ्गिणी ।
अयोध्याभिमुखी सेना त्वया नाथेन पालिता ॥ ३ ॥
रामस्य वचनं श्रुत्वा राजा दशरथः सुतं ।
बाहुभ्यां संपरिष्वज्य मूर्ध्न्युपाघ्राय राघवं ॥ ४ ॥
गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः ।
पुनर्जातं तदा मेने पुत्रमात्मानमेव च ॥ ५ ॥
चोदयित्वा पुनः सेनां जगाम स्वपुरीं प्रति ।
समुच्छ्रितध्वजवतीं तूर्योद्घुष्टनिनादितां ॥ ६ ॥
सिक्तराजपथां रम्यां प्रकीर्णकुसुमोत्करां ।
राजप्रवेशसुमुखैः पौरैर्मङ्गलपाणिभिः ॥ ७ ॥
संपूर्णां प्राविशद्राजा जनौघैः समलंकृतां ।
पौरैः प्रत्युद्गतो दूरं द्विजैश्च पुरवासिभिः ॥ ८ ॥

Digitized by Google

पुत्रैरनुगतः श्रीमान् श्रीमद्भिश्च महायशाः ।
प्रविवेश गृहं राजा हिमवत्सदृशं प्रियं ॥ ९ ॥
कौशल्या च सुमित्रा च कैकेयी च सुमध्यमा ।
बधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः ॥ १० ॥
ततः सीतां महाभागामूर्मिलां च यशस्विनीं ।
कुशधजसुते चोभे जगृहुर्नृपपत्नयः ॥ ११ ॥
मङ्गलालापनैर्होमैः शोभिताः क्षौमवाससः ।
देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन् ॥ १२ ॥
अभिवाद्याभिवाद्यांश्च सर्वा राजसुतास्तदा ।
रेमिरे मुदिताः काले भर्तृभिः सहिता रहः ॥ १३ ॥
कुमाराश्च महात्मानो वीर्येणाप्रतिमा भुवि ।
स्वं स्वं गृहमथासाद्य कुवेरभवनोपमं ॥ १४ ॥
कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः ।
शुश्रूषमाणाः पितरं वर्तयन्ति नरर्षभाः ॥ १५ ॥
कस्यचित् त्वथ कालस्य राजा दशरथः सुतं ।
भरतं कैकयीपुत्रं समाहूयेदमब्रवीत् ॥ १६ ॥
अयं केकयराजस्य पुत्रो वसति पुत्रक ।
त्वां नेतुमागतो वीरो युधाजिन्मातुलस्तव ॥ १७ ॥
श्रुत्वा दशरथस्यैतद्भरतः कैकयीसुतः ।
गमनायाभिचक्राम शत्रुघ्नसहितस्तदा ॥ १८ ॥

आपृच्छ्य पितरं शूरो रामं चाक्लिष्टकारिणं ।
मातॄश्चापि नरश्रेष्ठः शत्रुघ्नसहितो ययौ ॥ १९ ॥
युधाजित् प्राप्य भरतं सशत्रुघ्नं प्रहर्षितः ।
स्वपुरं प्राविशद्वीरः पिता तस्य तुतोष ह ॥ २० ॥
गते तु भरते रामो लक्ष्मणश्च महाबलः ।
पितरं देवसंकाशं पूजयामासतुस्तदा ॥ २१ ॥
पितुराज्ञां पुरस्कृत्य पौरकार्याणि सर्वशः ।
चकार रामो धर्मात्मा प्रियाणि च हितानि च ॥ २२ ॥
मातृभ्यो मातृकार्याणि कृत्वा परमयन्त्रितः ।
गुरूणां गुरुकार्याणि काले काले ऽन्ववैक्षत ॥ २३ ॥
एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ।
रामस्य शीलवृत्तेन सर्वे विषयवासिनः ॥ २४ ॥
रामश्च सीतया सार्द्धं विजहार बहून् ऋतून् ।
मनस्वी तद्गतमनास्तस्या हृदि समर्पितः ॥ २५ ॥
प्रिया तु सीता रामस्य दाराः पितृकृता इति ।
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो व्यवर्धत ॥ २६ ॥
तस्याश्च भर्ता द्विगुणं हृदये परिवर्तते ।
अन्तर्गतमपि व्यक्तमाख्याति हृदयं हृदा ॥ २७ ॥
तस्य भूयो विशेषेण मैथिली जनकात्मजा ।
देवताभिः समा रूपे सीता श्रीरिव रूपिणी ॥ २८ ॥

Digitized by Google

तया स राजर्षिसुतोऽभिकामया
समेयिवान् उत्तमराजकन्यया ।
अतीव रामः शुशुभे मुदान्वितो
विभुः श्रिया विष्णुरिवामरेश्वरः ॥ २१ ॥

इत्यार्षे रामायणे वाल्मीकीये चतुर्विंशतिसाहस्र्यां संहितायां बालकाण्डे भरतप्रस्थापनं नाम सप्तसप्ततितमः सर्गः ॥ ७७ ॥

Digitized by Google

॥ इति समाप्तं श्रीमद्बालकाण्डं ॥

FINIS LIBRI PRIMI.

॥ शुभमस्तु सर्वजगतां ॥

Digitized by Google

अथ

रामायणे वाल्मीकीये

अयोध्याकाण्डं

---

# RAMEIDOS

## LIBER SECUNDUS.

Digitized by Google

# LIBER SECUNDUS.

## CAPUT I.

### Decretum de Rama inaugurando.

---

॥ ॐ ॥

गच्छता मातुलकुलं भरतेन तदानघः ।
शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ॥ १ ॥
स तत्र न्यवसद्भ्रात्रा सह सत्कारसत्कृतः ।
मातुलेनाश्वपतिना पुत्रस्नेहेन पालितः ॥ २ ॥
तत्रापि निवसन्तौ तौ तर्प्यमानौ च कामतः ।
भ्रातरौ स्मरतां वीरौ वृद्धं दशरथं नृपं ॥ ३ ॥
राजापि तौ महातेजाः सस्मार प्रोषितौ सुतौ ।
उभौ भरतशत्रुघ्नौ महेन्द्रवरुणोपमौ ॥ ४ ॥
सर्व एव तु तस्येष्टाश्चत्वारः पुरुषर्षभाः ।
स्वशरीराद्विनिर्वृत्ताश्चत्वार इव बाहवः ॥ ५ ॥
तेषामतियशा लोके रामो रतिकरः पितुः ।
स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥ ६ ॥
स हि रूपोपपन्नश्च वीर्यवान् अनसूयकः ।
भूमावनुपमः सूनुर्गुणैर्दशरथोपमः ॥ ७ ॥

Digitized by Google

स तु नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते ।
उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते ॥ ८ ॥
शीलवृद्धैर्वयोवृद्धैर्ज्ञानवृद्धैश्च सज्जनैः ।
कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि ॥ ९ ॥
न चानृतकथो विद्वान् वृद्धानां प्रतिपूजकः ।
अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरञ्जयन् ॥ १० ॥
सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः ।
दीनानुकम्पी धर्मज्ञो नित्यं प्रग्रहवान् शुचिः ॥ ११ ॥
कुलोचितमतिः क्षात्रं स्वं धर्मं बहु मन्यते ।
मन्यते परया कीर्त्या महत् स्वर्गफलं ततः ॥ १२ ॥
नाश्रेयसि रतो नित्यं न विरुद्धकथारुचिः ।
उत्तरोत्तरयुक्तौ च वक्ता वाचस्पतिर्यथा ॥ १३ ॥
सम्यग्विद्याव्रतस्नातो यथावत् साङ्गवेदवित् ।
इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः ॥ १४ ॥
कल्याणाभिजनः साधुरदीनः सत्यवागृजुः ।
वृद्धैरभिविनीतश्च द्विजैर्धर्मार्थदर्शिभिः ॥ १५ ॥
धर्मकामार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
लौकिके समयाचारे कृतकल्पो विशारदः ॥ १६ ॥
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान् ।
अमोघक्रोधहर्षश्च त्यागसंयमकालवित् ॥ १७ ॥

Digitized by Google

दृढभक्तिः स्थिरप्रज्ञो नासद्ग्राही न दुर्वचाः ।
निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवित् ॥ १८ ॥
परिग्रहानुग्रहणे यथान्यायं विचक्षणः ।
आयकर्मण्युपायज्ञः संदृष्टव्ययकर्मकृत् ॥ १९ ॥
आरोहे विनये चैव युक्तो वारणवाजिनां ।
धनुर्वेदविदां श्रेष्ठो लोके ऽतिरथसंमतः ॥ २० ॥
अभियाता प्रहर्ता च सेनानयविशारदः ।
अप्रधृष्यश्च संग्रामे क्रुद्धैरपि सुरासुरैः ॥ २१ ॥
तथा सर्वप्रजाकान्तैः प्रीतिसंजननैः पितुः ।
गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥ २२ ॥
अथ राज्ञो बभूवैवं वृद्धस्य चिरजीविनः ।
प्रीतिरेषा कथं रामो राजा स्यान्मयि जीवति ॥ २३ ॥
एषा ह्यस्य परा प्रीतिर्हृदि संपरिवर्तते ।
कदा नाम सुतं द्रक्ष्याम्यभिषिक्तमहं प्रियं ॥ २४ ॥
महीमहमिमां कृत्स्नामधितिष्ठन्तमात्मजं ।
अनेन वयसा दृष्ट्वा यथा स्वर्गमवाप्नुयां ॥ २५ ॥
तं समीक्ष्य तदा राजा युक्तं समुदितैर्गुणैः ।
निश्चित्य सचिवैः सार्द्धं यौवराज्यममन्यत ॥ २६ ॥
दिव्यन्तरिक्षे भूमौ च घोरमुत्पातजं भयं ।
संचचक्षे ऽथ मेधावी शरीरे चात्मनो जरां ॥ २७ ॥

पूर्णचन्द्राननस्यास्य शोकापनुदमात्मनः ।
लोके रामस्य बुबुधे स प्रियत्वं महात्मनः ॥ २८ ॥
आत्मनश्च प्रजानां च श्रेयसे च प्रियेण च ।
प्राप्तकाले स धर्मात्मा भक्त्या त्वरितवान् नृपः ॥ २९ ॥
नानानगरवास्तव्यान् पृथग्जानपदान् अपि ।
आनाययामास तदा प्रधानान् पृथिवीपतीन् ॥ ३० ॥
तान् वेश्मनानाभरणैर्यथार्हं प्रतिपूजितान् ।
ददर्शालंकृतो राजा प्रजापतिरिव प्रजाः ॥ ३१ ॥
न तु केकयराजानं जनकं वा नराधिपः ।
त्वरयानाययामास पश्चात् तौ श्रोष्यतः प्रियं ॥ ३२ ॥
अथोपविष्टे नृपतौ तस्मिन् परपुरार्दने ।
ततः प्रविविशुः शेषा राजानो लोकसंमताः ॥ ३३ ॥
अथ राजवितीर्णेषु विविधेष्वासनेषु च ।
राजानमेवाभिमुखाः निषेदुर्नियता नृपाः ॥ ३४ ॥

स लब्धमानैर्विनयान्वितैर्नृपैः
पुरालयैर्जानपदैश्च मानवैः ।
उपोपविष्टैर्नृपतिर्वृतो बभौ
सहस्रचक्षुर्भगवान् इवामरैः ॥ ३५ ॥

इत्यायोध्याकाण्डे रामाभिषेकव्यवसायो नाम प्रथमः सर्गः
॥ १ ॥

Digitized by Google

## CAPUT II.

### CIVIUM SERMO.

ततः परिषदं सर्वामामन्त्र्य वसुधाधिपः ।
हितमुद्धर्षणं चैव उवाच प्रथितं वचः ॥ १ ॥
दुन्दुभिस्वनकल्पेन गम्भीरेणानुनादिना ।
स्वरेण महता राजा जीमूत इव नादयन् ॥ २ ॥
विदितं भवतामेतद्यथा मे राज्यमुत्तमं ।
पूर्वकैर्मम राजेन्द्रैः सुतवत् परिपालितं ॥ ३ ॥
मयाप्याचरितं पूर्वैः पन्थानमनुगच्छता ।
प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिताः ॥ ४ ॥
इदं शरीरं कृत्स्नस्य लोकस्य चरता हितं ।
पाण्डुरस्यातपत्रस्य छायायां जरितं मया ॥ ५ ॥
प्राप्य वर्षसहस्राणि बहून्यायूंषि जीवतः ।
जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये ॥ ६ ॥
राजप्रभावजुष्टां च दुर्वहामजितेन्द्रियैः ।
परिश्रान्तोऽस्मि लोकस्य गुर्वीं धर्मधुरं वहन् ॥ ७ ॥
सोऽहं विश्राममिच्छामि पुत्रं कृत्वा प्रजाहिते ।
संनिकृष्टान् इमान् सर्वान् अनुमान्य द्विजर्षभान् ॥ ८ ॥

Digitized by Google

अनुज्ञातो हि मां सर्वैर्गुणैर्ज्येष्ठो ममात्मजः ।
पुरंदरसमो वीर्ये रामः परपुरंजयः ॥ ९ ॥
तं चन्द्रमिव पुष्येण युक्तं धर्मभृतां वरं ।
यौवराज्ये नियोक्तास्मि प्रातः पुरुषपुंगवं ॥ १० ॥
अनुरूपः स वो नाथो लक्ष्मीवान् लक्षणान्वितः ।
त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरं ॥ ११ ॥
अनेन श्रेयसा सद्यः संयोक्ष्ये ऽहमिमां महीं ।
गतक्लेशो भविष्यामि सुते तस्मिन् निवेश्य वै ॥ १२ ॥
यदिदं मे ऽनुरूपार्थं मया साधु सुमन्त्रितं ।
भवन्तो मे ऽनुमन्यन्तां कथं वा करवाण्यहं ॥ १३ ॥
यद्यप्येषा मम प्रीतिर्हितमन्यद्विचिन्त्यतां ।
अन्या मध्यस्थचिन्ता तु विमर्दाभ्यधिकोदया ॥ १४ ॥
इति ब्रुवन्तं मुदिताः प्रत्यनन्दन् नृपा नृपं ।
वृष्टिमन्तं महामेघं नर्दन्त इव बर्हिणः ॥ १५ ॥
स्निग्धो ऽनुनादः संजज्ञे ततो हर्षसमीरितः ।
जनौघोद्घुष्टसंनादो विमानं कम्पयन्निव ॥ १६ ॥
तस्य धर्मार्थविदुषो भावमाज्ञाय सर्वशः ।
ब्राह्मणा बलमुख्याश्च पौरजानपदैः सह ॥ १७ ॥
समेत्य ते मन्त्रयितुं समतागतबुद्धयः ।
ऊचुः समन्ततः सर्वे वृद्धं दशरथं नृपं ॥ १८ ॥

Digitized by Google

अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव ।
स रामं युवराजानमभिषेक्तुमिहार्हसि ॥ १९ ॥
इच्छामो हि महाबाहुं महावीर्यं महाबलं ।
गजेन महता यान्तं रामं छत्त्रावृताननं ॥ २० ॥
इति तद्वचनं श्रुत्वा राजा तेषां मनःप्रियं ।
अजानन्निव जिज्ञासुरिदं वचनमब्रवीत् ॥ २१ ॥
श्रुत्वैतद्वचनं यन्मे राघवं पतिमिच्छथ ।
राजानः संशयोऽयं मे तदिदं ब्रूत तत्त्वतः ॥ २२ ॥
कथं नु मयि धर्मेण पृथिवीमनुशासति ।
भवन्तो द्रष्टुमिच्छन्ति युवराजं ममात्मजं ॥ २३ ॥
ते तमूचुर्महात्मानः पौरजानपदैः सह ।
बहवो नृप कल्याणा गुणाः सन्ति सुतस्य ते ॥ २४ ॥
गुणान् गुणवतो देव देवकल्पस्य धीमतः ।
प्रियान् आनन्दनान् कृत्स्नान् प्रवक्ष्यामोऽद्य तान् शृणु
रामस्य पुरुषो लोके सत्यधर्मयशोगुणैः ।
समो न विद्यते कश्चिद्विशिष्टः कुत एव तु ॥ २६ ॥
धर्मज्ञः सत्यसंधश्च शीलवान् अनसूयकः ।
मृदुश्च स्थिरचित्तश्च कृतज्ञो विजितेन्द्रियः ॥ २७ ॥
बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ।
तेनास्येहातुला कीर्तिर्यशस्तेजश्च वर्धते ॥ २८ ॥

Digitized by Google

देवासुरमनुष्याणां संयुगेष्वपराजितः ।
दिव्यमानुषसंस्थेषु सर्वास्त्रेषु विशारदः ॥ २९ ॥
यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा ।
गत्वा सौमित्रिसहितो नाविजित्य निवर्तते ॥ ३० ॥
संग्रामात् पुनरागम्य कुञ्जरेण रथेन वा ।
पौरान् स्वजनवन्नित्यं कुशलं परिपृच्छति ॥ ३१ ॥
पुत्रेष्वग्निषु दारेषु प्रेष्यशिष्यगणेषु च ।
निखिलेनानुपूर्व्या च पिता पुत्रान् इवौरसान् ॥ ३२ ॥
व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ।
उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥ ३३ ॥
वत्सः श्रेयसि जातस्ते दिष्ट्यासौ तव राघव ।
दिष्ट्या पुत्रगुणैर्युक्तो मारीच इव कश्यपः ॥ ३४ ॥
बलमारोग्यमायुश्च रामस्य विदितात्मनः ।
आशंसते जनः सर्वो राष्ट्रे पुरवरे तथा ॥ ३५ ॥
आभ्यन्तरश्च वाह्यश्च पौरजानपदो जनः ।
स्त्रियो वृद्धास्तरुण्यश्च सायं प्रातः समाहिताः ॥ ३६ ॥
सर्वदेवान् नमस्यन्ति रामस्यार्थे मनस्विनः ।
तेषामायाचितं देव त्वत्प्रसादात् समृध्यतां ॥ ३७ ॥
राममिन्दीवरश्यामं सर्वशत्रुनिवर्हणं ।
पश्येम यौवराज्यस्थं तव राजोत्तमात्मजं ॥ ३८ ॥

Digitized by Google

तं देव देवोपममात्मजं ते ।
सर्वस्य लोकस्य हिते निविष्टं ।
हिताय नः क्षिप्रमुदारसत्त्वं ।
मुदाभिषेक्तुं वरदार्हसि त्वं ॥ ३१ ॥

इत्ययोध्याकाण्डे प्रकृतिवाक्यं नाम द्वितीयः सर्गः ॥ २ ॥

## CAPUT III.

### DASARATHAE PRAECEPTA.

तेषामञ्जलिपद्मानि प्रगृहीतानि सर्वशः ।
प्रतिगृह्याब्रवीद्राजा तेभ्यः प्रियहितं वचः ॥ १ ॥
अहोऽस्मि परमप्रीतः प्रभावश्चातुलो मम ।
यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ ॥ २ ॥
इति प्रत्यर्च्य तान् राजा ब्राह्मणान् इदमब्रवीत् ।
वशिष्ठं वामदेवं च तेषामेवोपशृण्वतां ॥ ३ ॥
चैत्रः श्रीमान् अयं मासः पुण्यः पुष्पितकाननः ।
यौवराज्याय रामस्य सर्वमेवोपकल्प्यतां ॥ ४ ॥



Digitized by Google

राज्ञस्तूपरते वाक्ये पौराणां हर्षसंभवः ।
सर्वशोऽभून्महान् शब्दः साधु साधिति शंसतां ॥ ५ ॥
शनैस्तस्मिन् प्रशान्ते च जनघोषे नराधिपः ।
वशिष्ठं मुनिशार्दूलं राजा वचनमब्रवीत् ॥ ६ ॥
अभिषेकाय रामस्य यत् कर्म सपरिछदं ।
तदद्य भगवन् सर्वमाज्ञापयितुमर्हसि ॥ ७ ॥
तच्छ्रुत्वा भूमिपालस्य वशिष्ठो द्विजसत्तमः ।
आदिदेशाग्रतो राज्ञः स्थितान् युक्तान् कृताञ्जलीन्
सुवर्णादीनि रत्नानि बलीन् सर्वौषधीरपि ।
शुक्लमाल्यानि लाजांश्च पृथक् च मधुसर्पिषी ॥ ९ ॥
अहतानि च वासांसि रथं च शुभलक्षणं ।
चतुरङ्गबलं चैव गजं च शुभलक्षणं ॥ १० ॥
चामरव्यजने श्वेते ध्वजं छत्त्रं च पाण्डुरं ।
शतं च शातकुम्भानां कुम्भानामग्निवर्चसां ॥ ११ ॥
हिरण्यशृङ्गं वृषभं समग्रं व्याघ्रचर्म च ।
उपस्थापयत प्रातरग्न्यागारे महीपतेः ॥ १२ ॥
अन्तःपुरस्य द्वाराणि सर्वस्य नगरस्य च ।
चन्दनस्रग्भिरर्च्यन्तां धूपैश्च घ्राणहारिभिः ॥ १३ ॥
प्रशस्तमन्नं गुणवद्दधि क्षीरोपसेचनं ।
द्विजानां शतसाहस्रं यत् प्रकाममलंभवेत् ॥ १४ ॥

Digitized by Google

सत्कृत्य द्विजमुख्यानां श्वः प्रभाते प्रदीयतां ।
घृतं दधि लाजाश्च दक्षिणाश्चापि पुष्कलाः ॥ १५ ॥
सूर्ये ऽभ्युदितमात्रे श्वो भविता स्वस्तिवाचनं ।
ब्राह्मणाश्च निमन्त्र्यन्तां कल्प्यन्तामासनानि च ॥ १६ ॥
सर्वे च तालापचराः गणिकाश्च स्वलंकृताः ।
कक्ष्यां द्वितीयामासाद्य तिष्ठन्तु नृपवेश्मनः ॥ १७ ॥
देवायतनचैत्येषु सान्नभक्ष्याः सदक्षिणाः ।
उपस्थापयितव्याः स्युर्माल्यायोगाः पृथक् पृथक् ॥ १८ ॥
दीर्घासिबद्धगोधाश्च संनद्धा मृष्टवाससः ।
महाराजाङ्गनं शूराः प्रविशन्तु महोदयं ॥ १९ ॥
एवं व्यादिश्य विप्रौ तौ क्रियास्तत्र विनिष्ठितान् ।
कृतमित्येव चाब्रूतामभिगम्य जगत्पतिं ॥ २० ॥
ततः सुमन्त्रमाहूय राजा वचनमब्रवीत् ।
रामः कृतात्मा भवता शीघ्रमानीयतामिति ॥ २१ ॥
स तथेति प्रतिज्ञाय सुमन्त्रो राजशासनात् ।
रामं तत्रानयांचक्रे रथेन रथिनां वरं ॥ २२ ॥
अथ तत्र समासीनास्तदा दशरथं नृपं ।
प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः ॥ २३ ॥
म्लेच्छाश्चार्याश्च ये चान्ये वनशैलान्तवासिनः ।
उपासांचक्रिरे सर्वे तं देवा वासवं यथा ॥ २४ ॥

Digitized by Google

तेषां मध्ये स राजर्षिर्मरुतामिव वासवः ।
प्रासादस्थो रथस्थं तं ददर्शायान्तमात्मजं ॥ २५ ॥
गन्धर्वराजप्रतिमं लोके विख्यातपौरुषं ।
दीर्घवाहुं महासत्वं मत्तमातङ्गगामिनं ॥ २६ ॥
चन्द्रकान्ताननं राममतीव प्रियदर्शनं ।
रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणं ॥ २७ ॥
घर्माभितप्ताः पर्जन्यं ह्लादयन्तमिव प्रजाः ।
न ततर्प समायान्तं पश्यमानो नराधिपः ॥ २८ ॥
अवतार्य सुमन्त्रस्तु राघवं स्यन्दनोत्तमात् ।
पितुः समीपं गच्छन्तं प्राञ्जलिः पृष्ठतोऽन्वगात् ॥ २९ ॥
ततः कैलासशृङ्गाभं प्रासादं नरपुंगवः ।
आरुरोह नृपं द्रष्टुं सह सूतेन राघवः ॥ ३० ॥
स प्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिके ।
नाम स्वं श्रावयन् रामो ववन्दे चरणौ पितुः ॥ ३१ ॥
तं दृष्ट्वा प्रणतं पार्श्वे कृताञ्जलिपुटं नृपः ।
गृह्याञ्जलौ समाकृष्य सस्वजे प्रियमात्मजं ॥ ३२ ॥
तस्मै चाभ्युद्यतं सम्यङ्मणिकाञ्चनभूषितं ।
दिदेश राजा रुचिरं रामाय परमासनं ॥ ३३ ॥
तदासनवरं प्राप्य व्यदीपयत राघवः ।
स्वयैव प्रभया मेरुमुदये विमलो रविः ॥ ३४ ॥

Digitized by Google

तेन विभ्राजता तत्र सा सभापि व्यरोचत ।
विमलग्रहनक्षत्रा शारदी द्यौरिवेन्दुना ॥ ३५ ॥
तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजं ।
अलंकृतमिवात्मानमादर्शतलसंस्थितं ॥ ३६ ॥
स तं सस्मितमाभाष्य पुत्रं पुत्रवतां वरः ।
उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः ॥ ३७ ॥
ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ।
उत्पन्नस्त्वं गुणश्रेष्ठो मम रामात्मजः प्रियः ॥ ३८ ॥
त्वया यतः प्रजाश्चेमाः स्वगुणैरभिरञ्जिताः ।
तस्मात् त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि ॥ ३९ ॥
कामतस्त्वं प्रकृत्यैव विनीतो गुणवान् असि ।
गुणवत्यपि तु स्नेहात् पुत्र वक्ष्यामि ते हितं ॥ ४० ॥
भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः ।
कामक्रोधसमुत्थानि त्यजेथा व्यसनानि च ॥ ४१ ॥
परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा ।
अमात्यप्रभृतीः सर्वाः प्रकृतीश्चानुरञ्जयन् ॥ ४२ ॥
कोष्ठागारायुधागारैः कृत्वा संनिचयान् बहून् ।
तुष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीं ॥ ४३ ॥
तस्य नन्दन्ति मित्राणि लब्धामृतमिवामराः ।
तस्मात् पुत्र त्वमात्मानं नियम्यैव समाचर ॥ ४४ ॥

Digitized by Google

तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकाङ्क्षिणः ।
त्वरिताः शीघ्रमभ्येत्य कौशल्यायै न्यवेदयन् ॥ ४५ ॥
सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ।
व्यादिदेश प्रियाख्येभ्यः कौशल्या प्रमदोत्तमा ॥ ४६ ॥
अथाभिवाद्य राजानं रथमारुह्य राघवः ।
ययौ स्वं द्युतिमद्वेश्म जनौघैः प्रतिपूजितः ॥ ४७ ॥
ते चापि पौरा नृपतेर्वचस्तत्
श्रुत्वा तदा लाभमिवेष्टमाप्य ।
नरेन्द्रमामन्त्र्य गृहाणि गत्वा
देवान् समानर्चुरतिप्रहृष्टाः ॥ ४८ ॥

इत्ययोध्याकाण्डे दशरथानुशासनं नाम तृतीयः सर्गः
॥ ३ ॥

/ 22

## CAPUT IV.

### Ramas ad imperium suscipiendum denuo sollicitatus.

गतेष्वथ नृपो भूयः पौरेषु सह मन्त्रिभिः ।
मन्त्रयित्वा ततश्चक्रे निश्चयज्ञः स निश्चयं ॥ १ ॥
श्व एव पुष्यो भविता श्वोऽभिषिच्येत मे सुतः ।
रामो राजीवपत्राक्षो यौवराज्य इति प्रभुः ॥ २ ॥
अथान्तर्गृहमाविश्य राजा दशरथस्तदा ।
सूतमाज्ञापयामास रामं पुनरिहानय ॥ ३ ॥
प्रतिगृह्य तु तद्वाक्यं सूतः पुनरुपाययौ ।
रामस्य भवनं शीघ्रं राममानयितुं पुनः ॥ ४ ॥
द्वाःस्थैरावेदितं तस्य रामायागमनं पुनः ।
श्रुत्वैव चापि रामस्तं प्राप्तं शङ्कान्वितोऽभवत् ॥ ५ ॥
प्रवेश्य चैनं त्वरितं रामो वचनमब्रवीत् ।
यदागमनकार्यं ते भूयस्तद्ब्रूह्यशेषतः ॥ ६ ॥
तमुवाच ततः सूतो राजा त्वां द्रष्टुमिच्छति ।
श्रुत्वा प्रमाणमत्र त्वं गमनायेतराय वा ॥ ७ ॥
इति सूतवचः श्रुत्वा रामोऽपि त्वरयान्वितः ।
प्रययौ राजभवनं पुनर्द्रष्टुं नरेश्वरं ॥ ८ ॥

Digitized by Google

तं श्रुत्वा समनुप्राप्तं रामं दशरथो नृपः ।
प्रवेशयामास गृहं विवत्सुः प्रियमुत्तमं ॥ ९ ॥
प्रविशन्नेव च श्रीमान् राघवो भवनं पितुः ।
ददर्श पितरं दूरात् प्रणिपत्य कृताञ्जलिः ॥ १० ॥
प्रणमन्तं तमुत्थाप्य संपरिष्वज्य भूमिपः ।
प्रदिश्य चास्मै रुचिरमासनं पुनरब्रवीत् ॥ ११ ॥
राम वृद्धोऽस्मि दीर्घायुर्भुक्ता भोगा यथेप्सिताः ।
अन्नवद्भिः क्रतुशतैस्तथेष्टं भूरिदक्षिणैः ॥ १२ ॥
जातमिष्टमपत्यं मे त्वमप्यनुपमं भुवि ।
देवर्षिपितृविप्राणामनृणोऽस्मि तथात्मनः ॥ १३ ॥
न किंचिन्मम कर्तव्यं तवान्यत्राभिषेचनात् ।
अतो यत् त्वामहं ब्रूयां तन्मे त्वं कर्तुमर्हसि ॥ १४ ॥
अद्य प्रकृतयः सर्वास्त्वामिच्छन्ति नराधिपं ।
अतस्त्वां युवराजानमभिषेक्ष्यामि पुत्रक ॥ १५ ॥
अपि चाद्याशुभान् स्वप्नान् राम पश्यामि दारुणान् ।
सनिर्घाता महोल्काश्च पतन्ति हि महास्वनाः ॥ १६ ॥
अवस्तब्धं च मे राम नक्षत्रं दारुणैर्ग्रहैः ।
आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ॥ १७ ॥
प्रायेण हि निमित्तानामीदृशानां समुद्भवे ।
राजा वा मृत्युमाप्नोति घोरां वापदमृच्छति ॥ १८ ॥

Digitized by Google

तद्यावदेव मे चेतो न विमुञ्चति राघव ।
तावदेवाभिषिच्यस्व चला हि प्राणिनां मतिः ॥ १९ ॥
अद्य चन्द्रोऽभ्युपगतः पुष्यात् पूर्वं पुनर्वसुं ।
श्वः पुष्ययोगं नियतं वक्ष्यन्ते दैवचिन्तकाः ॥ २० ॥
तत्र पुष्येऽभिषिच्यस्व मनस्त्वरयतीव मां
श्वस्त्वाहमभिषेक्ष्यामि यौवराज्ये परंतप ॥ २१ ॥
तस्मात् त्वद्य प्रभृति निशेयं नियतात्मना ।
सह वध्वोपवस्तव्या दर्भप्रस्तरशायिना ॥ २२ ॥
सुहृदश्चाप्रमत्तास्त्वां रक्षन्त्वद्य समन्ततः ।
भवन्ति बहुविघ्नानि कार्याण्येवंविधानि हि ॥ २३ ॥
विप्रोषितश्च भरतो यावदेव पुरादितः ।
तावदेवाभिषेकस्ते प्राप्तकालो मतो मम ॥ २४ ॥
कामं खलु सतां वृत्ते भ्राता ते भरतः स्थितः ।
ज्येष्ठानुवर्ती धर्मात्मा सानुक्रोशो जितेन्द्रियः ॥ २५ ॥
किंतु चित्तं मनुष्याणामनित्यमिति मे मतिः ।
सतां च धर्मनित्यानां कृतशोभि हि राघव ॥ २६ ॥
इत्युक्तःसोऽभ्यनुज्ञातः श्वो भाविन्यभिषेचने ।
व्रजेति रामः पितरमभिवाद्याभ्ययाद्गृहं ॥ २७ ॥
प्रविश्य चात्मनो वेश्म राज्ञादिष्टेऽभिषेचने ।
तत्क्षणेन स निष्क्रम्य मातुरन्तःपुरं ययौ ॥ २८ ॥

तत्र तां प्रवणामेव मातरं क्षौमवासिनीं ।
वाग्यतां देवतागारे ददर्शायाचतीं श्रियं ॥ २९ ॥
प्रागेव चागता तत्र सुमित्रा लक्ष्मणस्तथा ।
सीता चानायिता श्रुत्वा प्रियं रामाभिषेचनं ॥ ३० ॥
तस्मिन् काले तु कौशल्या तस्थावामीलितेक्षणा ।
सुमित्रयान्वास्यमाना सीतया लक्ष्मणेन च ॥ ३१ ॥
श्रुत्वा पुष्येण पुत्रस्य यौवराज्याभिषेचनं ।
प्राणायामेन पुरुषं ध्यायमाना जनार्दनं ॥ ३२ ॥
तथा सनियमामेव सोऽभिगम्याभिवाद्य च ।
उवाच मातरं रामो हर्षयिष्यन्निदं वचः ॥ ३३ ॥
अम्ब पित्रा नियुक्तोऽस्मि प्रजापालनकर्मणि ।
भविता श्वोऽभिषेको मे यथा वै शासनं पितुः ॥ ३४ ॥
सीतयाप्युपवस्तव्या रजनीयं मया सह ।
एवमृत्विगुपाध्यायैः सह मामुक्तवान् पिता ॥ ३५ ॥
यानि यान्यत्र योग्यानि श्वो भाविन्यभिषेचने ।
तानि मे मङ्गलान्यद्य वैदेह्याश्चापि कारय ॥ ३६ ॥
एतच्छ्रुत्वा तु कौशल्या चिरकालाभिकाङ्क्षितं ।
हर्षवाष्पाकुलं वाक्यमिदं राममभाषत ॥ ३७ ॥
वत्स राम चिरं जीव हतास्ते परिपन्थिनः ।
ज्ञातीन् मे त्वं श्रिया युक्तः सुमित्रायाश्च नन्दय ॥ ३८ ॥

कल्याणे वत नक्षत्रे मयि जातोऽसि पुत्रक ।
येन त्वया दशरथो गुणैराराधितः पिता ॥ ३९ ॥
अमोघं वत मे क्षान्तं पुरुषे पुष्करेक्षणे ।
येयमिक्ष्वाकुराजश्रीः पुत्र त्वां संश्रयिष्यति ॥ ४० ॥
इत्येवमुक्तो मात्रेदं रामो भ्रातरमब्रवीत् ।
प्राञ्जलिं प्रह्वमासीनमभिवीक्ष्य स्मयन्निव ॥ ४१ ॥
लक्ष्मणेमां मया सार्द्धं प्रशाधि त्वं वसुंधरां ।
द्वितीयं मेऽन्तरात्मानं त्वामियं श्रीरुपस्थिता ॥ ४२ ॥
सौमित्रे भुङ्क्ष्व भोगांस्त्वमिष्टान् राज्यफलानि च ।
जीवितं चापि राज्यं च त्वदर्थमभिकामये ॥ ४३ ॥
इत्युक्त्वा लक्ष्मणं रामो मातरावभिवाद्य च ।
अभ्यनुज्ञाप्य सीतां च जगाम स्वं निवेशनं ॥ ४४ ॥

इत्ययोध्याकाण्डे रामराज्योपनिमन्त्रणं नाम चतुर्थः सर्गः
॥ ४ ॥

Digitized by Google

## CAPUT V.

### RAMAE IEIUNIUM ORDINATUM.

संदिश्य रामं नृपतिः श्वो भाविन्यभिषेचने ।
पुरोहितं समाहूय वशिष्ठमिदमब्रवीत् ॥ १ ॥
गच्छोपवासं काकुत्स्थं कारयाद्य तपोधन ।
श्रेयसे राज्यलाभाय सह बध्वा यतव्रतं ॥ २ ॥
तथेति च स राजानमुक्त्वा वेदविदां वरः ।
स्वयं वशिष्ठो भगवान् ययौ रामनिवेशनं ॥ ३ ॥
उपवासयितुं वीरं मन्त्रविन्मन्त्रकोविदं ।
ब्राह्मं रथवरं युक्तमास्थाय स दृढव्रतः ॥ ४ ॥
स रामभवनं गत्वा पाण्डुराभ्रघनप्रभं ।
तिस्रः कक्ष्या रथेनैव विवेश मुनिसत्तमः ॥ ५ ॥
तमागतमृषिं रामस्त्वरयन्निव संभ्रमात् ।
मानयिष्यन् स मानार्हं निश्चक्राम निवेशनात् ॥ ६ ॥
अभ्येत्य त्वरमानश्च रथाभ्यासं मनीषिणः ।
ततोऽवतारयामास परिगृह्य रथात् स्वयं ॥ ७ ॥
स चैनं प्रश्रितं दृष्ट्वा संभाष्याभिप्रसाद्य च ।
प्रियार्हं हर्षयन् राममित्युवाच पुरोहितः ॥ ८ ॥
प्रसन्नस्ते पिता राम यौवराज्यमवाप्स्यसि ।
उपवासं भवान् अद्य करोतु सह सीतया ॥ ९ ॥

Digitized by Google

प्रातस्त्वामभिषेक्ता हि यौवराज्ये नराधिपः ।
पिता दशरथः प्रीत्या ययातिं नहुषो यथा ॥ १० ॥
इत्युक्त्वा स तदा राममुपवासं यतव्रतं ।
मन्त्रवित् कारयामास वैदेह्या सहितं मुनिः ॥ ११ ॥
ततो यथावद्रामेण स राज्ञो गुरुरर्चितः ।
अभ्यनुज्ञाप्य काकुत्स्थं ययौ रामनिवेशनात् ॥ १२ ॥
सुहृद्भिस्ततो रामोऽपि सुखासीनः प्रियंवदैः ।
सभाजितो विवेशान्तस्तान् अनुज्ञाप्य सर्वशः ॥ १३ ॥
प्रहृष्टनरनारीकं रामवेश्म तदा बभौ ।
यथा मत्तद्विजगणं प्रफुल्लनलिनं सरः ॥ १४ ॥
स राजभवनप्रख्यात् तस्माद्रामनिवेशनात् ।
निःसृत्य ददृशे मार्गं वशिष्ठो जनसंवृतं ॥ १५ ॥
वृन्दवृन्दैरयोध्यायां राजमार्गाः समन्ततः ।
बभूवुरभिसंबाधाः कुतूहलजनैर्वृताः ॥ १६ ॥
जनवृन्दोर्मिसंघर्षहर्षस्वनवतस्तदा ।
बभूव राजमार्गस्य सागरस्येव निस्वनः ॥ १७ ॥
सिक्तसंमृष्टरथ्या हि तदहर्वनमालिनी ।
आसीदयोध्या नगरी समुच्छ्रितगृहध्वजा ॥ १८ ॥
तदा ह्ययोध्यानिलयः सस्त्रीबालयुवा जनः ।
रामाभिषेकमाकाङ्क्षन्नाकाङ्क्षदुदयं रवेः ॥ १९ ॥

प्रजालंकारभूतं च जनस्यानन्दवर्धनं ।
उत्सुकोऽभूज्जनो द्रष्टुमयोध्यायां महोत्सवं ॥ २० ॥
एवं तज्जनसंबाधं राजमार्गं पुरोहितः ।
व्यूहन्निव जनौघं तं शनै राजकुलं ययौ ॥ २१ ॥
सिताभ्रशिखरप्रख्यं प्रासादमधिरुह्य च ।
समियाय नरेन्द्रेण शक्रेणेव बृहस्पतिः ॥ २२ ॥
तमागतमभिप्रेक्ष्य हित्वा राजासनं नृपः ।
पप्रच्छ स च तस्मै तत् कृतमित्यभ्यवेदयत् ॥ २३ ॥
तेन चैव तदा तुल्यं सहासीनाः सभासदः ।
आसनेभ्यः समुत्तस्थुः पूजयन्तः पुरोहितं ॥ २४ ॥
गुरुणा त्वभ्यनुज्ञातो मनुजौघं विसर्ज्य च ।
विवेशान्तःपुरं राजा सिंहो गिरिगुहामिव ॥ २५ ॥

तदग्र्यवेशप्रमदाजनाकुलं
महेन्द्रवेश्मप्रतिमं निवेशनं ।
विदीपयंश्चारु विवेश पार्थिवः
शशीव तारागणसंकुलं नभः ॥ २६ ॥

इत्ययोध्याकाण्डे रामोपवासविधानं नाम पञ्चमः सर्गः
॥ ५ ॥

166
26
190

## CAPUT VI.

### Festivus urbis ornatus.

गते पुरोहिते रामः स्नातो नियतमानसः ।
सह पत्न्या विशालाक्ष्या नारायणमुपागमत् ॥ १ ॥
प्रगृह्य शिरसा पात्रीं हविषो विधिवत् तदा ।
महते दैवतायाज्यं जुहाव ज्वलितेऽनले ॥ २ ॥
शेषं च हविषस्तस्य प्राश्याशास्यात्मनः प्रियं ।
ध्यायन् नारायणं देवं स्वास्तीर्णे कुशसंस्तरे ॥ ३ ॥
वाग्यतः सह वैदेह्या भूत्वा नियतमानसः ।
श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ॥ ४ ॥
एकयामावशिष्टायां रात्र्यां तु प्रतिबुध्य सः ।
अलंकारविधिं कृत्स्नं कारयामास वेश्मनः ॥ ५ ॥
तत्र शृण्वन् सुखा वाचः सूतमागधवन्दिनां ।
पूर्वां संध्यामुपासीनो जजाप सुसमाहितः ॥ ६ ॥
तुष्टाव प्रणतश्चैव शिरसा मधुसूदनं ।
विमलक्षौमसंवीतो वाचयामास स द्विजान् ॥ ७ ॥
तेषां पुण्याहघोषोऽथ गम्भीरमधुरस्तदा ।
अयोध्यां पूरयामास तूर्यघोषानुनादितः ॥ ८ ॥
कृतोपवासं तु तदा वैदेह्या सह राघवं ।
अयोध्यानिलयः श्रुत्वा सर्वः प्रमुमुदे जनः ॥ ९ ॥

Digitized by Google

ततः पौरजनः सर्वः श्रुत्वा रामाभिषेचनं ।
प्रभातां रजनीं दृष्ट्वा चक्रे शोभयितुं पुरीं ॥ १० ॥
शुभ्राभ्रशिखराभेषु देवतायतनेषु च ।
चतुष्पथेषु रथ्यासु चैत्येष्वट्टालकेषु च ॥ ११ ॥
नानापण्यसमृद्धेषु वणिजामापणेषु च ।
कुटुम्बिनां समृद्धानां श्रीमत्सु भवनेषु च ॥ १२ ॥
सभासु चैव सर्वासु वृक्षेष्वालक्षितेषु च ।
ध्वजाः समुच्छ्रितास्चित्राः पताकाश्चाभवंस्तथा ॥ १३ ॥
नटनर्तकसंघानां गायकानां च गायतां ।
मनःकर्णसुखा वाचः शुश्रुविरे ततस्ततः ॥ १४ ॥
रामाभिषेकयुक्ताश्च कथाश्चक्रुर्मिथो जनाः ।
बाला अपि क्रीडमाना गृहद्वारेषु संघशः ॥ १५ ॥
कृतपुष्पोपहारश्च धूपगन्धोपवासितः ।
राजमार्गः कृतः श्रीमान् पौरै रामाभिषेचने ॥ १६ ॥
प्रकाशीकरणार्थं च निशागमनशङ्कया ।
दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः ॥ १७ ॥
अलंकारं पुरस्यैवं कृत्वा तत्पुरवासिनः ।
आकाङ्क्षमाणा रामस्य यौवराज्याभिषेचनं ॥ १८ ॥
समेत्य संघशः सर्वे चत्वरेषु सभासु च ।
कथयन्तो मिथस्तत्र प्रशशंसुर्जनाधिपं ॥ १९ ॥

Digitized by Google

अहो महात्मा राजायमिक्ष्वाकुकुलवर्धनः ।
ज्ञात्वा यो वृद्धमात्मानं रामं राज्येऽभिषेक्ष्यति ॥ २० ॥
सर्वे ह्यनुगृहीताः स्म यन्नो रामो महीपतिः ।
चिराय भविता गोप्ता दृष्टलोकपरावरः ॥ २१ ॥
अनुद्धतमना विद्वान् धर्मात्मा भ्रातृवत्सलः ।
यथा च भ्रातृषु स्निग्धस्तथास्मास्वपि राघवः ॥ २२ ॥
चिरं जीवतु धर्मात्मा राजा दशरथोऽनघः ।
यत्प्रसादेनाभिषिक्तं रामं द्रक्ष्यामहे वयं ॥ २३ ॥
एवंविधं कथयतां पौराणां शुश्रुवुस्तदा ।
दिग्भ्योऽपि श्रुतवृत्तान्ताः प्राप्ता जानपदा जनाः ॥ २४ ॥
[स तु दिग्भ्यः पुरीं प्राप्तो द्रष्टुकामोऽभिषेचनं ।
रामस्य पूरयामास पुरीं जानपदो जनः ॥ २५ ॥]
जनौघैस्तैर्विसर्पद्भिः शुश्रुवे तत्र निस्वनः ।
पर्वसूदीर्णवेगस्य सागरस्येव गर्जतः ॥ २६ ॥
ततस्तदिन्द्रक्षयसंनिभं पुरं
दिदृक्षुभिर्जानपदैरुपागतैः ।
समन्ततः सस्वनमाकुलं बभौ
समुद्रयादोभिरिवार्णवोदकं ॥ २७ ॥

इत्ययोध्याकाण्डे पुरशोभाविधानं नाम षष्ठः सर्गः ॥ ६ ॥



Digitized by Google

## CAPUT VII.

### MANTHARAE LAMENTATIO.

ज्ञातिदासी यतो जाता कैकेय्या तु सहोषिता ।
प्रासादं चन्द्रसंकाशमारुरोह यदृच्छया ॥ १ ॥
सिक्तराजपथां कृत्स्नां प्रकीर्णकुसुमोत्करां ।
अयोध्यां मन्थरा तस्मात् प्रासादादन्ववैक्षत ॥ २ ॥
पताकाभिर्वरार्हाभिर्ध्वजैश्च समलंकृतां ।
वृतां छन्नपथैश्चापि स्वच्छन्दकपथैर्वृतां ॥ ३ ॥
सिक्तां चन्दनतोयैश्च शिरःस्नातजनैर्युतां ।
माल्यमोदकहस्तैश्च द्विजेन्द्रैरुपशोभितां ॥ ४ ॥
शुक्लदेवगृहद्वारां सर्ववादित्रनादितां ।
अयोध्यां मन्थरा दृष्ट्वा परं विस्मयमागता ॥ ५ ॥
सा हर्षोत्फुल्लनयनां पाण्डुरक्षौमवासिनीं ।
अविदूरे स्थितां दृष्ट्वा धात्रीं पप्रच्छ मन्थरा ॥ ६ ॥
उत्तमेनाभिसंयुक्ता हर्षेणार्थपरा सती ।
राममाता धनं किन्नु जनेभ्यः संप्रयच्छति ॥ ७ ॥
अतिमात्रं प्रहर्षोऽयं किं जनस्यास्य शंस मे ।
कारयिष्यति किं वापि संप्रहृष्टो महीपतिः ॥ ८ ॥

Digitized by Google

उदीर्यमाणा हर्षेण धात्री परमया मुदा ।
आचचक्षेऽथ कुब्जायै भूयसीं राघवे श्रियं ॥ ९ ॥
श्वः पुष्ययोगेन किल यौवराज्ये स्वमात्मजं ।
राजा दशरथो राममभिषेक्ता हि राघवं ॥ १० ॥
धात्र्यास्तद्वचनं श्रुत्वा कुब्जा क्षिप्रममर्षिता ।
कैलासशिखराकारात् प्रासादादवरोहत ॥ ११ ॥
सा दह्यमाना कोपेन मन्थरा पापदर्शिनी ।
शयानामेत्य कैकेयीमिदं वचनमब्रवीत् ॥ १२ ॥
उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते ।
उपप्लुतमघौघेन नात्मानमवबुध्यसे ॥ १३ ॥
अनिष्टे सुभगाकारे सौभाग्येन विकत्थसे ।
चलं हि तव सौभाग्यं नद्याः स्रोत इवोष्णगे ॥ १४ ॥
एवमुक्ता तु कैकेयी रुष्टया परुषं वचः ।
कुब्जया पापदर्शिन्या विषादमगमत् परं ॥ १५ ॥
कैकेयी त्वब्रवीत् कुब्जां कच्चित् क्षेमं न मन्थरे ।
विषण्णवदनां हि त्वां लक्षये भृशदुःखितां ॥ १६ ॥
मन्थरा तद्वचः श्रुत्वा कैकेय्याः पुनरब्रवीत् ।
संरम्भामर्षताम्राक्षी वाक्यं वाक्यविशारदा ॥ १७ ॥
भूयो विषादयिष्यन्ती कैकेयीं पापनिश्चया ।
रामाद्विभेदयिष्यन्ती किल तस्याहितैषिणी ॥ १८ ॥

अनयं हि महद्देवि प्रवृत्तं त्वद्विनाशनं ।
रामं दशरथो राजा यौवराज्येऽभिषेक्ष्यति ॥ १९ ॥
सास्म्यगाधे भये मग्ना दुःखशोकसमन्विता ।
दह्यमानानलेनेव त्वद्धितार्थमिहागता ॥ २० ॥
तव दुःखेन कैकेयि मम दुःखं भवेन्महत् ।
त्वद्वृद्धौ मम वृद्धिश्च भवेदेव न संशयः ॥ २१ ॥
नराधिपकुले जाता महिषी त्वं महीपतेः ।
उग्रत्वं राजधर्माणां कथं देवि न बुध्यसे ॥ २२ ॥
धर्मवादी शठो भर्ता श्लक्ष्णवादी च दारुणः ।
शुद्धभावे न जानीषे तेनैवमतिसंधिता ॥ २३ ॥
उपस्थितं प्रयुञ्जानस्त्वयि सान्त्वमनर्थकं ।
अर्थेनैवाद्य ते भर्ता कौशल्यां योजयिष्यति ॥ २४ ॥
अपवाह्य हि दुष्टात्मा भरतं तव बन्धुषु ।
काल्ये स्थापयिता रामं राज्ये निहतकण्टके ॥ २५ ॥
शत्रुः पतिप्रवादेन मात्रेव हितकाम्यया ।
आशीविष इवाङ्केन बाले परिधृतस्त्वया ॥ २६ ॥
यथा हि कुर्यात् सर्पो वा शत्रुर्वाप्रत्युपेक्षितः ।
राज्ञा दशरथेनाद्य सपुत्रा त्वं तथा कृता ॥ २७ ॥
पापेनानृतसान्त्वेन बाले नित्यं सुखोचिता ।
रामं स्थापयता राज्ये सानुबन्धा कृता ह्यसि ॥ २८ ॥

Digitized by Google

सा प्राप्तकालं कैकेयि क्षिप्रं कुरु हितं तव ।
त्रायस्व पुत्रमात्मानं मां च विस्मयदर्शिनि ॥ २९ ॥
मन्थराया वचः श्रुत्वा शयनात् सा शुभानना ।
उत्तस्थौ हर्षसंपूर्णा चन्द्रलेखेव शारदी ॥ ३० ॥
अतीव सा तु संतुष्टा कैकेयी विस्मयान्विता ।
एकमाभरणं तस्यै कुब्जायै प्रददौ शुभं ॥ ३१ ॥
दत्त्वा चाभरणं श्रीमत् प्रीतिदायं प्रहर्षिता ।
कैकेयी मन्थरां वाक्यमिदं तत्राब्रवीत् पुनः ॥ ३२ ॥
इदं हि मन्थरे मह्यमाख्यासि परमं प्रियं ।
तत्रेदं प्रीतिदायं ते किं वा भूयः करोमि ते ॥ ३३ ॥
रामे वा भरते वाहं विशेषं नोपलक्षये ।
तस्मात् तुष्टास्मि यद्राजा रामं राज्ये ऽभिषेक्ष्यति ॥ ३४ ॥

इत्ययोध्याकाण्डे मन्थरापरिदेवनं नाम सप्तमः सर्गः
॥ ७ ॥

223
34
257

## CAPUT VIII.

### MANTHARAE SERMO.

मन्थरा त्वभ्यसूयैनामुत्सृज्याभरणं च तत् ।
उवाचेदं ततो वाक्यं कोपदुःखसमन्विता ॥ १ ॥
हर्षं किमर्थमस्थाने कृतवत्यसि बालिशे ।
शोकसागरमध्यस्थं नात्मानमवबुध्यसे ॥ २ ॥
मनसा प्रहसामि त्वां देवि दुःखार्दिता सती ।
यच्छोचितव्ये हृष्टासि प्राप्येदं व्यसनं महत् ॥ ३ ॥
शोचामि दुर्मतित्वं ते का हि प्रज्ञा प्रहर्षयेत् ।
अरेः सपत्नीपुत्रस्य वृद्धिं मृत्योरिवागतां ॥ ४ ॥
भरतादेव रामस्य राज्यसाधारणाद्भयं ।
तद्विचिन्त्य विषण्णास्मि भयं भीताद्धि जायते ॥ ५ ॥
लक्ष्मणो हि महेष्वासो रामं सर्वात्मना गतः ।
शत्रुघ्नश्चापि भरतं काकुत्स्थं लक्ष्मणो यथा ॥ ६ ॥
प्रत्यासन्नक्रमेणापि भरतस्यैव भामिनि ।
राज्यक्रमो विप्रकृष्टस्तयोस्तावद्यवीयसोः ॥ ७ ॥

Digitized by Google

विदुषः क्षत्रचारित्रे प्राज्ञस्य प्राप्तकारिणः ।
भयात् प्रवेपे रामस्य चिन्तयन्ती तवात्मजं ॥ ८ ॥
सुभगा किल कौशल्या यस्याः पुत्रोऽभिषेक्ष्यते ।
यौवराज्येन महता श्वः पुष्येण द्विजोत्तमैः ॥ ९ ॥
प्राप्तां वसुमतीं प्रीतिं प्रतीतां हतविद्विषं ।
उपस्थास्यसि कौशल्यां दासीव त्वं कृताञ्जलिः ॥ १० ॥
एवं च त्वं सहास्माभिस्तस्याः प्रेष्या भविष्यसि ।
पुत्रश्च तव रामस्य प्रेष्यभावं गमिष्यति ॥ ११ ॥
हृष्टाः खलु भविष्यन्ति रामस्य परमाः स्त्रियः ।
अप्रहृष्टा भविष्यन्ति स्नुषास्ते भरतक्षये ॥ १२ ॥
तां दृष्ट्वा भृशमप्रीतां ब्रुवन्तीं मन्थरां ततः ।
रामस्यैव गुणान् देवी कैकेयी प्रशशंस ह ॥ १३ ॥
धर्मज्ञो गुरुभिर्दान्तः कृतज्ञः सत्यवाक् शुचिः ।
रामो राजसुतो ज्येष्ठो यौवराज्यमतोऽर्हति ॥ १४ ॥
भ्रातॄन् भृत्यांश्च दीर्घायुः पितृवत् पालयिष्यति ।
संतप्यसे कथं कुब्जे श्रुत्वा रामाभिषेचनं ॥ १५ ॥
भरतश्चापि रामस्य ध्रुवं वर्षशतात् परं ।
पितृपैतामहं राज्यमवाप्स्यति नरर्षभः ॥ १६ ॥
सा त्वमभ्युदये प्राप्ते वर्तमाने च मन्थरे ।
भविष्यति च कल्याणे किमर्थं परितप्यसे ॥ १७ ॥

Digitized by Google

यथा मे भरतो मान्यस्तथा भूयोऽपि राघवः ।
कौशल्यातोऽतिरिक्तं च सोऽनुशुश्रूषते हि मां ॥ १८ ॥
राज्यं यदिह रामस्य भरतस्यापि तत् तथा ।
मन्यते हि यथात्मानं तथा भ्रातॄंश्च राघवः ॥ १९ ॥
कैकेय्या वचनं श्रुत्वा मन्थरा भृशदुःखिता ।
दीर्घमुष्णं च निःश्वस्य कैकेयीं पुनरब्रवीत् ॥ २० ॥
अनर्थदर्शिनी मौर्ख्यादात्मानं नावबुध्यसे ।
शोकव्यसनविस्तीर्णे मज्जन्ती दुःखसागरे ॥ २१ ॥
भविता राघवो राजा राघवस्य च यः सुतः ।
राजवंशात् तु भरतः कैकेयि परिहास्यते ॥ २२ ॥
न हि राज्ञः सुताः सर्वे राज्ये तिष्ठन्ति भामिनि ।
स्थाप्यमानेषु सर्वेषु सुमहान् अनयो भवेत् ॥ २३ ॥
तस्माज्ज्येष्ठे हि कैकेयि राज्यतन्त्राणि पार्थिवाः ।
स्थापयन्त्यनवद्याङ्गि गुणवत्स्वितरेष्वपि ॥ २४ ॥
असावत्यन्तनिर्भग्नस्तव पुत्रो भविष्यति ।
अनाथवत् सुखेभ्यश्च राजवंशाच्च वत्सले ॥ २५ ॥
साहं त्वदर्थे संप्राप्ता त्वं तु मां नावबुध्यसे ।
सपत्निवृद्धौ या मे त्वं प्रदेयं दातुमिच्छसि ॥ २६ ॥
ध्रुवं तु भरतं रामः प्राप्य राज्यमकण्टकं ।
देशान्तरं नाययिता लोकान्तरमथापि वा ॥ २७ ॥

Digitized by Google

बाल एव हि मातुल्यं भरतो नायितस्त्वया ।
संनिकर्षाच्च सौहार्दं जायते स्थावरेष्वपि ॥ २८ ॥
भरतस्याप्यनुवशाच्छत्रुघ्नोऽपि समं गतः ।
लक्ष्मणो हि यथा रामं तथायं भरतं गतः ॥ २९ ॥
श्रूयते हि द्रुमः कश्चिच्छेत्तव्यो वनजीविभिः ।
संनिकर्षादिषीकाभिर्मोचितः परमाद्भयात् ॥ ३० ॥
गोप्ता हि रामं सौमित्रिर्लक्ष्मणं चापि राघवः ।
अश्विनोरिव सौभ्रात्रं तयोर्लोकेषु विश्रुतं ॥ ३१ ॥
तस्मान्न लक्ष्मणे रामः पापं किंचित् करिष्यति ।
रामस्तु भरते पापं कुर्यादिति न संशयः ॥ ३२ ॥
तस्माद्राजगृहादेवि वनं गच्छतु राघवः ।
एतद्धि रोचते मह्यं भृशं चापि हितं तव ॥ ३३ ॥
एवं चेज्ज्ञातिवर्गस्य श्रेयश्चापि भविष्यति ।
यदि चेद्भरतो धर्मात् पित्र्यं राज्यमवाप्स्यति ॥ ३४ ॥
स ते सुखोचितो बालो रामस्य सहजो रिपुः ।
समृद्धार्थस्य नष्टार्थो जीविष्यति कथं वशे ॥ ३५ ॥
अभिद्रुतमिवारण्ये सिंहेन गजयूथपं ।
प्रच्छाद्यमानं रामेण भरतं त्रातुमर्हसि ॥ ३६ ॥
दर्पान्निराकृता पूर्वं त्वया सौभाग्यवत्तया ।
राममाता सपत्नी ते कथं वैरं न पातयेत् ॥ ३७ ॥

Digitized by Google

यदा हि रामः पृथिवीमवाप्स्यति
ध्रुवं प्रणष्टो भरतो भविष्यति ।
अतो नु संचिन्तय राज्यमात्मजे
परस्य चैवाद्य विवासकारणं ॥ २८ ॥

इत्ययोध्याकाण्डे मन्थरावाक्यं नाम अष्टमः सर्गः
॥ ८ ॥

2 5 7
3 / 8
2 9 5

---

## CAPUT IX.

### CONSILIUM RAMAE IN EXILIUM PELLENDI.

एवमुक्ता तु कैकेयी क्रोधेन ज्वलितानना ।
दीर्घमुष्णं च निःश्वस्य मन्थरामिदमब्रवीत् ॥ १ ॥
अद्य राममितः क्षिप्रं वनं प्रस्थापयाम्यहं ।
यौवराज्येन भरतं क्षिप्रमेवाभिषेचये ॥ २ ॥
इदं त्विदानीं संपश्य केनोपायेन मन्थरे ।
भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥ ३ ॥
एवमुक्ता तु सा देव्या मन्थरा पापदर्शिनी ।
रामार्थमुपहिंसन्ती कैकेयीमिदमब्रवीत् ॥ ४ ॥

Digitized by Google

हन्तेदानीं प्रवक्ष्यामि कैकेयि श्रूयतां च मे ।
यथा ते भरतो राज्यं पुत्रः प्राप्स्यति केवलं ॥ ५ ॥
किं न स्मरसि कैकेयि स्मरन्ती वा निगूहसे ।
त्वदुच्यमानमात्मार्थं मत्तस्त्वं श्रोतुमिच्छसि ॥ ६ ॥
मयोच्यमानं यदि ते श्रोतुं छन्दो विलासिनि ।
श्रूयतामभिधास्यामि श्रुत्वा चापि विमृश्यतां ॥ ७ ॥
पुरा देवासुरे युद्धे सह राजर्षिभिः पतिः ।
अगच्छत् त्वामुपादाय देवराजस्य साह्यकृत् ॥ ८ ॥
दिशमास्थाय वै देवि दक्षिणां दण्डकान् प्रति ।
वैजयन्तमिति ख्यातं पुरं यत्र तिमिध्वजः ॥ ९ ॥
स शम्बर इति ख्यातः शतमायो महासुरः ।
ददौ शक्रस्य संग्रामं देवसंघैरनिन्दितः ॥ १० ॥
तस्मिन् महति संग्रामे पुरुषान् क्षतविक्षतान् ।
रात्रौ प्रसुप्तान् घ्नन्ति स्म तरसापास्य राक्षसाः ॥ ११ ॥
तत्राकरोन्महद्युद्धं राजा दशरथस्तदा ।
असुरैश्च महाबाहुः शस्त्रैश्च शकलीकृतः ॥ १२ ॥
अपवाह्य त्वया देवि संग्रामान्नष्टचेतनः ।
तत्रापि विक्षतः शस्त्रैः पतिस्ते रक्षितस्त्वया ॥ १३ ॥
तुष्टेन तेन दत्तौ ते द्वौ वरौ शुभदर्शने ।
स त्वयोक्तः पतिर्देवि यदेच्छेयं तदा वरौ ॥ १४ ॥

Digitized by Google

गृह्णीयामिति तत्रैव तथेत्युक्तं महात्मना ।
. . . . . . . . . ॥ १५ ॥
अनभिज्ञा ह्यहं देवि त्वयैव कथितं पुरा ।
कथैषा तव तु स्नेहान्मनसा धार्यते मया ॥ १६ ॥
तौ वरौ याच भर्तारं भरतस्याभिषेचनं ।
प्रव्राजनं च रामस्य त्वं वर्षाणि चतुर्दश ॥ १७ ॥
क्रोधागारं प्रविश्याद्य क्रुद्धेवाश्वपतेः सुते ।
शेष्वानन्तर्हितायां त्वं भूमौ मलिनवासिनी ॥ १८ ॥
मा स्मैनं प्रत्युदीक्षेथा मा चैनमभिभाषथाः ।
रुदन्ती पार्थिवं दृष्ट्वा जगत्यां शोकलालसा ॥ १९ ॥
दयिता त्वं सदा भर्तुरत्र मे नास्ति संशयः ।
त्वत्कृते हि महाराजो विशेदपि हुताशनं ॥ २० ॥
न त्वां क्रोधयितुं शक्तो न क्रुद्धां प्रत्युदीक्षितुं ।
तव प्रियार्थं राजा तु प्राणान् अपि परित्यजेत् ॥ २१ ॥
न ह्यतिक्रमितुं शक्तस्तव वाक्यं महीपतिः ।
मन्दस्वभावे बुध्यस्व सौभाग्यबलमात्मनः ॥ २२ ॥
मणिमुक्तासुवर्णानि रत्नानि विविधानि च ।
दद्याद्दशरथो राजा मा स्म तेषु मनः कृथाः ॥ २३ ॥
यौ तु देवासुरे युद्धे वरौ दशरथोऽददात् ।
तौ स्मारय महाभागे सोऽर्थो मा त्वामतिक्रमेत् ॥ २४ ॥

Digitized by Google

यदा तु ते वरं दद्यात् स्वयमुत्थाप्य राघवः ।
व्यवस्थाप्य महाराजं त्वमिमं वृणुया वरं ॥ २५ ॥
रामं प्रव्राजयारण्ये नव वर्षाणि पञ्च च ।
भरतः क्रियतां राजा पृथिव्यां पार्थिवर्षभः ॥ २६ ॥
चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनं ।
रूढश्च कृतमूलश्च शेषं स्थास्यति ते सुतः ॥ २७ ॥
प्राप्तकालं तु ते मन्ये राजानं वीतसाध्वसा ।
रामाभिषेकसंकल्पान्निगृह्य विनिवर्तय ॥ २८ ॥
अनर्थमर्थरूपेण ग्राहिता सा ततस्तया ।
हृष्टा प्रतीता कैकेयी मन्थरामिदमब्रवीत् ॥ २९ ॥
प्रज्ञां ते नावजानामि श्रेष्ठां श्रेष्ठाभिधायिनि ।
पृथिव्यामसि कुब्जानामुत्तमा बुद्धिनिश्चये ॥ ३० ॥
त्वमेव हि ममार्थेषु नित्ययुक्ता हितैषिणी ।
नाहं समवबुध्येय कुब्जे राज्ञः चिकीर्षितं ॥ ३१ ॥
सन्ति दुःसंस्थिताः कुब्जा वक्रा परमपापिकाः ।
त्वं पद्ममिव वातेन संनता प्रियदर्शना ॥ ३२ ॥
उरस्तेऽभिनिविष्टं वै यावत् स्कन्धात् समुन्नतं ।
अधस्ताच्चोदरं शान्तं सुनाभमिव लज्जितं ॥ ३३ ॥
परिपूर्णं च जघनं सुपीनौ च पयोधरौ ।
विमलेन्दुसमं वक्त्रमहो राजसि मन्थरे ॥ ३४ ॥

Digitized by Google

जघनं तव निर्मृष्टं रसनादामभूषितं ।
जङ्घे भृशमुपन्यस्ते पादौ च व्यायतावुभौ ॥ ३५ ॥
त्वमायताभ्यां सक्थिभ्यां मन्थरे क्षौमवासिनी ।
अग्रतो मम गच्छन्ती टिट्टिभीव विराजसे ॥ ३६ ॥
आसन् या शम्बरे मायाः सहस्रमसुराधिपे ।
हृदये ते निविष्टास्ते भूयश्चान्याः सहस्रशः ॥ ३७ ॥
यच्चेदं ककुदाकारं कुब्जं चारु शुभानने ।
मतयः क्षत्रविद्याश्च मायाश्चात्र वसन्ति ते ॥ ३८ ॥
अत्र तेऽहं प्रमोक्ष्यामि मालां कुब्जे हिरण्मयीं ।
अभिषिक्ते च भरते राघवे च वनं गते ॥ ३९ ॥
जात्येन च सुवर्णेन सुनिष्टप्तेन सुन्दरि ।
लब्धार्था च प्रतीता च लेपयिष्यामि ते स्थगु ॥ ४० ॥
मुखे च तिलकं चित्रं जातरूपमयं शुभं ।
कारयिष्यामि ते कुब्जे शुभान्याभरणानि च ॥ ४१ ॥
परिधाय शुभे वस्त्रे देवतेव चरिष्यसि ।
चन्द्रमाह्वयमानेन मुखेनाप्रतिमानना ॥ ४२ ॥
यावदग्रनखं लिप्ता चन्दनेन सुगन्धिना ।
गमिष्यसि गतिं मुख्यां गर्वयन्ती द्विषज्जनं ॥ ४३ ॥
इति प्रशस्यमाना सा कैकेयीमिदमब्रवीत् ।
शयानां शयने शुभ्रे वेद्यामग्निशिखामिव ॥ ४४ ॥

Digitized by Google

गतोदके सेतुबन्धो न कल्याणि विधीयते ।
उत्तिष्ठ कुरु कल्याणं राजानमनुदर्शय ॥ ४५ ॥
तथा प्रोत्साहिता देवी गत्वा मन्थरया सह ।
क्रोधागारं विशालाक्षी सौभाग्यमदगर्विता ॥ ४६ ॥
अनेकशतसाहस्रं मुक्ताहारं वराङ्गना ।
अवमुच्य वरार्हाणि शुभान्याभरणानि च ॥ ४७ ॥
ततो हेमोपमा तत्र कुब्जावाक्यवशं गता ।
संविश्य भूमौ कैकेयी मन्थरामिदमब्रवीत् ॥ ४८ ॥
इह वा मां मृतां कुब्जे नृपायावेदयिष्यसि ।
वनं वा राघवे प्राप्ते भरतः प्राप्स्यति क्षितिं ॥ ४९ ॥
न सुवर्णेन मे ह्यर्थो न रत्नैर्न च भोजनैः ।
एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ ५० ॥

तथातिविद्धा महिषी तु कुब्जया
समाहता वागिषुभिर्मुहुर्मुहुः ।
विधाय हस्तौ हृदयेऽतिविस्मिता
शशंस कुब्जां कुपिता पुनः पुनः ॥ ५१ ॥
यमस्य वा मां विषयं गतामितो
निशम्य कुब्जे प्रतिवेदयिष्यसि ।
वनं गते वा सुचिराय राघवे
समृद्धकामो भरतो भविष्यति ॥ ५२ ॥

Digitized by Google

अहं हि नैवास्तरणानि न स्रजो
न चन्दनं नाञ्जनपानभोजनं ।
न किंचिदिच्छामि न चेह जीवितं
न चेदितो गच्छति राघवो वनं ॥ ५३ ॥
अथैवमुक्त्वा वचनं सुदारुणं
निधाय सर्वाभरणानि भामिनी ।
असंवृतामास्तरणेन मेदिनीं
तदाधिशिश्ये पतितेव किंनरी ॥ ५४ ॥
उदीर्णसंरम्भतमोवृतानना
तथा विमुक्तोत्तममाल्यभूषणा ।
नरेन्द्रपत्नी विमला बभूव सा
तमोवृता द्यौरिव मग्नतारका ॥ ५५ ॥

इत्ययोध्याकाण्डे रामप्रवासनचिन्ता नाम नवमः सर्गः
॥ ९ ॥

2 0 5
5 5
3 5 5

Digitized by Google

## CAPUT X.

### Dasarathae sermo.

[ * विदर्शिता यदा देवी कुब्जया पापया भृशं ।
* तदा शेते स्म सा भूमौ दिग्धविद्धेव कुञ्जरी ॥ १ ॥
* निश्चित्य मनसा कृत्यं सा सम्यगिति भामिनी ।
* मन्थरायै शनैः सर्वमाचचक्षे विचक्षणा ॥ २ ॥
* सा दीना निश्चयं कृत्वा मन्थरावाक्यमोहिता ।
* मुहूर्तं चिन्तयामास मार्गमात्मसुखावहं ॥ ३ ॥
* सा सुहृच्चार्थकामा च तं निशम्य विनिश्चयं ।
* बभूव परमप्रीता सिद्धिं प्राप्येव मन्थरा ॥ ४ ॥
* अथ सा रुषिता देवी सम्यक् कृत्वा विनिश्चयं ।
* संविवेशाबला भूमौ निवेश्य भ्रूकुटिं मुखे ॥ ५ ॥
* ततश्चित्राणि माल्यानि दिव्यान्याभरणानि च ।
* अपविद्धानि कैकेय्या तानि भूमिं प्रपेदिरे ॥ ६ ॥
* तया तान्यपविद्धानि माल्यान्याभरणानि च ।
* अशोभयन्त वसुधां नक्षत्राणि यथा नभः ॥ ७ ॥
* क्रोधागारे च पतिता सा बभौ मलिनाम्बरा ।
* एकवेणीं दृढं बद्ध्वा गतसत्त्वेव किंनरी ॥ ८ ॥ ]
आज्ञाप्य तु महाराजो राघवस्याभिषेचनं ।
उपस्थानमनुज्ञाप्य प्रविवेश निवेशनं ॥ ९ ॥

अथ रामाभिषेको वै प्रसिद्ध इति जज्ञिवान् ।
प्रियार्हां प्रियमाख्यातुं विवेशान्तःपुरं वशी ॥ १० ॥
स कैकेय्या गृहं श्रेष्ठं प्रविवेश महायशाः ।
पाण्डुराभ्रमिवाकाशं राहुयुक्तो निशाकरः ॥ ११ ॥
शुकबर्हिसमायुक्तं क्रौञ्चहंसरुतायुतं ।
वादित्ररवसंघुष्टं कुब्जावामनिकायुतं ॥ १२ ॥
लतागृहैश्चित्रगृहैश्चम्पकाशोकशोभितैः ।
दान्तराजतसौवर्णवेदिकाभिः समायुतं ॥ १३ ॥
नित्यपुष्पफलैर्वृक्षैर्वापीभिश्चोपशोभितं ।
दान्तराजतसौवर्णैः संवृतं परमासनैः ॥ १४ ॥
विविधैरन्नपानैश्च भक्ष्यैश्च विविधैरपि ।
उपपन्नं महार्हैश्च भूषणैस्त्रिदिवोपमं ॥ १५ ॥
तत् प्रविश्य महाराजः स्वमन्तःपुरमृद्धिमत् ।
न ददर्श प्रियां राजा कैकेयीं शयनोत्तमे ॥ १६ ॥
स कामबलसंयुक्तो रत्यर्थी मनुजाधिपः ।
अपश्यन् दयितां भार्यां पप्रच्छ विषसाद च ॥ १७ ॥
न हि तस्य पुरा देवी तां वेलामत्यवर्तत ।
न च राजा गृहं शून्यं प्रविवेश कदाचन ॥ १८ ॥
ततो गृहगतो राजा कैकेयीं पर्यपृच्छत ।
यथापुरमविज्ञाय स्वार्थलिप्सुमपण्डितां ॥ १९ ॥

Digitized by Google

प्रतीहारी त्वथोवाच संत्रस्ता तु कृताञ्जलिः ।
देव देवी भृशं क्रुद्धा क्रोधागारमभिद्रुता ॥ २० ॥
प्रतीहार्या वचः श्रुत्वा राजा परमदुर्मनाः ।
विषसाद पुनर्भूयो लुलितव्याकुलेन्द्रियः ॥ २१ ॥
तत्र तां पतितां भूमौ शयानामतथोचितां ।
प्रतप्त इव दुःखेन सोऽपश्यज्जगतीपतिः ॥ २२ ॥
स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीं ।
अपापः पापसंकल्पां ददर्श धरणीतले ॥ २३ ॥
लतामिव विनिष्कृत्तां पतितां देवतामिव ।
किंनरीमिव निर्धूतां च्युतामप्सरसं यथा ॥ २४ ॥
करेणुमिव दिग्धेन विद्धां मृगयुणा वने ।
महागज इवासाद्य स्नेहात् परिममर्श तां ॥ २५ ॥
परिमृश्य च पाणिभ्यामभिसंत्रस्तचेतनः ।
कामी कमलपत्राक्षीमुवाच वनितामिदं ॥ २६ ॥
न तेऽहमभिजानामि क्रोधमात्मनि संश्रितं ।
देवि केनाभियुक्तासि केन वासि विमानिता ॥ २७ ॥
यदिदं मम दुःखाय शेषे कल्याणि पांसुषु ।
भूतोपहतचित्तेव मम चित्तप्रमाथिनि ॥ २८ ॥
सन्ति मे कुशला वैद्याः सुविभक्ताश्च वृत्तिभिः ।
सुखितां त्वां करिष्यन्ति व्याधिमाचक्ष्व भामिनि ॥ २९ ॥

Digitized by Google

कः प्रियं लभतामद्य को वा सुमहदप्रियं ।
मा रौत्सीर्मा च कार्षीस्त्वं देवि संपरिशोषणं ॥ ३० ॥
अबध्यो बध्यतां को वा बध्यः को वा विमुच्यतां ।
दरिद्रःको भवेदाढ्यो द्रव्यवान् कोऽप्यकिंचनः ॥ ३१ ॥
अहं चैव मदीयाश्च सर्वे तव वशानुगाः ।
न ते कंचिदभिप्रायं व्याहन्तुमहमुत्सहे ॥ ३२ ॥
आत्मनो जीवितेनापि ब्रूहि यन्मनसि स्थितं ।
बलमात्मनि जानन्ती न मां शङ्कितुमर्हसि ॥ ३३ ॥
करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ।
यावदावर्तते चक्रं तावती मे वसुंधरा ॥ ३४ ॥
* प्राचीनाः सिन्धुसौवीराः सौराष्ट्रा दक्षिणापथाः ।
* वङ्गाङ्गमगधा मत्स्याः समृद्धकाशिकोशलाः ॥ ३५ ॥
तत्र जातं बहु द्रव्यं धनधान्यमजाविकं ।
ततो वृणीष्व कैकेयि यद्यत् त्वं मनसेच्छसि ॥ ३६ ॥
तत् त्वं मे ब्रूहि कैकेयि यतस्ते भयमागतं ।
तत् ते व्यपनयिष्यामि नीहारमिव रश्मिवान् ॥ ३७ ॥
तथोक्ता सा समाश्वस्ता वक्तुकामा तदप्रियं ।
परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥ ३८ ॥

इत्ययोध्याकाण्डे दशरथवाक्यं नाम दशमः सर्गः ॥ १० ॥

Digitized by Google

## CAPUT XI.

### BENEFICIORUM PROMISSORUM PETITIO.

तं मन्मथशरैर्विद्धं कामवेगवशानुगं ।
उवाच पृथिवीपालं कैकेयी दारुणं वचः ॥ १ ॥
नास्मि विप्रकृता देव केनचिन्नावमानिता ।
अभिप्रायस्तु मे कश्चित् तमिच्छामि त्वया कृतं ॥ २ ॥
प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि ।
अथ तद्व्याहरिष्यामि यदभिप्रार्थितं मया ॥ ३ ॥
वाङ्मात्रेण तदा राजा कैकेय्या स्ववशे कृतः ।
प्रचस्कन्द विनाशाय पाशं मृग इवात्मनः ॥ ४ ॥
तामुवाच महाराजः कैकेयीमीषदुत्स्मयः ।
कामी हस्तेन संगृह्य मूर्धजेषु भुवि स्थितां ॥ ५ ॥
अवलिप्ते न जानासि त्वत्तः प्रियतरो मम ।
मनुजो मनुजव्याघ्राद्रामादन्यो न विद्यते ॥ ६ ॥
तेनाजय्येन मुख्येन राघवेण महात्मना ।
शपे ते जीवनार्हेण ब्रूहि यन्मनसेच्छसि ॥ ७ ॥
यं मुहूर्तमपश्यंस्तु न जीवेयमहं ध्रुवं ।
तेन रामेण कैकेयि शपे ते वचनक्रियां ॥ ८ ॥

Digitized by Google

भद्रे हृदयमप्येतदनुमृश्योद्धरस्व मे ।
एतत् समीक्ष्य कैकेयि ब्रूहि यत् साधु मन्यसे ॥ ९ ॥
बलमात्मनि पश्यन्ती न विशङ्कितुमर्हसि ।
करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥ १० ॥
सा तदर्थमना देवी तमभिप्रायमागतं ।
निर्माध्यस्थ्याच्च हर्षाच्च बभाषे दुर्वचं वचः ॥ ११ ॥
यथा क्रमेण शपसे वरं मम ददासि च ।
तच्छृण्वन्तु त्रयस्त्रिंशद्देवाः सेन्द्रपुरोगमाः ॥ १२ ॥
चन्द्रादित्यौ नभश्चैव ग्रहा रात्र्यहनी दिशः ।
जगच्च पृथिवी चेयं सगन्धर्वा सराक्षसा ॥ १३ ॥
निशाचराणि भूतानि गृहेषु गृहदेवताः ।
यानि चान्यानि भूतानि जानीयुर्भाषितं तव ॥ १४ ॥
सत्यसंधो महातेजा धर्मज्ञः सुसमाहितः ।
वरं मम ददात्येष तन्मे शृण्वन्तु देवताः ॥ १५ ॥
इति देवी महेष्वासं परिगृह्याभिशस्य च ।
ततः परमुवाचेदं वरदं काममोहितं ॥ १६ ॥
स्मर राजन् पुरावृत्तं तस्मिन् देवासुरे रणे ।
तत्र चाच्यावयच्छत्रुस्तव जीवितमन्तरा ॥ १७ ॥
तत्र चापि मया देव यत् त्वं समभिरक्षितः ।
जाग्रत्या यतमानायास्ततो मे प्राददा वरौ ॥ १८ ॥

Digitized by Google

तौ दत्तौ च वरौ देव निक्षेपौ मृगयाम्यहं ।
तवैव पृथिवीपाल सकाशे सत्यसंगर ॥ १९ ॥
तत् प्रतिश्रुत्य धर्मेण न चेद्दास्यसि मे वरौ ।
अद्यैव हि प्रहास्यामि जीवितं त्वद्विमानिता ॥ २० ॥
यो ऽभिषेकसमारम्भो राघवस्योपकल्पितः ।
अनेनैवाभिषेकेन भरतो मे ऽभिषिच्यतां ॥ २१ ॥
यो द्वितीयो वरो देव दत्तः प्रीतेन मे त्वया ।
तदा देवासुरे युद्धे तस्य कालो ऽयमागतः ॥ २२ ॥
नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ।
चीराजिनजटाधारो रामो भवतु तापसः ॥ २३ ॥
भरतो भजतामद्य यौवराज्यमकण्टकं ।
अद्य चैव हि पश्येयं प्रयान्तं राघवं वने ॥ २४ ॥

इत्ययोध्याकाण्डे वराभियाचनं नामैकादशः सर्गः ॥ ११ ॥

388
24
412

Digitized by Google

## CAPUT XII.

### DASARATHAE LAMENTATIO.

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः ।
चिन्तामभिसमापेदे मुहूर्तं प्रतताप च ॥ १ ॥
किंनु मे यदिवा स्वप्नश्चित्तमोहोऽपि वा मम ।
अनुभूतोपसर्गो वा मानसो वाप्युपद्रवः ॥ २ ॥
इति संचिन्त्य तद्राजा नाध्यगच्छत् तदा सुखं ।
व्यथितो विक्लवश्चैव व्याघ्रीं दृष्ट्वा यथा मृगः ॥ ३ ॥
असंवृतायामासीनो जगत्यां दीर्घमुच्छ्वसन् ।
मण्डले पन्नगो रुद्धो मन्त्रैरिव महाविषः ॥ ४ ॥
अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः ।
मोहमापेदिवान् भूयः शोकोपहतचेतनः ॥ ५ ॥
चिरेण तु नृपः संज्ञां प्रतिलभ्य सुदुःखितः ।
कैकेयीमब्रवीत् क्रुद्धो निर्दहन्निव चक्षुषा ॥ ६ ॥
नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ।
किं कृतं तव रामेण पापे पापं मयापि वा ॥ ७ ॥
सदा ते जननीतुल्यां वृत्तिं वहति राघवः ।
तस्यैव त्वमनर्थाय किंनिमित्तमिहोद्यता ॥ ८ ॥

Digitized by Google

त्वं मयात्मविनाशार्थं भवनं स्वं निवेशिता ।
अविज्ञानान्नृपसुता व्याली तीक्ष्णविषा यथा ॥ ९ ॥
जीवलोको यदा सर्वो रामस्याह गुणास्तवं ।
अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतं ॥ १० ॥
कौशल्यां वा सुमित्रां वा त्यजेयमपि वा श्रियं ।
जीवितं वात्मनो रामं न त्वेव पितृवत्सलं ॥ ११ ॥
परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजं ।
अपश्यतस्तु मे रामं नष्टं भवति चेतनं ॥ १२ ॥
तिष्ठेल्लोको विना सूर्यं शस्यं वा सलिलं विना ।
न तु रामं विना देहे तिष्ठेद्धि मम जीवनं ॥ १३ ॥
तदलं त्यज्यतामेष निश्चयः पापनिश्चये ।
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥ १४ ॥
किमिदं चिन्तितं पापे त्वया परमदारुणं ।
अथ जिज्ञाससे मां त्वं भरतस्य प्रियाप्रिये ॥ १५ ॥
अस्तु यत् तत् त्वया पूर्वं व्याहृतं राघवं प्रति ।
तत् त्वया प्रियवादिन्या सेवार्थं कथितं भवेत् ॥ १६ ॥
तच्छ्रुत्वा शोकसंतप्ता संतापयसि मां भृशं ।
आविष्टासि गृहं शून्यं सा त्वं परवशं गता ॥ १७ ॥
इक्ष्वाकूणां कुले देवि संप्राप्तः सुमहान् अयं ।
अनयो नयसंपन्ने यत्र ते विकृता मतिः ॥ १८ ॥

Digitized by Google

न हि किंचिदयुक्तं वा विप्रियं वा पुरा मम ।
अकरोस्त्वं विशालाक्षि तेन न श्रद्दधाम्यहं ॥ १९ ॥
ननु ते राघवस्तुल्यो भरतेन महात्मना ।
बहुशो हि स्म बाल्ये त्वं कथाः कथयसे मम ॥ २० ॥
तस्य धर्मात्मनो देवि वने वासं यशस्विनः ।
कथं रोचयसे भीरु नव वर्षाणि पञ्च च ॥ २१ ॥
रामो हि भरताद्भूयस्तव शुश्रूषते सदा ।
विशेषं त्वयि तस्मात् तु भरतस्य न लक्षये ॥ २२ ॥
शुश्रूषां गौरवं चैव प्रमाणं वचनक्रियां ।
कस्ते भूयस्तरं कुर्यादन्यत्र पुरुषर्षभात् ॥ २३ ॥
बहूनां स्त्रीसहस्राणां बहूनां चोपजीविनां ।
परिवादोऽपवादो वा राघवे नोपपद्यते ॥ २४ ॥
सान्त्वयन् सर्वभूतानि रामः शुद्धेन चेतसा ।
गृह्णाति मनुजव्याघ्रः प्रियैर्विषयवासिनः ॥ २५ ॥
सत्येन लोकान् जयति दीनान् दानेन राघवः ।
गुरून् शुश्रूषया वीरो धनुषा युधि शात्रवान् ॥ २६ ॥
सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवं ।
विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे ॥ २७ ॥
तस्मिन्नार्जवसंपन्ने देवि देवोपमे कथं ।
पापमाशंससे रामे महर्षिसमतेजसि ॥ २८ ॥

Digitized by Google

न स्मराम्यप्रियं वाक्यं लोकस्य प्रियवादिनः ।
स कथं त्वत्कृते रामं वक्ष्यामि प्रियमप्रियं ॥ २९ ॥
क्षमा यस्मिन् दमस्त्यागः सत्यं धर्मः कृतज्ञता ।
अविहिंसा च भूतानां तमृते का गतिर्मम ॥ ३० ॥
मम वृद्धस्य कैकेयि गतान्तस्य तपस्विनः ।
दीनं लालप्यमानस्य कारुण्यं कर्तुमर्हसि ॥ ३१ ॥
पृथिव्यां सागरान्तायां यत् किंचिदधिगम्यते ।
तत् सर्वं तव दास्यामि मा च त्वं मृत्युमाविश ॥ ३२ ॥
अञ्जलिं कुर्मि कैकेयि पादौ चापि स्पृशामि ते ।
शरणं भव रामस्य माधर्मो मामिह स्पृशेत् ॥ ३३ ॥
इति दुःखाभिसंतप्तं विलपन्तमचेतनं ।
घूर्णमानं महाराजं शोकेन समभिप्लुतं ॥ ३४ ॥
पारं शोकार्णवस्याशु प्रार्थयन्तं पुनः पुनः ।
प्रत्युवाचाथ कैकेयी रौद्रा रौद्रतरं वचः ॥ ३५ ॥
यदि दत्वा वरौ राजन् पुनः प्रत्यनुतप्यसे ।
धार्मिकत्वं कथं वीर पृथिव्यां कथयिष्यसि ॥ ३६ ॥
यदा समेता बहवस्त्वया राजर्षयः सह ।
कथयिष्यन्ति धर्मज्ञ तत्र किं प्रतिवक्ष्यसि ॥ ३७ ॥
यस्याः प्रयत्ने जीवामि या च मामभ्यपालयत् ।
तस्याः कृतं मया मिथ्या कैकेय्या इति वक्ष्यसि ॥ ३८ ॥

Digitized by Google

किल्बिषत्वं नरेन्द्राणां करिष्यसि नराधिप ।
यो दत्त्वा वरमद्यैव पुनरन्यानि भाषसे ॥ ३९ ॥
शैब्यः श्येनकपोतीये स्वमांसं पक्षिणे ददौ ।
अलर्कश्चक्षुषी दत्त्वा जगाम गतिमुत्तमां ॥ ४० ॥
सागरः समयं कृत्वा न वेलामतिवर्त्तते ।
समयं मानृतं कार्षीः पूर्ववृत्तमनुस्मरन् ॥ ४१ ॥
सत्यधर्मं परित्यज्य रामं राज्येऽभिषिच्य च ।
सह कौशल्यया नित्यं रन्तुमिच्छसि दुर्मते ॥ ४२ ॥
भवत्वधर्मो धर्मो वा सत्यं वा यदिवानृतं ।
यत् त्वया संश्रुतं मह्यं तस्य नास्ति व्यतिक्रमः ॥ ४३ ॥
अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः ।
पश्यतस्ते मरिष्यामि रामो यद्यभिषिच्यते ॥ ४४ ॥
एकाहमपि पश्येयं यद्यहं राममातरं ।
अञ्जलिं प्रतिगृह्णन्तीं श्रेयो ननु मृतिर्मम ॥ ४५ ॥
भरतेनात्मना चाहं शपे ते मनुजाधिप ।
यथा नान्येन तुष्येयमृते रामविवासनात् ॥ ४६ ॥
एतावदुक्त्वा वचनं कैकेयी विरराम ह ।
श्रुत्वा तु राजा कैकेय्या वाक्यं परमशोभनं ॥ ४७ ॥
नाभ्यभाषत कैकेयीं मुहूर्तं व्याकुलेन्द्रियः ।
प्रेक्षतानिमिषो देवीं प्रियामप्रियवादिनीं ॥ ४८ ॥

Digitized by Google

स देव्या व्यवसायं च घोरं च शपथं कृतं ।
ध्यात्वा रामेति निःश्वस्य छिन्नस्तरुरिवापतत् ॥ ४९ ॥
नष्टचित्तो यथोन्मत्तो विपरीतो यथातुरः ।
हृततेजा यथा सर्पो बभूव जगतीपतिः ॥ ५० ॥
दीर्घमुष्णं च निःश्वस्य राजा परमदुर्मनाः ।
दीनयातुरया वाचा इति होवाच कैकयीं ॥ ५१ ॥
अनर्थमिममर्थाभं केन त्वमुपदेशिता ।
भूतोपहतचित्तेव ब्रुवन्ती मां न लज्जसे ॥ ५२ ॥
शीलव्यसनमेतत् ते नाभिजानाम्यहं पुरा ।
बालायास्तत् त्विदानीं ते लक्षये विपरीतवत् ॥ ५३ ॥
कुतो वा ते भयं जातं या त्वमेवंविधं वरं ।
राष्ट्रे भरतमासीनं वृणीषे राघवं वने ॥ ५४ ॥
विरमैतेन भावेन त्वमेतेनानृतेन च ।
यदि भर्तुः प्रियं कार्यं लोकस्य भरतस्य च ॥ ५५ ॥
नृशंसे पापसंकल्पे क्षुद्रे दुष्कृतकारिणि ।
किंनु दुःखमलीकं वा मयि रामे च पश्यसि ॥ ५६ ॥
न कथंचिदृते रामाद्भरतो राज्यमावसेत् ।
रामादपि हि तं मन्ये धर्मतो बलवत्तरं ॥ ५७ ॥
कथं द्रक्ष्यामि रामस्य वनं गच्छेति भाषिते ।
मुखवर्णं विवर्णं तं यथैवेन्दुमुपप्लुतं ॥ ५८ ॥

Digitized by Google

तां तु मे सुकृतां बुद्धिं सुहृद्भिः सह निश्चितां ।
कथं द्रक्ष्याम्यपावृत्तां परैरिव हतां चमूं ॥ ५९ ॥
किं मां वक्ष्यन्ति राजानो नानादिग्भ्यः समागताः ।
बालो वतायमैक्ष्वाकुश्चिरं राज्यमकारयत् ॥ ६० ॥
यदा हि बहवो वृद्धा गुणवन्तो बहुश्रुताः ।
परिप्रक्ष्यन्ति काकुत्स्थं वक्ष्यामि किमहं तदा ॥ ६१ ॥
कैकेय्या क्लिश्यमानेन रामः प्रव्राजितो मया ।
यदि सत्यं ब्रवीम्येतत् तदसत्यं भविष्यति ॥ ६२ ॥
किं मां वक्ष्यति कौशल्या राघवे वनमास्थिते ।
किं चैनां प्रतिवक्ष्यामि कृत्वा विप्रियमीदृशं ॥ ६३ ॥
यदा यदा च कौशल्या दासीवच्च सखीव च ।
भार्यावद्भगिनीवच्च मातृवच्चोपतिष्ठति ॥ ६४ ॥
सततं प्रियकामा मे प्रियपुत्रा प्रियंवदा ।
न मया सत्कृता देवी सत्कृतार्हा कृते तव ॥ ६५ ॥
इदानीं तत् तपति मां यन्मया सत्कृतं त्वयि ।
अपथ्यं व्यञ्जनोपेतं भुक्तमन्नमिवातुरं ॥ ६६ ॥
विप्रकारं च रामस्य संप्रयाणं वनस्य च ।
सुमित्रा प्रेक्ष्य वै भीता कथं मे विश्वसिष्यति ॥ ६७ ॥
कृपणां वत वैदेही श्रोष्यति द्वयमप्रियं ।
मां च पञ्चत्वमापन्नं रामं च वनमाश्रितं ॥ ६८ ॥

Digitized by Google

वैदेही बत मे प्राणान् शोचन्ती ज्ञपयिष्यति ।
हीना हिमवतः पार्श्वे किंनरेणेव किंनरी ॥ ६९ ॥
न हि राममहं दृष्ट्वा प्रवसन्तं महावने ।
चिरं जीवितुमाशंसे रुदन्तीं चापि मैथिलीं ॥ ७० ॥
सतीं त्वामहमत्यन्तं व्यवस्याम्यसतीं सतीं ।
रूपिणीं विषसंयुक्तां पीत्वेव मदिरां नरः ॥ ७१ ॥
अनृतैर्बत मां सान्त्वैः सान्त्वयन्ती स्म भाषसे ।
गीतशब्देन संरुध्य लुब्धो मृगमिवाबधीः ॥ ७२ ॥
अनार्य इति मामार्याः पुत्रविक्रायिकं ध्रुवं ।
विकरिष्यन्ति रथ्यासु सुरापं ब्राह्मणं यथा ॥ ७३ ॥
अहो मम महत् कृच्छ्रं यत्र वाचः क्षमे तव ।
दुःखमेवंविधं प्राप्तं पुराकृतमिवाशुभं ॥ ७४ ॥
चिरं खलु मया पापे त्वं पापेनाभिरक्षिता ।
अज्ञानादुपसंपन्ना रज्जुरुद्बन्धनी यथा ॥ ७५ ॥
रममाणस्त्वया सार्धं मृत्युं त्वां नाभिलक्षये ।
बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशं ॥ ७६ ॥
तं तु मां जीवलोकोऽयं नूनमाक्रोष्टुमर्हति ।
मया ह्यपितृकः पुत्रः स महात्मा दुरात्मना ॥ ७७ ॥
बालिशो बत कामात्मा राजा दशरथो भृशं ।
स्त्रीकृते यः प्रियं पुत्रं वनं प्रस्थापयिष्यति ॥ ७८ ॥

Digitized by Google

व्रतैश्च ब्रह्मचर्यैश्च गुरुभिश्चोपकर्षितः ।
भोगकाले महत्कृच्छ्रं पुनरेव प्रपत्स्यते ॥ ७९ ॥
नालं द्वितीयं वचनं पुत्रो मां प्रतिभाषितुं ।
स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति ॥ ८० ॥
यदि मे राघवः कुर्याद्वनं गच्छेति चोदितः ।
प्रतिकूलं प्रियं मे स्यान्न तु वत्सः करिष्यति ॥ ८१ ॥
राघवे हि वनं प्राप्ते सर्वलोकस्य धिक्कृतं ।
मृत्युरक्षमणीयं मां नयिष्यति यमक्षयं ॥ ८२ ॥
मृते मयि गते रामे वनं मनुजपुंगवे ।
इष्टे मम जने शेषे किं पापं प्रतिपत्स्यसे ॥ ८३ ॥
कौशल्या मां च रामं च पुत्रं च यदि हास्यति ।
दुःखान्यसहती देवी मामेवानुमरिष्यति ॥ ८४ ॥
कौशल्यां च सुमित्रां च मां च पुत्रैस्त्रिभिः सह ।
प्रक्षिप्य नरके सा त्वं कैकेयि सुखिता भव ॥ ८५ ॥
मया रामेण च त्यक्तं शाश्वतं सत्कृतं गुणैः ।
इक्ष्वाकुकुलमक्षोभ्यमाकुलं पालयिष्यसि ॥ ८६ ॥
प्रियं चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् ।
मा स्म मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः ॥ ८७ ॥
हन्तानार्ये ममामित्रे सकामा भव कैकयि ।
सेदानीं विधवा राज्यं सपुत्रा कारयिष्यसि ॥ ८८ ॥

Digitized by Google

कालरात्रिर्हि मे नूनं भार्यात्रूपतिरस्कृता ।
त्वं राजपुत्रि दैवेन न्यवसो मम वेश्मनि ॥ ८९ ॥
अकीर्त्तिश्चातुला लोके ध्रुवः परिभवश्च मे ।
सर्वभूतेषु चावज्ञा यथा पापकृतस्तथा ॥ १० ॥
कथं रथैर्विभुर्यात्वा गजाश्वैश्च मुहुर्मुहुः ।
पद्भ्यां रामो महारण्ये वत्सो मे विचरिष्यति ॥ ११ ॥
यस्य चाहारसमये सूदाः कुण्डलधारिणः ।
अहंपूर्वाः पचन्ति स्म प्रशस्तमन्नभोजनं ॥ १२ ॥
स कथंनु कषायाणि तिक्तानि कटुकानि च ।
भक्षयन् वन्यमाहारं सुतो मे वर्तयिष्यति ॥ १३ ॥
महार्हवस्त्रसंवीतो भूत्वा चिरसुखोचितः ।
काषायपरिधानस्तु कथं भूमौ निवत्स्यति ॥ १४ ॥
कस्यैतद्दारुणं वाक्यमेवंविधमचिन्तितं ।
रामस्यारण्यगमनं भरतस्याभिषेचनं ॥ १५ ॥
धिगस्तु योषितो नाम शठाः स्वार्थपरायणाः ।
न ब्रवीमि स्त्रियः सर्वा भरतस्यैव मातरं ॥ १६ ॥
अनर्थभावेऽर्थपरे नृशंसे
ममानुतापाय निवेशितासि ।
किमप्रियं पश्यसि मन्निमित्तं
हितानुकारिण्यथ वापि रामे ॥ १७ ॥

परित्यजेयुः पितरोऽपि पुत्रान्
भार्याः पतींश्चापि कृतानुरागाः ।
कृत्स्नं हि सर्वं कुपितं जगत् स्याद्-
दृष्ट्वैव रामं व्यसने निमग्नं ॥ ९८ ॥

अहं पुनर्देवकुमाररूपं
अलंकृतं तं सुतमाव्रजन्तं ।
नन्दामि पश्यन्निव दर्शनेन
भवामि दृष्ट्वैव पुनर्युवेव ॥ ९९ ॥

विना हि सूर्येण भवेत् प्रवृत्तिर्-
अवर्षता वज्रधरेण वापि ।
रामं तु गच्छन्तमितः समीक्ष्य
जीवेन्न कश्चित् विति चेतना मे ॥ १०० ॥

विनाशकामामहितामभित्रां
आवासयं मृत्युमिवात्मनस्त्वां ।
चिरं वताङ्केन धृतासि सर्पी
महाविषा तेन हतोऽस्मि मोहात् ॥ १०१ ॥

मया च रामेण सलक्ष्मणेन च
प्रशास्तु हीनो भरतस्त्वया सह ।
पुरं च राष्ट्रं च निहत्य बान्धवान्
ममाहितानां च भवाभिभाषिणी ॥ १०२ ॥

Digitized by Google

नृशंसवृत्ते व्यसनप्रहारिणि
प्रसह्य वाक्यं यदिहाद्य भाषसे ।
न नाम ते केन मुखात् पतन्त्यधो
विशीर्यमाणा दशनाः सहस्रधा ॥ १०३ ॥
न किंचिदाहाहितमप्रियं वचो
न वेत्ति रामः परुषाणि भाषितुं ।
कथंनु रामे ह्यभिरामवादिनि
ब्रवीषि दोषान् गुणनित्यसंमते ॥ १०४ ॥
प्रताम्य वा प्रज्वल वा प्रणश्य वा
सहस्रशो वा स्फुटितां महीं व्रज ।
न ते करिष्यामि वचः सुदारुणं
ममाहितं केकयराजपांशने ॥ १०५ ॥
क्षुरोपमां नित्यमसत्प्रियंवदां
प्रदुष्टभावां स्वकुलोपघातिनीं ।
न जीवितुं त्वां विषहेऽमनोरमां
दिधक्षमाणां हृदयं सबन्धनं ॥ १०६ ॥
न जीवितं मेऽस्ति कुतः पुनः सुखं
विनात्मजेनात्मवता कुतो रतिः ।
ममाहितं देवि न कर्तुमर्हसि
स्पृशामि पादावपि ते प्रसीद मे ॥ १०७ ॥

Digitized by Google

स भूमिपालो विलपन्ननाथवत्
स्त्रिया गृहीतो हृदये ऽतिमात्रया ।
पपात देव्याश्चरणौ प्रसारिताव्
उभावसंप्राप्य यथातुरस्तथा ॥ १०८ ॥

इत्ययोध्याकाण्डे दशरथविलापो नाम द्वादशः सर्गः
॥ १२ ॥

412
108
520

## CAPUT XIII.

### DASARATHAS ANIMO PERTURBATUS.

अतदर्हं महाराजं शयानमतथोचितं ।
ययातिमिव पुण्यान्ते देवलोकात् परिच्युतं ॥ १ ॥
अनर्थरूपसिद्धार्था ह्यभीता भयदर्शिनी ।
पुनराकारयामास तमेव वरमङ्गना ॥ २ ॥
त्वं कत्थसे महाराज सत्यवादी दृढव्रतः ।
मम चेमं वरं कस्माद्विधारयितुमिच्छसि ॥ ३ ॥
एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा ।
प्रत्युवाच ततः क्रुद्धो मुहूर्तं विह्वलन्निव ॥ ४ ॥

Digitized by Google

अपुत्रेण मया पुत्रः श्रमेण महता महान् ।
रामो लब्धो महाबाहुः स कथं त्यज्यते मया ॥ ५ ॥
शूरश्च कृतविद्यश्च जितक्रोधः क्षमापरः ।
कथं कमलपत्राक्षो मया रामो विवास्यते ॥ ६ ॥
स्वर्गेऽपि खलु रामस्य कुशलं दैवतैरहं ।
प्रत्यादेशादभिहितं धारयिष्ये कथंचन ॥ ७ ॥
यदि दुःखमकृत्वा तु मम संक्रमणं भवेत् ।
अदुःखार्हस्य रामस्य ततः सुखमवाप्नुयां ॥ ८ ॥
तथा विलपतस्तस्य परिभ्रमितचेतसः ।
अस्तमभ्यागतः सूर्यो रजनी चाभ्यवर्तत ॥ ९ ॥
सा त्रियामा तदार्तस्य चन्द्रमण्डलमण्डिता ।
राज्ञो विलपमानस्य न व्यभासत शर्वरी ॥ १० ॥
तथैवोष्णं विनिःश्वस्य वृद्धो दशरथो नृपः ।
विललापार्तवद्दुःखं गगनासक्तलोचनः ॥ ११ ॥
न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषिते ।
क्रियतां मे दया भद्रे मयायं रचितोऽञ्जलिः ॥ १२ ॥
अथ वा गम्यतां शीघ्रं नाहमिच्छामि निर्घृणां ।
नृशंसां कैकयीं द्रष्टुं यत्कृते व्यसनं मम ॥ १३ ॥
विलप्यैव ततो राजा कैकेयीमुद्यताञ्जलिः ।
प्रसादयामास पुनः वाक्यं चेदमथाब्रवीत् ॥ १४ ॥

Digitized by Google

साधुवृत्तस्य दीनस्य त्वद्गतस्य गतायुषः ।
प्रसादः क्रियतां भद्रे देवि राज्ञो विशेषतः ॥ १५ ॥
शून्येन खलु सुश्रोणि मयेदं समुदाहृतं ।
कुरु साधु प्रसादं मे बाले सहृदया ह्यसि ॥ १६ ॥
प्रसीद देवि रामोऽपि त्वद्दत्तं राज्यमव्ययं ।
लभतामसितापाङ्गि यशः परमवाप्स्यसि ॥ १७ ॥
मम रामस्य लोकस्य गुरूणां भरतस्य च ।
प्रियमेतद्गुरुश्रोणि कुरु चारुमुखेक्षणे ॥ १८ ॥

विशुद्धभावस्य हि दुष्टभावा
ताम्रेक्षणस्याश्रुकलस्य राज्ञः ।
श्रुत्वा विचित्रं करुणं विलापं
भर्तुर्नृशंसा न चकार वाक्यं ॥ १९ ॥
ततः स राजा पुनरेव मूर्छितः
प्रियामतुष्टां प्रतिकूलभाषिणीं ।
समीक्ष्य पुत्रस्य विवासनं प्रति
क्षितौ विसंज्ञो निपपात दुःखितः ॥ २० ॥

इत्ययोध्याकाण्डे दशरथमोक्षो नाम त्रयोदशः सर्गः
॥ १३ ॥

520
20
540

Digitized by Google

## CAPUT XIV.

### Ramae arcessitus.

पुत्रशोकार्दितं पापा विसंज्ञं पतितं भुवि ।
विचेष्टमानमुत्प्रेक्ष्य ऐक्ष्वाकुमिदमब्रवीत् ॥ १ ॥
पापं कृत्वेव किमिदं मम संश्रुत्य संश्रवं ।
शेषे क्षितितले सन्नः स्थित्यां स्थातुं त्वमर्हसि ॥ २ ॥
आहुः सत्यं हि परमं धर्मं धर्मविदो जनाः ।
सत्यमाश्रित्य च मया त्वं धर्मं प्रतिचोदितः ॥ ३ ॥
संश्रुत्य शैब्यः श्येनाय स्वां तनुं जगतीपतिः ।
प्रदाय पक्षिणो राजा जगाम गतिमुत्तमां ॥ ४ ॥
तथा ह्यलर्कस्तेजस्वी ब्राह्मणे वेदपारगे ।
याचमाने स्वके नेत्रे उद्धृत्याविमना ददौ ॥ ५ ॥
सरितां तु पतिः स्वल्पां मर्यादां स्थापितः पुरा ।
सत्यानुरोधात् समये वेलां स्वां नातिवर्तते ॥ ६ ॥
सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः ।
सत्यमेवाक्षया वेदाः सत्येनावाप्यते परं ॥ ७ ॥
सत्यं समनुवर्तस्व यदि धर्मे धृता मतिः ।
स वरः सफलो मेऽस्तु वरदो ह्यसि सत्तम ॥ ८ ॥

Digitized by Google

धर्मस्यैवाभिकामार्थं मम चैवाभिचोदनात् ।
प्रव्राजय सुतं रामं त्रिः खलु त्वां ब्रवीम्यहं ॥ ९ ॥
समयं च ममार्येमं यदि त्वं न करिष्यसि ।
अग्रतस्ते परित्यक्ता परित्यक्ष्यामि जीवितं ॥ १० ॥
एवं प्रचोदितो राजा कैकेय्या निर्विशङ्कया ।
नाशकत् पाशमुन्मोक्तुं बलिरिन्द्रकृतं यथा ॥ ११ ॥
उद्भ्रान्तहृदयश्चापि विवर्णवदनोऽभवत् ।
स धुर्यो वै परिस्पन्दन् युगचक्रान्तरं यथा ॥ १२ ॥
विह्वलाभ्यां च नेत्राभ्यामपश्यन्निव भूमिपः ।
कृच्छ्राद्धैर्येण संस्तभ्य कैकेयीमिदमब्रवीत् ॥ १३ ॥
यस्ते मन्त्रकृतः पाणिरग्नौ पापे मया धृतः ।
तं त्यजामि स्वयं चापि तव पुत्रं सह त्वया ॥ १४ ॥
प्रयाता रजनी देवि सूर्यस्योदयनं प्रति ।
अभिषेकं गुरुजनस्त्वरयिष्यति मां ध्रुवं ॥ १५ ॥
रामाभिषेकसंभारैस्तदर्थमुपकल्पितैः ।
रामः कारयितव्यो मे मृतस्य सलिलक्रियां ॥ १६ ॥
सपुत्रया त्वया नैव कर्तव्या सलिलक्रिया ।
व्याहन्तास्यशुभाचारे यदि रामाभिषेचनं ॥ १७ ॥
न शक्तोऽद्यास्म्यहं द्रष्टुं दृष्ट्वा पूर्वं तथासुखं ।
हतहर्षं हतानन्दं पुनर्जनमवाङ्मुखं ॥ १८ ॥

Digitized by Google

तां तथा ब्रुवतस्तस्य भूमिपस्य महात्मनः ।
प्रभाता शर्वरी पुण्या चन्द्रनक्षत्रमालिनी ॥ १९ ॥
ततः पापसमाचारा कैकेयी पार्थिवं पुनः ।
उवाच परुषं वाक्यं वाक्यज्ञा रोषमूर्छिता ॥ २० ॥
किमिदं भाषसे राजन् वाक्यं गररुजोपमं ।
आनाययितुमक्लिष्टं पुत्रं राममिहार्हसि ॥ २१ ॥
स्थाप्य राज्ये मम सुतं कृत्वा रामं वनेचरं ।
निःसपत्नां च मां कृत्वा कृतकृत्यो भविष्यसि ॥ २२ ॥
स तुन्न इव तीक्ष्णेन प्रतोदेन हयोत्तमः ।
राजा प्रचोदितोऽभीक्ष्णं कैकेय्या वाक्यमब्रवीत् ॥ २३ ॥
धर्मबन्धेन बद्धोऽस्मि नष्टा च मम चेतना ।
ज्येष्ठं पुत्रं प्रियं रामं द्रष्टुमिच्छामि धार्मिकं ॥ २४ ॥
ततः प्रभाता रजनिरुदिते च दिवाकरे ।
पुण्ये नक्षत्रयोगे च मुहूर्ते च समागते ॥ २५ ॥
वशिष्ठो गुणसंपन्नः शिष्यैः परिवृतस्तदा ।
उपगृह्याशु संभारान् प्रविवेश पुरोत्तमं ॥ २६ ॥
महोत्सवसमायुक्तां राघवार्थे समुत्सुकां ।
तां पुरीं समतिक्रम्य पुरन्दरपुरोपमां ॥ २७ ॥
ददर्शान्तःपुरं श्रीमान् नानाद्विजगणायुतं ।
यष्टिमद्भिः सुसंपूर्णं सदस्यैः परमार्चितैः ॥ २८ ॥

Digitized by Google

तदन्तःपुरमासाद्य व्यतिचक्राम तं जनं ।
वशिष्ठः परमप्रीतः परमर्षिभिरावृतः ॥ २९ ॥
स त्वपश्यद्विनिष्क्रान्तं सुमन्त्रं नाम सारथिं ।
द्वारे मनुजसिंहस्य सचिवं प्रियदर्शनं ॥ ३० ॥
तमुवाच महातेजाः सूतपुत्रं विशारदं ।
वशिष्ठः क्षिप्रमाचक्ष्व नृपतेर्मामिहागतं ॥ ३१ ॥
इमे गङ्गोदकघटा सागरेभ्यश्च काञ्चनाः ।
औडुम्बरं भद्रपीठमभिषेकार्थमाहृतं ॥ ३२ ॥
सर्ववीजानि गन्धाश्च रत्नानि विविधानि च ।
क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ॥ ३३ ॥
अष्टौ च कन्या रुचिरा मत्तश्च वरवारणाः ।
चतुरश्वो रथः श्रीमान् निस्त्रिंशो धनुरुत्तमं ॥ ३४ ॥
वाहनं नरसंयुक्तं छत्त्रं च शशिसंनिभं ।
श्वेते च बालव्यजने भृङ्गारं च हिरण्मयं ॥ ३५ ॥
हेमदामपिनद्धश्च ककुद्मान् पाण्डुरो वृषः ।
केसरी च चतुर्दंष्ट्रो हरिश्रेष्ठो महाबलः ॥ ३६ ॥
सिंहासनं व्याघ्रतनुः समिद्धश्च हुताशनः ।
सर्वे वादित्रसंघाश्च वेश्याश्चालंकृताः स्त्रियः ॥ ३७ ॥
आचार्या ब्राह्मणा गावः पुण्याश्च मृगपक्षिणः ।
पौरजानपदश्रेष्ठा नैगमाश्च गणैः सह ॥ ३८ ॥

Digitized by Google

एते चान्ये च बहवः प्रीयमाणाः प्रियंवदाः ।
अभिषेकाय रामस्य सह तिष्ठन्ति पार्थिवैः ॥ ३९ ॥
त्वरयस्व महाराजं यथा समुदितेऽहनि ।
पुष्ये नक्षत्रयोगे च रामो राज्यमवाप्नुयात् ॥ ४० ॥
इति तस्य वचः श्रुत्वा सूतपुत्रो महात्मनः ।
स्तुवन् नृपतिशार्दूलं प्रविवेश निवेशनं ॥ ४१ ॥
तं तु पूर्वोदितं वृद्धं द्वारस्था राजसंमताः ।
न शेकुरभिसंरोद्धुं राज्ञः प्रियचिकीर्षवः ॥ ४२ ॥
स समीपस्थितो राज्ञस्तामवस्थामजज्ञिवान् ।
वाग्भिः परमतुष्टाभिरभिष्टोतुं प्रचक्रमे ॥ ४३ ॥
यथा नन्दति तेजस्वी सागरो भास्करोदये ।
प्रीतः प्रीतेन मनसा अद्य नन्दय नस्तथा ॥ ४४ ॥
इन्द्रमस्यां तु वेलायामभितुष्टाव मातलिः ।
सोऽजयद्दानवान् सर्वांस्तथा त्वां बोधयाम्यहं ॥ ४५ ॥
वेदाः सहाङ्गा विद्याश्च यथा ह्यात्मभुवं प्रभुं ।
ब्रह्माणं बोधयन्त्यद्य तथा त्वां बोधयाम्यहं ॥ ४६ ॥
आदित्यः सह चन्द्रेण यथा भूतधरां शुभां ।
बोधयत्यद्य पृथिवीं तथा त्वां बोधयाम्यहं ॥ ४७ ॥
उत्तिष्ठ सुमहाराज कृतकौतुकमङ्गलः ।
विराजमानो वपुषा मेरोरिव दिवाकरः ॥ ४८ ॥

Digitized by Google

सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि ।
वरुणश्चाग्निरिन्द्रश्च विजयं प्रदिशन्तु ते ॥ ४९ ॥
गता भगवती रात्रिरहः शिवमुपस्थितं ।
प्रतिबुध्यस्व राजर्षे कृत्यं महदुपस्थितं ॥ ५० ॥
अयं वशिष्ठो भगवान् ब्राह्मणैः सह तिष्ठति ।
क्षिप्रमाज्ञाप्यतां राजन् राघवस्याभिषेचनं ॥ ५१ ॥
यथा ह्यपालाः पशवो यथा सेना ह्यनायका ।
एवं हि भविता राष्ट्रं यत्र राजा न तिष्ठति ॥ ५२ ॥
इति तस्य वचः श्रुत्वा सान्त्वपूर्वमिवार्थवत् ।
अभ्यकीर्यत शोकेन भूय एव महीपतिः ॥ ५३ ॥
ततस्तु राजा तं सूतं सन्नहर्षः सुतं प्रति ।
शोकरक्तेक्षणः श्रीमान् उद्वीक्ष्योवाच धार्मिकः ॥ ५४ ॥
सूत किं दुःखितं त्वं मामस्तुत्यं स्तोतुमिच्छसि ।
वाक्यैस्तु खलु मर्माणि मम भूयो निकृन्तसि ॥ ५५ ॥
सुमन्त्रः करुणां श्रुत्वा दृष्ट्वा दीनं च पार्थिवं ।
प्रगृहीताञ्जलिः किंचित् तस्माद्देशादपाक्रमत् ॥ ५६ ॥
यदा वक्तुं स्वयं दैन्यान्न शशाक महीपतिः ।
तदा सुमन्त्रं मन्त्रज्ञा कैकेयी प्रत्युवाच ह ॥ ५७ ॥
सुमन्त्र राजा रजनीं रामहर्षसमुत्सुकः ।
प्रजागरपरिश्रान्तो निद्राया वशमागतः ॥ ५८ ॥

Digitized by Google

तद्गच्छ त्वरितं सूत राजपुत्रं यशस्विनं ।
राममानय भद्रं ते नात्र कार्या विचारणा ॥ ५९ ॥
अश्रुत्वा राजवचनं कथं गच्छामि भामिनि ।
तच्छ्रुत्वा मन्त्रिणो वाक्यं राजा मन्त्रिणमब्रवीत् ॥ ६० ॥
सुमन्त्र रामं द्रक्ष्यामि शीघ्रमानय सुन्दरं ।
स मन्यमानः कल्याणं हृदयेन ननन्द ह ॥ ६१ ॥
व्यक्तं रामाभिषेकार्थमिहायस्यति धर्मभाक् ।
इति सूतो मतिं कृत्वा हर्षेण महतावृतः ॥ ६२ ॥
निर्जगाम महातेजा राघवस्य दिदृक्षया ।
सागरह्रदसंकाशात् सुमन्त्रोऽन्तःपुराच्छुभात् ॥ ६३ ॥

ततः पुरस्तात् सहसा विनिःसृतो
महीपतेर्द्वारगतान् विलोकयन् ।
ददर्श पौरान् विविधान् महाधनान्
उपस्थितान् द्वारमुपेत्य विष्ठितान् ॥ ६४ ॥

इत्ययोध्याकाण्डे रामानयनं नाम चतुर्दशः सर्गः
॥ १४ ॥

## CAPUT XV.

### SOLENNIUM INAUGURATIONIS APPARATUS.

ते तु तां रजनीमुष्य ब्राह्मणा वेदपारगाः ।
उपतस्थुरुपस्थानं सह राजपुरोहितैः ॥ १ ॥
अमात्या बलमुख्याश्च मुख्या ये निगमस्य च ।
राघवस्याभिषेकार्थे प्रीयमाणाः सुसंगताः ॥ २ ॥
उदिते विमले सूर्ये पुष्ये चाभ्यागतेऽहनि ।
लग्ने कर्कटके प्राप्ते जन्म रामस्य च स्थिते ॥ ३ ॥
अभिषेकाय रामस्य द्विजेन्द्रैरुपकल्पितं ।
काञ्चना जलकुम्भाश्च भद्रपीठं स्वलंकृतं ॥ ४ ॥
रथश्च सम्यगास्तीर्णो भास्वता व्याघ्रचर्मणा ।
गङ्गायमुनयोः पुण्यात् संगमादाहृतं जलं ॥ ५ ॥
याश्चान्याः सरितः पुण्या ह्रदाः कूपाः सरांसि च ।
ताभ्यश्चैवाहृतं तोयं समुद्रेभ्यश्च सर्वशः ॥ ६ ॥
क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ।
अष्टौ च कन्या रुचिरा मत्तश्च वरवारणः ॥ ७ ॥
सजलाः क्षीरिभिश्छन्ना घटाः काञ्चनराजताः ।
पद्मोत्पलयुता भान्ति पूर्णाः परमवारिणा ॥ ८ ॥
*वेश्याश्चैव शुभाचाराः सर्वाभरणभूषिताः ।
*लीलावत्यः सुभ्रुवश्च लोलनेत्राः सहस्रशः ॥ ९ ॥

Digitized by Google

चन्द्रांशुविकचप्रख्यं पाण्डुरं रत्नभूषितं ।
सज्जं तिष्ठति रामस्य बालव्यजनमुत्तमं ॥ १० ॥
चन्द्रमण्डलसंकाशमातपत्रं च पाण्डुरं ।
सज्जं द्युतिकरं श्रीमदभिषेकपुरःसरं ॥ ११ ॥
पाण्डुरश्च वृषः सज्जः पाण्डुराश्वश्च संस्थितः ।
वादित्राणि च सर्वाणि वन्दिनश्च तथापरे ॥ १२ ॥
इक्ष्वाकूणां यथा राज्ये संभ्रियेताभिषेचनं ।
तथा जातीयमादाय यच्चान्यदपि किंचन ॥ १३ ॥
ते राजवचनात् तत्र समवेता महीपतिं ।
अपश्यन्तोऽब्रुवन् को नु राज्ञो नः प्रतिवेदयेत् ॥ १४ ॥
पश्यामो न हि राजानमुदितश्च दिवाकरः ।
यौवराज्याभिषेकश्च सज्जो रामस्य धीमतः ॥ १५ ॥
इति तेषु ब्रुवाणेषु सर्वभौमान् महीपतीन् ।
अब्रवीत् तान् इदं वाक्यं सुमन्त्रो राजसत्कृतः ॥ १६ ॥
रामं राज्ञो नियोगेन त्वरया प्रस्थितो ह्यहं ।
पूज्या राज्ञो भवन्तश्च रामस्य तु विशेषतः ॥ १७ ॥
अयं पृच्छामि वचनात् सुखमायुष्मतामहं ।
राज्ञः संप्रति बुद्धस्य अनागमनकारणं ॥ १८ ॥
इत्युक्त्वान्तःपुरद्वारमाजगाम पुराणवित् ।
सदासक्तं च तद्वेश्म सुमन्त्रः प्रविवेश ह ॥ १९ ॥

Digitized by Google

सोऽप्यासाद्य च तद्देश्म तिरस्करिणामन्तरा ।
आशीर्भिर्गुणयुक्ताभिरभितुष्टाव राघवं ॥ २० ॥
सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि ।
वरुणश्चाग्निरिन्द्रश्च विजयं प्रदिशन्तु ते ॥ २१ ॥
गता भगवती रात्रिरहः शिवमुपस्थितं ।
बुध्यस्व नरशार्दूल कुरु कार्यमनन्तरं ॥ २२ ॥
ब्राह्मणा बलमुख्याश्च नैगमाश्चागतास्त्विह ।
दर्शनं तेऽभिकाङ्क्षन्ते प्रतिबुध्यस्व राघव ॥ २३ ॥
स्तुवन्तं तं तदा सूतं सुमन्त्रं मन्त्रकोविदं ।
प्रतिबुध्य ततो राजा इदं वचनमब्रवीत् ॥ २४ ॥
राममानय सूतेति यदस्यभिहितोऽनया ।
किमिदं कारणं येन ममाज्ञा प्रतिहन्यते ॥ २५ ॥
न चैव संप्रसुप्तोऽहमानयेहाशु राघवं ।
इति राजा दशरथः सूतं तत्रान्वशात् पुनः ॥ २६ ॥
स राजवचनं श्रुत्वा शिरसा प्रतिपूज्य तं ।
निर्जगाम नृपावासान्मन्यमानः प्रियं महत् ॥ २७ ॥
प्रपन्नो राजमार्गं च पताकाध्वजशोभितं ।
हृष्टः समुदितः सूतो जगामाशु विलोकयन् ॥ २८ ॥
स सूतस्तत्र शुश्राव रामाधिकरणाः कथाः ।
अभिषेचनसंयुक्ताः सर्वलोकस्य हृष्टवत् ॥ २९ ॥

Digitized by Google

ततो ददर्श रुचिरं कैलाससदृशप्रभं ।
रामवेश्म सुमन्त्रस्तु शक्रवेश्मसमप्रभं ॥ ३० ॥
महाकपाटपिहितं वितर्दिशतशोभितं ।
काञ्चनप्रतिमैकाग्रं मणिविद्रुमतोरणं ॥ ३१ ॥
शारदाभ्रघनप्रख्यं दीप्तं मेरुगुहासमं ।
दामभिर्वरमाल्यानां प्रलम्बैः समलंकृतं ॥ ३२ ॥
मुक्तामणिभिराकीर्णं चन्दनागुरुधूपितं ।
गन्धान् मनोज्ञान् विसृजद्दार्दुरं शिखरं यथा ॥ ३३ ॥
सारसैश्च मयूरैश्च विनदद्भिर्विराजितं ।
सुकृतेहामृगाकीर्णं सूत्कीर्णं भक्तिभिस्तथा ॥ ३४ ॥
मनश्चक्षुश्च भूतानामाददत् तिग्मतेजसा ।
चन्द्रभास्करसंकाशं कुवेरभवनोपमं ॥ ३५ ॥
उपस्थितैः समाकीर्णं जनैरञ्जलिकारिभिः ।
उपादाय समाक्रान्तैस्तथा जानपदैर्जनैः ॥ ३६ ॥
रामोपवाह्यं च गजं मुक्तावरविभूषितं ।
कृताङ्कं चन्दनेनैव ददर्शैरावतोपमं ॥ ३७ ॥

स वाजियुक्तेन रथेन सारथिर्-
नराकुलं राजकुलं विराजयन् ।
वरूथिना रामगृहाभियातिना
पुरस्य सर्वस्य मनांसि हर्षयन् ॥ ३८ ॥



Digitized by Google

ततः समासाद्य महाधनं महत्
प्रहृष्टरोमा स बभूव सारथिः ।
मृगैर्मयूरैश्च समाकुलोल्वणं
गृहं वरार्हस्य शचीपतेरिव ॥ ३९ ॥
स तत्र कैलाससनिभाः स्वलंकृताः
प्रविश्य कक्ष्यास्त्रिदशालयोपमाः ।
प्रियान् नरान् राममते स्थितान् बहून्
व्यपोह्य शुद्धान्तमुपस्थितो रथी ॥ ४० ॥
वयःस्थितैर्मागधसूतवन्दिभिः
तथैव वैतालिकसौख्यसुप्तिकैः ।
अभिष्टुवद्भिर्गुणातो नृपात्मजं
समावृतं द्वारपथं ददर्श ह ॥ ४१ ॥
तदाद्रिकूटाचलमेघसंनिभं
महाविमानप्रतिमं जनौघवत् ।
अवार्यमाणाः प्रविवेश सारथिः
प्रभूतरत्नं मकरो यथार्णवं ॥ ४२ ॥

इत्ययोध्याकाण्डे आभिषेचनिकद्रव्योपक्षेपो नाम पञ्चदशः सर्गः ॥ १५ ॥

604
52
656

## CAPUT XVI.

### RAMAS EVOCATUS.

स तदन्तःपुरद्वारं समतीत्य जनाकुलं ।
प्रविविक्तां ततः कक्ष्यामाससाद पुराणवित् ॥ १ ॥
प्रासकार्मुकबिभ्रद्भिर्युवभिर्मृष्टकुण्डलैः ।
अप्रमादिभिरेकाग्रैः स्वनुरक्तैरधिष्ठितां ॥ २ ॥
तत्र काषायिणो वृद्धान् वेत्रपाणीन् स्वलंकृतान् ।
ददर्श विष्ठितान् द्वारि स्त्र्यध्यक्षान् सुसमाहितान् ॥ ३ ॥
ते समीक्ष्य समायान्तं रामप्रियचिकीर्षवः ।
सहसोत्पतिताः सर्वे आसनेभ्यः ससंभ्रमाः ॥ ४ ॥
तान् उवाच विनीतात्मा सूतपुत्रः प्रदक्षिणः ।
क्षिप्रमाख्यात रामाय सुमन्त्रो द्वारि तिष्ठति ॥ ५ ॥
ते राममुपसंगम्य भर्तुः प्रियचिकीर्षवः ।
सहभार्याय रामाय क्षिप्रमेवाचचक्षिरे ॥ ६ ॥
प्रतिवेदितमाज्ञाय सूतमभ्यन्तरं पितुः ।
तत्रैवानाययामास राघवः प्रियकाम्यया ॥ ७ ॥
तं वैश्रवणसंकाशमुपविष्टं स्वलंकृतं ।
ददर्श सूतः पर्यङ्के सौवर्णे सोत्तरच्छदे ॥ ८ ॥

Digitized by Google

वराहरुधिराभेण शुक्लदन्तेन सुगन्धिना ।
अनुलिप्तं परार्ध्येन चन्दनेन परंतपं ॥ ९ ॥
स्थितया पार्श्वतश्चापि बालव्यजनहस्तया ।
उपेतं सीतया भूयश्चित्रया शशिनं यथा ॥ १० ॥
तं तपन्तमिवादित्यमुपपन्नं स्वतेजसा ।
ववन्दे वरदं वन्दी विनयज्ञो विनीतवत् ॥ ११ ॥
प्राञ्जलिः सुमुखं दृष्ट्वा विहारशयनासने ।
राजपुत्रमुवाचेदं सुमन्त्रो राजसत्कृतः ॥ १२ ॥
कौशल्या सुप्रजा राम पिता त्वां द्रष्टुमिच्छति ।
महिष्या सह कैकेय्या गम्यतां तत्र मा चिरं ॥ १३ ॥
एवमुक्तस्तु संहृष्टो नरसिंहो महाद्युतिः ।
ततः संमानयामास सीतामिदमुवाच ह ॥ १४ ॥
देवि देवश्च देवी च समागम्य मदन्तरे ।
मन्त्रयेते ध्रुवं किंचिदभिषेचनसंहितं ॥ १५ ॥
लक्षयित्वा ह्यभिप्रायं प्रियकामा सुदक्षिणा ।
संचोदयति राजानं मदर्थमसितेक्षणा ॥ १६ ॥
दिष्ट्या खलु महाराजो महिष्या प्रियया सह ।
सुमन्त्रं प्राहिणोद्दूतमर्थकामकरं मम ॥ १७ ॥
यादृशी परिषत् तत्र तादृशो दूत आगतः ।
ध्रुवमद्यैव मां राजा यौवराज्ये ऽभिषेक्ष्यति ॥ १८ ॥

Digitized by Google

हन्त शीघ्रमितो गत्वा द्रक्ष्यामि जगतीपतिं ।
सह त्वं परिवारेण सुखमास्व रमस्व च ॥ १९ ॥
पतिसंमानिता सीता भर्तारमसितेक्षणा ।
आद्वारमनुवव्राज मङ्गलान्यभिदध्युषी ॥ २० ॥
राज्यं द्विजातिभिर्जुष्टं राजसूयाभिषेचनं ।
कर्तुमर्हति ते राजा वासवस्येव लोककृत् ॥ २१ ॥
दीक्षितं व्रतसंपन्नं वराजिनधरं शुचिं ।
कुरङ्गशृङ्गपाणिं च पश्यन्ती त्वां भजाम्यहं ॥ २२ ॥
पूर्वां दिशं वज्रधरो दक्षिणां पातु ते यमः ।
वरुणः पश्चिमामाशां धनेशस्तूत्तरां दिशं ॥ २३ ॥
अथ सीतामनुज्ञाप्य कृतकौतुकमङ्गलः ।
निश्चक्राम सुमन्त्रेण सह रामो निवेशनात् ॥ २४ ॥
पर्वतादिव निष्क्रम्य सिंहो गिरिगुहाशयः ।
लक्ष्मणं द्वारि सोऽपश्यत् प्रह्वाञ्जलिपुटं स्थितं ॥ २५ ॥
अथ मध्यमकक्षायां समागच्छत् सुहृज्जनैः ।
स सर्वान् अर्थिनो दृष्ट्वा समेत्य प्रतिनन्द्य च ॥ २६ ॥
ततः पावकसंकाशमारुरोह रथोत्तमं ।
वैयाघ्रं पुरुषव्याघ्रो राजतं राजनन्दनः ॥ २७ ॥
मेघनादमसंबाधं मणिहेमविभूषितं ।
मुष्णन्तमिव चक्षूंषि प्रभया सूर्यवर्चसं ॥ २८ ॥

Digitized by Google

करेणुशिशुकल्पैश्च युक्तं परमवाजिभिः ।
हरियुक्तं सहस्राक्षो रथमिन्द्र इवाशुगं ॥ २९ ॥
स पर्जन्य इवाकाशे स्वनवान् अभिनादयन् ।
निकेतान्निर्ययौ श्रीमान् महाभ्रादिव चन्द्रमाः ॥ ३० ॥
चित्रचामरपाणिस्तु लक्ष्मणो राघवानुजः ।
जुगोप भ्रातरं भ्राता रथमास्थाय पृष्ठतः ॥ ३१ ॥
ततो हलाहलशब्दस्तुमुलः समजायत ।
तस्य निष्क्रममाणस्य जनौघस्य समन्ततः ॥ ३२ ॥
ततो हयवरा मुख्या गजाश्च गिरिसंनिभाः ।
अनुजग्मुस्तदा रामं शतशोऽथ सहस्रशः ॥ ३३ ॥
अग्रतश्चास्य संनद्धाश्चन्दनागुरुभूषिताः ।
खड्गचापधराः शूरा जग्मुराशंसवो जनाः ॥ ३४ ॥
ततो वादित्रशब्दाश्च स्तुतिशब्दाश्च वन्दिनां ।
सिंहनादाश्च शूराणां तत्र शुश्रुविरे पथि ॥ ३५ ॥
हर्म्यवातायनस्थाभिर्भूषिताभिः समन्ततः ।
कीर्यमाणः स पुष्पौघैर्ययौ स्त्रीभिररिंदमः ॥ ३६ ॥
रामं सर्वानवद्याङ्ग्यो रामपिप्रीषया ततः ।
वचोभिरग्र्यैर्हर्म्यस्थाः क्षितिस्थाश्च ववन्दिरे ॥ ३७ ॥
नूनं नन्दति ते माता कौशल्या मातृनन्दन ।
पश्यन्ती सिद्धयात्रं त्वां पित्र्यं राज्यमुपस्थितं ॥ ३८ ॥

सर्वसीमन्तिनीभ्यश्च सीतां सीमन्तिनीं वरां ।
अमन्यन्त हि ता नार्यो रामस्य हृदयप्रियां ॥ ३९ ॥
तया सुचरितं देव्या पुरा नूनं महत् तपः ।
रोहिणीव शशाङ्केन रामसंयोगमागता ॥ ४० ॥
इति प्रासादशृङ्गेषु प्रमदाभिर्नरोत्तमः ।
शुश्राव राजमार्गस्थः प्रिया वाच उदाहृताः ॥ ४१ ॥

इत्ययोध्याकाण्डे रामाह्वानं नाम षोडशः सर्गः ॥ १६ ॥

646
41
687

---

## CAPUT XVII.

### RAMAE ACCESSUS.

स रामो रथमास्थाय संप्रहृष्टसुहृज्जनः ।
अपश्यन्नगरं श्रीमान् नानाजनसमाकुलं ॥ १ ॥
स गृहैरभ्रसंकाशैः पाण्डुरैरुपशोभितं ।
राजमार्गं ययौ रामो मध्येनागुरुधूपितं ॥ २ ॥
संवृतं विविधैः पुष्पैर्भक्ष्यैरुच्चावचैरपि ।
ददर्श तं राजपथं दिवि देवपथं यथा ॥ ३ ॥
आशिर्वादान् बहून् शृण्वन् बहुभिःसमुदीरितान् ।
यथार्हं चापि संपूज्य सर्वान् एव नरान् ययौ ॥ ४ ॥

Digitized by Google

पितामहैराचरितं तथैव प्रपितामहैः ।
अद्योपादाय तं मार्गमभिषिक्तोऽनुपालय ॥ ५ ॥
यथा स्म लालिताः पित्रा यथा सर्वैः पितामहैः ।
ततः सुखतरं सर्वे रामे वत्स्याम राजनि ॥ ६ ॥
अलमद्य हि भुक्तेन प्रियैरर्थैरलं च नः ।
यदि पश्याम निर्यातं रामं राज्ये प्रतिष्ठितं ॥ ७ ॥
एताश्चान्याश्च सुहृदामुदासीनः कथाः शुभाः ।
आत्मसंपूजनीः शृण्वन् ययौ रामो महापथं ॥ ८ ॥
न हि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात् ।
नरः शक्नोत्यपाक्रष्टुमतिक्रान्तेऽपि राघवे ॥ ९ ॥
यश्च रामं न पश्येत् तु यं च रामो न पश्यति ।
निन्दितः सर्वलोकेषु स्वात्माप्येनं विगर्हते ॥ १० ॥
सर्वेषां स हि धर्मात्मा वर्णानां कुरुते दयां ।
चतुर्णां हि वयःस्थानां तेन ते तमनुव्रताः ॥ ११ ॥
चतुष्पथान् देवपथांश्चैत्यांश्चायतनानि च ।
प्रदक्षिणं परिहरन् जगाम नृपतेः सुतः ॥ १२ ॥
स राजकुलमासाद्य महेन्द्रसदनोपमं ।
राजपुत्रः पितुर्वेश्म प्रविवेश श्रिया ज्वलन् ॥ १३ ॥
स कक्ष्या धन्विभिर्गुप्तास्तिस्रोऽतिक्रम्य वाजिभिः ।
पदातिरपरे कक्ष्ये द्वे जगाम नरोत्तमः ॥ १४ ॥

स सर्वाः समतिक्रम्य कक्ष्या दशरथात्मजः ।
संनिवर्त्य जनं सर्वं शुद्धान्तःपुरमाविशत् ॥ १५ ॥
तस्मिन् प्रविष्टे पितुरन्तिकं तदा
जनः स सर्वो मुदितो नृपात्मजे ।
प्रतीक्षते तस्य पुनः स्म निर्गमं
यथोदयं चन्द्रमसः सरित्पतिः ॥ १६ ॥

इत्ययोध्याकाण्डे रामोपयानं नाम सप्तदशः सर्गः ॥ १७ ॥

---

## CAPUT XVIII.

### Migratio in silvam imperata.

स ददर्शासने रामो विषण्णं पितरं तदा ।
कैकेय्या सहितं दीनं मुखेन परिशुष्यता ॥ १ ॥
स पितुश्चरणौ पूर्वमभिवाद्य विनीतवत् ।
ततो ववन्दे चरणौ कैकेय्याः सुसमाहितः ॥ २ ॥
रामेत्युक्त्वा तु वचनं वाष्पपर्याकुलेक्षणः ।
शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुं ॥ ३ ॥
तदपूर्वं नरपतेर्दृष्ट्वा रूपं भयावहं ।
रामोऽपि भयमापन्नः पदा स्पृष्ट्वेव पन्नगं ॥ ४ ॥

Digitized by Google

इन्द्रियैरप्रहृष्टैस्तं शोकसंतापकर्शितं ।
निःश्वसन्तं महाराजं व्यथिताकुलचेतसं ॥ ५ ॥
ऊर्मिमालिनमक्षोभ्यं क्षुभ्यन्तमिव सागरं ।
उपप्लुतमिवादित्यमुक्तानृतमृषिं यथा ॥ ६ ॥
अचिन्त्यकल्पं हि पितुस्तं शोकमुपधारयन् ।
बभूव संरब्धतरः समुद्र इव पर्वणि ॥ ७ ॥
चिन्तयामास चतुरो रामः पितृहिते रतः ।
किंस्विदद्यैव नृपतिर्न मां प्रत्यभिनन्दति ॥ ८ ॥
अन्यदा मां पिता दृष्ट्वा कुपितोऽपि प्रसीदति ।
तस्य मामद्य संप्रेक्ष्य किमायासः प्रवर्तते ॥ ९ ॥
स दीन इव शोकार्तो विषण्णवदनद्युतिः ।
कैकेयीमभिवाद्यैव रामो वचनमब्रवीत् ॥ १० ॥
कच्चिन्मया नापराद्धमज्ञानाद्येन मे पिता ।
कुपितस्तन्ममाचक्ष्व त्वं चैवैनं प्रसादय ॥ ११ ॥
अप्रसन्नमनाः किंनु सदा मां प्रति वत्सलः ।
विषण्णवदनो दीनो न हि मां प्रतिभाषते ॥ १२ ॥
शारीरो मानसो वापि कच्चिदेनं न बाधते ।
संतापो वाभितापो वा दुर्लभं हि सदासुखं ॥ १३ ॥
कच्चिन्न किंचिद्भरते कुमारे प्रियदर्शने ।
शत्रुघ्ने वा महासत्त्वे मातृणां वा ममाशुभं ॥ १४ ॥

Digitized by Google

अतोषयन् महाराजमकुर्वन् वा पितुर्वचः ।
मुहूर्तमपि नेच्छेयं जीवितुं कुपिते नृपे ॥ १५ ॥
यतोमूलं नरः पश्येत् प्रादुर्भावमिहात्मनः ।
कथं तस्मिन् न वर्तेत प्रत्यक्षे सति दैवते ॥ १६ ॥
कच्चिन्न परुषं किंचिदभिमानात् पिता मम ।
उक्तो भवत्या कोपेन येनास्य लुलितं मनः ॥ १७ ॥
एतदाचक्ष्व मे देवि तत्त्वेन परिपृच्छतः ।
किंनिमित्तमपूर्वोऽयं विकारो मनुजाधिपे ॥ १८ ॥
एवमुक्ता तु कैकेयी राघवेण महात्मना ।
उवाचेदं सुनिर्लज्जा धृष्टमात्महितं वचः ॥ १९ ॥
न राजा कुपितो राम व्यसनं नास्य किंचन ।
किंचिन्मनोगतं त्वस्य त्वद्भयान्न तु भाषते ॥ २० ॥
प्रियं त्वामप्रियं वक्तुं वाणी नास्य प्रवर्तते ।
तदवश्यं त्वया कार्यं यदनेन श्रुतं मम ॥ २१ ॥
एष मह्यं वरं दत्वा पुरा मामभिपूज्य च ।
स पश्चात् तप्यते राजा यथान्यः प्राकृतस्तथा ॥ २२ ॥
अतिसृज्य ददानीति वरं मम विशांपतिः ।
स निरर्थं गतजले सेतुं बन्धितुमिच्छति ॥ २३ ॥
धर्ममूलमिदं राम विदितं च सतामपि ।
तत् सत्यं न त्यजेद्राजा कुपितस्त्वत्कृते न च ॥ २४ ॥

Digitized by Google

यदि तद्वक्ष्यते राजा शुभं वा यदि वाशुभं ।
करिष्यसि ततः सर्वमाख्यास्यामि पुनस्त्वहं ॥ २५ ॥
यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते ।
ततोऽहमभिधास्यामि न ह्येष त्वयि वक्ष्यति ॥ २६ ॥
एतत् तु वचनं श्रुत्वा कैकेय्या समुदाहृतं ।
उवाच व्यथितो रामस्तां देवीं नृपसंनिधौ ॥ २७ ॥
अहो धिङ् नार्हसे देवि वक्तुं मामीदृशं वचः ।
अहं हि वचनाद्राज्ञः पतेयमपि पावके ॥ २८ ॥
भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे ।
नियुक्तो गुरुणा पित्रा नृपेण च विशेषतः ॥ २९ ॥
तद्ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितं ।
करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥ ३० ॥
तमार्जवसमायुक्तमनार्या सत्यवादिनं ।
उवाच रामं कैकेयी वचनं भृशदारुणं ॥ ३१ ॥
पुरा देवासुरे युद्धे पित्रा ते मम राघव ।
रक्षितेन वरौ दत्तौ सशल्येन महारणे ॥ ३२ ॥
तत्र मे याचितो राजा भरतस्याभिषेचनं ।
गमनं दण्डकारण्ये तव चाद्यैव राघव ॥ ३३ ॥
यदि सत्यप्रतिज्ञं त्वं पितरं कर्तुमिहेच्छसि ।
आत्मानं च नरश्रेष्ठ मम वाक्यमिदं शृणु ॥ ३४ ॥

Digitized by Google

संनिदेशे पितुस्तिष्ठ यथानेन प्रतिश्रुतं ।
त्वयारण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च ॥ ३५ ॥
भरतस्त्वभिषिच्येत यदेतदभिषेचनं ।
त्वदर्थे विहितं राज्ञा तेन सर्वेण राघव ॥ ३६ ॥
सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः ।
अभिषेकमिमं त्यक्त्वा जटाचीरधरो भव ॥ ३७ ॥
भरतः कोशलपतेः प्रशास्तु वसुधामिमां ।
नानारत्नसमाकीर्णां सवाजिरथकुञ्जरां ॥ ३८ ॥
एतेन त्वां नरेन्द्रोऽयं कारुण्येन समाप्लुतः ।
शोकैः संक्लिष्टवदनो न शक्नोति निरीक्षितुं ॥ ३९ ॥
एतत् कुरु नरेन्द्रस्य वचनं रघुनन्दन ।
सत्येन महता राम तारयस्व नरेश्वरं ॥ ४० ॥

इतीव तस्यां परुषं वदन्त्यां
न चैव रामः प्रविवेश शोकं ।
प्रविव्यथे चापि महानुभावो
राजा स्वपुत्रव्यसनाभितप्तः ॥ ४१ ॥

इत्ययोध्याकाण्डे वनगमनादेशो नाम अष्टादशः सर्गः
॥ १८ ॥

## CAPUT XIX.

### Fides data de migratione in silvam.

तदप्रियममित्रघ्नो वचनं मरणोपमं ।
श्रुत्वा न विव्यथे रामः कैकेयीं चेदमब्रवीत् ॥ १ ॥
एवमस्तु गमिष्यामि वनं वस्तुमहं त्वितः ।
जटाचीरधरो राज्ञः प्रतिज्ञामनुपालयन् ॥ २ ॥
इदं तु ज्ञातुमिच्छामि किमर्थं मां महीपतिः ।
नाभिनन्दति दुर्धर्षो यथा पूर्वमरिंदमः ॥ ३ ॥
मन्युर्न च त्वया कार्यो देवि ब्रूमि तवाग्रतः ।
यास्यामि भव सुप्रीता वनं चीरजटाधरः ॥ ४ ॥
हितेन गुरुणा पित्रा कृतज्ञेन नृपेण च ।
नियुज्यमानो विस्रब्धः किं न कुर्यामहं प्रियं ॥ ५ ॥
अलीकं मानसं त्वेकं हृदयं दहतीव मे ।
स्वयं यन्नाह मां राजा भरतस्याभिषेचनं ॥ ६ ॥
अहं हि सीतां राज्यं च प्राणान् इष्टान् धनानि च ।
हृष्टो भ्रात्रे स्वयं दद्यां भरतायाप्रचोदितः ॥ ७ ॥
किंपुनर्मनुजेन्द्रेण स्वयं पित्रा नियोजितः ।
तव च प्रियकामार्थं प्रतिज्ञामनुपालयन् ॥ ८ ॥

Digitized by Google

तथाश्वासय ह्रीमन्तं किं त्विदं यन्महीपतिः ।
वसुधासक्तनयनो मन्दमश्रूणि मुञ्चति ॥ ९ ॥
गच्छन्तु चैवानयितुं दूताः शीघ्रजवैर्हयैः ।
भरतं मातुलकुलादद्यैव नृपशासनात् ॥ १० ॥
दण्डकारण्यमेषोऽहमितो गच्छामि सत्वरः ।
अविचार्य पितुर्वाक्यं समा वस्तुं चतुर्दश ॥ ११ ॥
सा हृष्टा तस्य तद्वाक्यं श्रुत्वा रामस्य कैकयी ।
प्रस्थानं श्रद्दधाना हि त्वरयामास राघवं ॥ १२ ॥
एवं भवतु यास्यन्ति दूताः शीघ्रजवैर्हयैः ।
भरतं मातुलकुलादुपावर्तयितुं नराः ॥ १३ ॥
तव त्वहं क्षमं मन्ये नोत्सुकस्य विलम्बनं ।
राम तस्मादितः शीघ्रं वनं त्वं गन्तुमर्हसि ॥ १४ ॥
व्रीडान्वितः स्वयं यच्च नृपस्त्वां नाभिभाषते ।
नैतत् किंचिन्नरश्रेष्ठ मन्युरेषोऽपनीयतां ॥ १५ ॥
यावत् त्वं न वनं यातः पुरादस्मादतित्वरन् ।
पिता तावन्न ते राम स्नास्यते भोक्ष्यतेऽपि वा ॥ १६ ॥
धिक् कष्टमिति निःश्वस्य राजा शोकपरिप्लुतः ।
मूर्छितो न्यपतत् तस्मिन् पर्यङ्के हेमभूषिते ॥ १७ ॥
रामोऽप्युत्थाप्य राजानं कैकेय्याभिप्रचोदितः ।
कशयेव हतो वाजी वनं गन्तुं कृतत्वरः ॥ १८ ॥

Digitized by Google

तदप्रियमनार्यायाः वचनं दारुणोदयं ।
श्रुत्वा गतव्यथो रामः कैकेयीं वाक्यमब्रवीत् ॥ १९ ॥
नाहमर्थपरो देवि लोकमावस्तुमुत्सहे ।
विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितं ॥ २० ॥
यत् तत्र भवतः किंचिच्छक्यं कर्तुं प्रियं मया ।
प्राणान् अपि परित्यज्य सर्वथा कृतमेव तत् ॥ २१ ॥
न ह्यतो धर्मचरणं किंचिदस्ति महत्तरं ।
यथा पितरि शुश्रूषा तस्य वा वचनक्रिया ॥ २२ ॥
अनुक्तोऽप्यत्र भवता भवत्या वचनादहं ।
वने वत्स्यामि विजने वर्षाणीह चतुर्दश ॥ २३ ॥
न नूनं मयि कैकेयि किंचिदाशंससे गुणं ।
यद्राजानमवोचस्त्वं ममेश्वरतरा सती ॥ २४ ॥
यावन्मातरमापृच्छे सीतां चानुनयाम्यहं ।
ततोऽद्यैव गमिष्यामि दण्डकानां महद्वनं ॥ २५ ॥
भरतः पालयेद्राज्यं शुश्रूषेच्च पितुर्यथा ।
तथा भवत्या कर्तव्यं स हि धर्मः सनातनः ॥ २६ ॥
रामस्य तु वचः श्रुत्वा भृशं दुःखगतः पिता ।
शोकादशक्नुवन् वक्तुं प्ररुरोद महास्वनं ॥ २७ ॥
वन्दित्वा चरणौ रामो विसंज्ञस्य पितुस्तदा ।
कैकेय्याश्चाप्यनार्यायाः निष्पपात महाद्युतिः ॥ २८ ॥

Digitized by Google

स रामः पितरं कृत्वा कैकेयीं च प्रदक्षिणं ।
निष्क्रम्यान्तःपुरात् तस्मात् स्वं ददर्श सुहृज्जनं ॥ २९ ॥
तं बाष्पपरिपूर्णाक्षो पृष्ठतोऽनुजगाम ह ।
लक्ष्मणः परमक्रुद्धः सुमित्रानन्दवर्धनः ॥ ३० ॥
आभिषेचनिकं भाण्डं कृत्वा रामः प्रदक्षिणं ।
शनैर्जगाम सापेक्षो दृष्टिं तत्राविचालयन् ॥ ३१ ॥
न चास्य महतीं लक्ष्मीं राज्यनाशोऽपकर्षति ।
लोककान्तस्य कान्तत्वाच्छीतरश्मेरिव क्षयः ॥ ३२ ॥
न वनं गन्तुकामस्य त्यजतश्च वसुंधरां ।
सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया ॥ ३३ ॥
प्रतिषिध्य शुभं छत्त्रं व्यजने च स्वलंकृते ।
विसर्जयित्वा स्वजनं रथं पौरांस्तथा जनान् ॥ ३४ ॥
धारयन् मनसा दुःखमिन्द्रियाणि निगृह्य च ।
प्रविवेशात्मवान् वेश्म मातुरप्रियशंसिवान् ॥ ३५ ॥
सर्वो ऽप्यभिजनः श्रीमान् श्रीमतः सत्यवादिनः ।
नालक्षयत रामस्य कंचिदाकारमानने ॥ ३६ ॥
उचितं च महाबाहुर्न जहौ हर्षमात्मवान् ।
शारदः समुदीर्णांशुश्चन्द्रस्तेज इवात्मजं ॥ ३७ ॥
वाचा मधुरया रामः सर्वं संमानयन् जनं ।
मातुः समीपं धर्मात्मा प्रविवेश महायशाः ॥ ३८ ॥



Digitized by Google

तं गुणैः समतां प्राप्तो भ्राता विपुलविक्रमः ।
सौमित्रिरनुवव्राज धारयन् दुःखमात्मजं ॥ ३९ ॥
प्रविश्य वेश्मातिभृशं मुदायुतं
समीक्ष्य तां चार्थविपत्तिमागतां ।
न चैव रामोऽत्र जगाम विक्रियां
सुहृज्जनस्यात्मविपत्तिशङ्कया ॥ ४० ॥

इत्ययोध्याकाण्डे वनवासप्रतिज्ञा नाम एकोनविंशः सर्गः
॥ १९ ॥

## CAPUT XX.

### CAUSALYAE LAMENTATIO.

तस्मिंस्तु पुरुषव्याघ्रे निष्क्रमति कृताञ्जलौ ।
आर्तशब्दो महान् जज्ञे स्त्रीणामन्तःपुरे तदा ॥ १ ॥
कृत्येष्वचोदितः पित्रा स्वतन्त्रेणैव कार्यकृत् ।
गतिर्यः शरणं चासीत् स रामोऽद्य प्रवत्स्यति ॥ २ ॥
कौशल्यायां यथा युक्तो जनन्यां वर्तते सदा ।
तथैव वर्ततेऽस्मासु जन्मप्रभृति राघवः ॥ ३ ॥

न क्रुध्यत्यतिशप्तोऽपि क्रोधनीयानि वर्जयन् ।
क्रुद्धान् प्रसादयन् सर्वान् स इतोऽद्य प्रवत्स्यति ॥ ४ ॥
अबुद्धिर्वत नो राजा जीवलोकं चरत्ययं ।
यो गतिं सर्वभूतानां परित्यजति राघवं ॥ ५ ॥
इति सर्वा महिष्यस्ता विवत्सा इव धेनवः ।
पतिमाचुक्रुशुश्चापि सस्वरं चापि चुक्रुशुः ॥ ६ ॥
स हि चान्तःपुरे घोरमार्तशब्दं महीपतिः ।
पुत्रशोकाभिसंतप्तः श्रुत्वा व्यलीयतासने ॥ ७ ॥
रामस्तु भृशमायस्तो निःश्वसन्निव कुञ्जरः ।
जगाम सहितो भ्रात्रा मातुरन्तःपुरं वशी ॥ ८ ॥
सोऽपश्यत् पुरुषं तत्र वृद्धं परमपूजितं ।
उपविष्टं गृहद्वारि तिष्ठतश्चापरान् बहून् ॥ ९ ॥
दृष्ट्वैव तु तदा रामं ते सर्वे समुपस्थिताः ।
जयेति जयतां श्रेष्ठं वर्धयन्ति स्म राघवं ॥ १० ॥
प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः ।
ब्राह्मणान् वेदसंपन्नान् वृद्धान् राज्ञाभिसत्कृतान् ॥ ११ ॥
प्रणम्य रामस्तान् वृद्धान् तृतीयायां ददर्श सः ।
स्त्रियो बालाश्च वृद्धाश्च द्वाररक्षणतत्पराः ॥ १२ ॥
वर्धयित्वा प्रहृष्टास्ताः प्रविश्य च गृहं स्त्रियः ।
न्यवेदयन्त त्वरिता राममातुः प्रियं तदा ॥ १३ ॥

Digitized by Google

कौशल्यापि तदा देवी रात्रिं स्थित्वा समाहिता ।
प्रभाते त्वकरोत् पूजां विष्णोः पुत्रहितैषिणी ॥ १४ ॥
सा क्षौमवसना हृष्टा नित्यं व्रतपरायणा ।
अग्निं जुहोति स्म तदा मन्त्रवत् कृतमङ्गला ॥ १५ ॥
प्रविश्य तु तदा रामो मातुरन्तःपुरं शुभं ।
ददर्श मातरं तत्र हावयन्तीं हुताशनं ॥ १६ ॥
देवकार्यनिमित्तं च तत्रापश्यत् समुद्यतं ।
दध्यक्षतघृतं चैव मोदकान् हविषस्तथा ॥ १७ ॥
लाजान् माल्यानि शुक्लानि पायसं कृशरं तथा ।
समिधः पूर्णकुम्भांश्च ददर्श रघुनन्दनः ॥ १८ ॥
तां शुक्लक्षौमसंवीतां व्रतयोगेन कर्शितां ।
तर्पयन्तीं ददर्शाद्भिर्देवतां वरवर्णिनीं ॥ १९ ॥
सा चिरस्यात्मजं दृष्ट्वा मातृनन्दनमागतं ।
अभिचक्राम संहृष्टा किशोरं बडवा यथा ॥ २० ॥
स मातरमभिक्रान्तामुपसंगृह्य राघवः ।
परिष्वक्तश्च बाहुभ्यामवघ्रातश्च मूर्धनि ॥ २१ ॥
तमुवाच दुराधर्षं राघवं सुतमात्मनः ।
कौशल्या पुत्रवात्सल्यादिदं प्रियहितं वचः ॥ २२ ॥
वृद्धानां धर्मशीलानां राजर्षीणां महात्मनां ।
प्राप्नुह्यायुश्च कीर्तिं च धर्मं चाप्युचितं कुले ॥ २३ ॥

Digitized by Google

सत्यप्रतिज्ञं पितरं राजानं पश्य राघव ।
अद्यैव त्वां स धर्मात्मा यौवराज्येऽभिषेक्ष्यति ॥ २४ ॥
दत्तमासनमालभ्य भोजनेन निमन्त्रितः ।
मातरं राघवः किंचिद्व्रीडात् प्राञ्जलिरब्रवीत् ॥ २५ ॥
देवि नूनं न जानीषे महद्भयमुपस्थितं ।
इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च ॥ २६ ॥
गमिष्ये दण्डकारण्यं किमनेनासनेन मे ।
विष्टरासनयोग्यो हि कालोऽयं मामुपस्थितः ॥ २७ ॥
चतुर्दश हि वर्षाणि वत्स्यामि विजने वने ।
मधुमूलफलैर्जीवन् हित्वा मुनिवदामिषं ॥ २८ ॥
भरताय महाराजो यौवराज्यं प्रयच्छति ।
मां पुनर्दण्डकारण्यं विवासयति तापसं ॥ २९ ॥
सा निकृत्तेव शालस्य यष्टिः परशुना वने ।
पपात सहसा देवी देवतेव दिवश्च्युता ॥ ३० ॥
तामदुःखोचितां दृष्ट्वा पतितां कदलीमिव ।
रामस्तूत्थापयामास मातरं गतचेतसं ॥ ३१ ॥
उपावृत्योत्थितां दीनां बडवामिव वाहितां ।
पांशुगुण्ठितसर्वाङ्गीं विममर्श च पाणिना ॥ ३२ ॥
सा राघवमुपासीनमसुखार्ता सुखोचिता ।
उवाच पुरुषव्याघ्रमुपशृण्वति लक्ष्मणे ॥ ३३ ॥

Digitized by Google

यदि पुत्र न जायेथा मम शोकाय राघव ।
न स्म दुःखमतो भूयः पश्येयमहमप्रजाः ॥ ३४ ॥
एक एव हि बन्ध्यायाः शोको भवति मानसः ।
अप्रजाऽस्मीति संतापो न ह्यन्यः पुत्र विद्यते ॥ ३५ ॥
न दृष्टपूर्वं कल्याणं सुखं वा पतिपौरुषे ।
अपि पुत्रे विपश्येयमिति रामास्थितं मया ॥ ३६ ॥
सा बहून्यमनोज्ञानि वाक्यानि हृदयच्छिदां ।
अहं श्रोष्ये सपत्नीनामवराणां वरा सती ॥ ३७ ॥
अतो दुःखतरं किं नु प्रमदानां भविष्यति ।
मम शोको विलापश्च यादृशोऽयमनन्तकः ॥ ३८ ॥
त्वयि संनिहितेऽप्येवमहमासं निराकृता ।
किंपुनः प्रोषिते तात ध्रुवं मरणमेव मे ॥ ३९ ॥
अत्यन्तं निगृहीतास्मि भर्तुर्नित्यमसंमता ।
परिवारेण कैकेय्याः समा वाप्यथवावरा ॥ ४० ॥
यो हि मां सेवते कश्चिदथवाप्यनुवर्तते ।
कैकेय्याः पुत्रमन्वीक्ष्य स जनो नाभिभाषते ॥ ४१ ॥
नित्यक्रोधतया तस्याः कथं नु खरवादितं ।
कैकेय्या वदनं द्रष्टुं पुत्र शक्ष्यामि दुर्गता ॥ ४२ ॥
दश सप्त च वर्षाणि जातस्य तव राघव ।
आसितानि प्रकाङ्क्षन्त्या मया दुःखपरिक्षयं ॥ ४३ ॥

Digitized by Google

तदन्तयं मद्दुद्दुःखं नोत्सहे सहितुं चिरं ।
विप्रकारं सपत्नीनामेवं जीर्णापि राघव ॥ ४४ ॥
अपश्यन्ती तव मुखं परिपूर्णशशिप्रभं ।
कृपणा वर्तयिष्यामि कथं कृपणजीविका ॥ ४५ ॥
उपवासैश्च योगैश्च बहुभिश्च परिश्रमैः ।
दुःखसंवर्धितो मोघं त्वं हि दुर्गतया मया ॥ ४६ ॥
स्थिरं तु हृदयं मन्ये ममेदं यन्न दीर्यते ।
प्रावृषीव महानद्याः स्पृष्टं कूलं नवाम्भसा ॥ ४७ ॥

ममैव नूनं मरणं न विद्यते
न चावकाशोऽस्ति यमक्षये मम ।
यदन्तकोऽद्यैव न मां जिहीर्षति
प्रसह्य सिंहो रुदतीं मृगीमिव ॥ ४८ ॥
स्थिरं हि नूनं हृदयं ममायसं
न भिद्यते यद्भुवि नावदीर्यते ।
अनेन दुःखेन च देहमर्पितं
ध्रुवं ह्यकाले मरणं न विद्यते ॥ ४९ ॥
इदं तु दुःखं यदनर्थकानि मे
व्रतानि दानानि च संयमाश्च हि ।
तपश्च तप्तं यदपत्यकाम्यया
सुनिष्फलं बीजमिवोप्तमूषरे ॥ ५० ॥

Digitized by Google

यदि ह्यकाले मरणं यदृच्छया
लभेत कश्चिद्गुरुदुःखकर्षितः ।
गताहमद्यैव परेतसंसदं
विना त्वया धेनुरिवात्मजेन वै ॥ ५१ ॥

इत्ययोध्याकाण्डे कौशल्याविलापो नाम विंशः सर्गः
॥ २० ॥

Digitized by Google

## TABULA CAPITUM,
### quae hoc volumine continentur.

---

### Liber I.


| | | | Pag. |
|---|---|---|---|
| Prooemia in laudem poetae | | | 3 |
| Caput | I. | Argumentum carminis | 4 |
| » | II. | Brahmanis adventus | 14 |
| » | III. | Argumenti compendium | 19 |
| » | IV. | Rhapsodorum institutio | 24 |
| » | V. | Urbis Ayodhyae descriptio | 28 |
| » | VI. | Regis praeconium | 31 |
| » | VII. | Laudes ministrorum regis | 34 |
| » | VIII. | Sumantrae sermo | 36 |
| » | IX. | Episodium de Rishyasringa | 39 |
| » | X. | Rishyasringae arcessitus | 47 |
| » | XI. | Consilium de sacris faciundis | 51 |
| » | XII. | Sacrificium inchoatum | 53 |
| » | XIII. | Sacrificii equini consummatio | 57 |
| » | XIV. | Ratio necandi Ravanae excogitata | 63 |
| » | XV. | Nectaris apparatus | 69 |
| » | XVI. | Simiorum procreatio | 72 |
| » | XVII. | Rishyasringae reditus | 76 |
| » | XVIII. | Rishyasringae discessus in silvam | 81 |
| » | XIX. | Dasarathidarum natales | 84 |
| » | XX. | Visvamitrae adventus | 87 |


Digitized by Google

| | | | Pag. |
|---|---|---|---|
| Caput | XXI. | Visvamitrae sermo | 90 |
| » | XXII. | Dasarathae sermo | 92 |
| » | XXIII. | Vasishthae sermo | 95 |
| » | XXIV. | Disciplinarum traditio | 98 |
| » | XXV. | Commoratio in Cupidinis eremo | 101 |
| » | XXVI. | Accessus ad Tadacae silvam | 103 |
| » | XXVII. | Tadacae generatio | 107 |
| » | XXVIII. | Tadacae caedes | 109 |
| » | XXIX. | Telorum traditio | 114 |
| » | XXX. | Subsidiorum traditio | 117 |
| » | XXXI. | Commoratio in eremo Consummato | 119 |
| » | XXXII. | Visvamitrae sacrificium | 123 |
| » | XXXIII. | Commoratio in ripa Soni | 126 |
| » | XXXIV. | Brahmadattis nuptiae | 129 |
| » | XXXV. | Stirpis Visvamitrae praeconium | 135 |
| » | XXXVI. | Nymphae Gangae origo | 138 |
| » | XXXVII. | Umae magnaminitas | 140 |
| » | XXXVIII. | Carticeii generatio | 144 |
| » | XXXIX. | Sagaridarum procreatio | 147 |
| » | XL. | Terra effossa | 150 |
| » | XLI. | Capili conspectus | 153 |
| » | XLII. | Procuratio sacrificii a Sagaro suscepti | 157 |
| » | XLIII. | Munus Bhagirathi concessum | 160 |
| » | XLIV. | Nymphae Gangae descensus | 163 |
| » | XLV. | Ambrosiae origo | 170 |
| » | XLVI. | Foetus Ditidis diffissus | 175 |
| » | XLVII. | Congressus cum Sumate | 178 |
| » | XLVIII. | Exsecratio Indrae et Ahalyae | 181 |
| » | XLIX. | Ahalyae liberatio a diris | 185 |
| » | L. | Congressus cum Janaco | 188 |
| » | LI. | Episodium de Visvamitra Capp. 15. | |
| | | 1) Satanandi sermo | 191 |

| | | | Pag. |
|---|---|---|---|
| Caput | LII. | 2) Visvamitras ad epulas invitatus . . | 194 |
| » | LIII. | 3) Colloquium Vasisthae cum Visvamitra | 197 |
| » | LIV. | 4) Pugna Visvamitrae cum Sacis eorumque sociis . . . . . . . . . . | 200 |
| » | LV. | 5) Vasisthae eremus incendio conflagratus | 203 |
| » | LVI. | 6) Visvamitrae propositum . . . . | 206 |
| » | LVII. | 7) Trisancûs sermo . . . . . . . . . | 209 |
| » | LVIII. | 8) Trisancûs exsecratio . . . . . . . | 212 |
| » | LIX. | 9) Vasishthidarum exsecratio . . . . | 215 |
| » | LX. | 10) Trisancus in coelum sublatus . . . | 218 |
| » | LXI. | 11) Sunassephi mancipatio . . . . . . | 222 |
| » | LXII. | 12) Ambarishi sacrificium . . . . . . | 225 |
| » | LXIII. | 13) Menacae habitatio terrestris . . . | 228 |
| » | LXIV. | 14) Rambhae exsecratio . . . . . . . | 232 |
| » | LXV. | 15) Visvamitras in Brahmanum ordinem receptus . . . . . . . . . . . | 234 |
| » | LXVI. | Janaci sermo . . . . . . . . . . | 239 |
| » | LXVII. | Arcus diffractus . . . . . . . . . | 242 |
| » | LXVIII. | Legatorum Janaci oratio . . . . . | 245 |
| » | LXIX. | Colloquium Janaci cum Dasaratha . . | 247 |
| » | LXX. | Puellarum petitio . . . . . . . . . | 250 |
| » | LXXI. | Janaci prosapiae declaratio . . . . . | 255 |
| » | LXXII. | Vaccarum donatio . . . . . . . . | 258 |
| » | LXXIII. | Dasarathae filiorum nuptiae . . . . | 261 |
| » | LXXIV. | Congressus cum Jamadagneio . . . . | 265 |
| » | LXXV. | Jamadagneii sermo . . . . . . . . | 268 |
| » | LXXVI. | Jamadagneius Superum sedibus exclusus . | 271 |
| » | LXXVII. | Bharatae dimissio . . . . . . . . . | 274 |


## Liber II.


| | | | |
|---|---|---|---|
| Caput | I. | Decretum de Rama inaugurando . . . | 281 |
| » | II. | Civium sermo . . . . . . . . . . . | 285 |


Digitized by Google

| | | | Pag. |
|---|---|---|---|
| Caput. | III. | Dasarathae praecepta | 289 |
| » | IV. | Ramas ad imperium suscipiendum denuo sollicitatus | 295 |
| » | V. | Ramae ieiunium ordinatum | 300 |
| » | VI. | Festivus urbis ornatus | 303 |
| » | VII. | Mantharae lamentatio | 306 |
| » | VIII. | Mantharae sermo | 310 |
| » | IX. | Consilium Ramae in exilium pellendi | 314 |
| » | X. | Dasarathae sermo | 321 |
| » | XI. | Beneficiorum promissorum petitio | 325 |
| » | XII. | Dasarathae lamentatio | 328 |
| » | XIII. | Dasarathas animo perturbatus | 340 |
| » | XIV. | Ramae arcessitus | 343 |
| » | XV. | Solennium inaugurationis apparatus | 350 |
| » | XVI. | Ramas evocatus | 355 |
| » | XVII. | Ramae accessus | 359 |
| » | XVIII. | Migratio in silvam imperata | 361 |
| » | XIX. | Fides data de migratione in silvam | 366 |
| » | XX. | Causalyae lamentatio | 370 |


---

Pictura titulo Sanscrito supposita modulo multiplicato adumbrata est ex gemma annulo argenteo inclusa in museo editoris. Insculptae sunt figurae lapidi, quem vulgo *Lazuli* dicunt. Cernitur Ramas post gigantem devictum solio paterno insidens, uxorem recuperatam in gremio fovens; adstant fratres umbracula gestantes; simii, errorum eius comites, sociique periculorum, heroem gratulabundi adorant. Sine dubio eadem est gemma, quam *Raspe* in Catalogo gemmarum caelatarum exhibet, No. 714, sed ab artifice argumenti ignaro perperam delineatam.

Digitized by Google

## CORRIGENDA.

| | | | | | | |
|---|---|---|---|---|---|---|
| Pag. | 9 | lin. | 14 | राघवो | leg. | राघवः |
| « | « | « | 18 | काष्टैः | « | काष्ठैः |
| « | 17 | « | 16 | घ्यानं | « | ध्यानं |
| « | 26 | « | 4 et 5 | काष्ट | « | काष्ठ |
| « | 42 | « | 4 | चाप्यायतेक्षणाः | « | चायतेक्षणाः |
| « | 48 | « | 17 | निवेसने | « | निवेशने |
| « | 60 | « | 10 | अष्टाश्रयाः | « | अष्टाश्रयः |
| « | 68 | « | 9 | रवणां | « | रावणां |
| « | 75 | « | 11 | सुम्रीवं | « | सुग्रीवं |
| « | 82 | « | 2 | करवामह्वे | « | करवामह्वे |
| « | 97 | « | 10 | निचारयितुं | « | विचारयितुं |
| « | 108 | « | 4 | अपतन्तीं | « | आपतन्तीं |
| « | 110 | « | 7 | क्रीध | « | क्रोध |
| « | 125 | « | 1 | लश्मण | « | लक्ष्मण |
| « | 132 | « | 18 | कन्यकुब्जं | « | कान्यकुब्जं |
| « | 186 | « | 15 | धिव्यां | « | दिव्यां |
| « | 216 | « | 18 | अब्रीत् | « | अब्रवीत् |
| « | 222 | « | 13 | दुर्नयात् | « | दुर्णयात् |
| « | 232 | « | 4 | वीडिता | « | व्रीडिता |
| « | 235 | « | 1 | काष्ट | « | काष्ठ |
| « | 281 | « | 3 | भात्रा | « | भ्रात्रा |
| « | 351 | « | 20 | तद्वेस्म | « | तद्वेश्म |
| « | 369 | « | 13 | दुख | « | दुः ख |

Digitized by Google

EX OFFICINA TYPOGRAPHICA C. F. THORMANNI.

7436
1

Digitized by Google

This book is a preservation photocopy.
It was produced on Hammermill Laser Print natural white,
a 60 # book weight acid-free archival paper
which meets the requirements of
ANSI/NISO Z39.48-1992 (permanence of paper)

Preservation photocopying and binding
by
Acme Bookbinding
Charlestown, Massachusetts
1996

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

3 2044 025 019 365

Digitized by Google